# विश्वविद्या

**VOL-3**

अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता प्रवरसमीक्षिता च शोधपत्रिका

Internationally Recognized Refereed & Peer reviewed Research Journal

सम्पादकः

## डा. आर् . विटोबाचार्यः

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

२०२३

विश्वविद्या **VOL-3**

अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता प्रवरसमीक्षिता च शोधपत्रिका

सम्पादकः

डा. आर् . विटोबाचार्यः

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम् , वसन्तकुञ्ज, नवदेहली

**2023**

पुटसंख्या-**132**

प्रतयः-**50**

मूल्यम्-**100/-**

**ISBN**-

विन्यासः- श्रीकरः कुलकर्णी

मुद्रणम् - वागर्थ मुद्रणालयः

।।श्रीः।।

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्
श्रीपेजावर-अधोक्षजमठः, उडुपि
श्रीपरमपूज्यानां श्रीविश्वप्रसन्नतीर्थश्रीपादानाम्

## आशीर्वचः

निर्गते सति खद्योते खद्योतो द्योततेतराम् ।
नूनं स एव खद्योतो खद्योतानां प्रभासते ।।

रविः काटश्च खद्योतौ निशि काटो रविर्दिवा ।
विश्वविद्याख्यखद्योतो द्योतिषीष्ट दिवा निशि ।।

नोपरागे प्रकाशेते पुष्पवन्तौ विभावसू ।
विश्वविद्या दोषमुक्ता द्योततां विदुषां हृदि ।।

इति
श्रीविश्वप्रसन्नतीर्थश्रीपादाः

# सम्पादकीयम्

आत्रिवर्षं शैशवम् । ततस्त्रिहायनं पौगण्डम् । इदं बाल्यपदव्यपदेश्यम् । तत्राप्यादन्तजननाच्छिशुः। आत्रिवर्षं बालकः । ततस्त्रीणि वर्षाणि बालः । तत आचतुर्दशं कुमारः । कुमारमुपनीय गुरुकुलं प्रवेशयन्ति । कौमार एवायमधीत्य वेदान् कण्ठगतान् करोति। तत आपीच्यं वयः पञ्चदशं षोडशञ्च । यस्मिन् वयसि प्रथमा रोमराजिः श्मश्रुसङ्घश्चोन्मिषति । संप्रति वेदाङ्गानि वेदान्तञ्चाधिगच्छति । आषोडशाद्यौवनम् ।।

लिखति शिशुः । ता रेखाः । लिखति बालकः । तच्चित्रम् । लिखन्ति बालाः कुमाराश्च । नैतच्चित्रम् । तदिदं लेखनमुच्यते । निबन्ध इति च गीयते । एतस्मिन् वयसि लेखको गुरुमार्गदर्शनमपेक्षते । गुरुदर्शितपथा लिखन्तो बालाः लोकमार्गदर्शकं प्रबन्धमाबध्नन्ति।

वचनं सुकरम् । लेखनं दुष्करम् । ये सुष्ठु बोधने समर्था भवन्ति तेषां लेखः स ुग्रहो मनोहारी च भवति । बोधनसामर्थ्यं श्रवणपठनचिन्तनाभ्यासजन्यम् । अतः पठनश्रवणादिकं लेखने पर्यवस्यति । लेखनं पठनादेर्निकषो भवति। अनेके गद्यं कवीनां निकषं वदन्ति। वयन्तु सरसं सुबद्धं पद्यमपि च्छात्राणां निकषं ब्रूमः । वज्रं निकषेण परीक्ष्यते । विदग्धाः लेखनेन परीक्ष्यन्ते ।।

दशकृत्वः पठितमपि विस्मरन्ति सद्यो विस्मरणशीलाः । परं सकृल्लिखितं न तथा विस्मरन्ति । अतो लेखाभ्यासः सर्वैर्विधेयः ।

नानाविधानि सुगन्धीनि लेखपत्राणि पद्यपुष्पाणि चात्र विलसन्ति । कानिचन प्रभाते कोरकाणीव विकसन्तीव । एभिः सुमनोभिः समभ्यर्च्यते गुरूणां कुलपतीनामन्तर्यामी ।।

**इति**

**डा ।। डा. आर् . विटोबाचार्यः**

# Review Board as -

**Dr. Shrinidhi Pyati**
**Ass.** Prof. (**Research**)
Poornaprajna Samshodhana Mandiram

**Dr. Vinay Desai**
**Ass.** Prof. (**library**)
Poornaprajna Samshodhana Mandiram

**Dr. Hayavadana B. S.**
**Ass.** Prof. (**Research**)
Poornaprajna Samshodhana Mandiram

**Dr. Venkatesha Kulakarni**
**Lecturer-**Poornaprajna Vidyapeetha

**Dr. L. Sudheendra**
**Lecturer-** Poornaprajna Vidyapeetha

# विषयानुक्रमणिका


आशीर्वादः

सम्पादकीयम्

१. द्वैतदर्शने मोक्षसाधनसामग्र्यः - डा.के. शङ्करनारायण अडिग ७

२. संस्कृतसाहित्ये मानविकता - डा. पि. नारायणन् १६

३. न्यायवैशेषिकदर्शनयोः मनस इन्द्रियत्वम् - विद्वान् अविनाशः २१

४. दक्षिणा ज्ञानसन्देशः - डा. माधवाचार्यपाण्डुरङ्गी २६

५. संस्कृतभाषायाः समभिवृद्धौ महिलानां योगदानम् – डा. नागरत्ना हेगडे २९

६. द्वैतवेदान्ते विशेषः - विद्वान् के. श्रीनिधिः ३७

७. धर्माधर्मयोः अष्टौ प्रमाणानि -डा. इ.एन्. श्रीनिवासः ४२

८. सतीपद्धतिः शास्त्रसम्मता वा ? - डा. रङ्गनाथकट्टि ४६

9. श्रीशतानन्दमुनिविरचितश्रीहरिवाक्यसुधासिन्धौ प्रतिपादितस्य एकान्तिकधर्मस्य विमर्शात्मकाध्ययनम् कृष्ण. कोर्ति 52

10. हरिवाक्यसुधासिन्धौ प्रतिपादितसर्वसामान्यधर्मस्य विमर्शात्मकाध्ययनम् - -वीरसिंह पि.आर् 61

11. आत्मज्ञानविमर्शः प्रदीपसिंहाचार्यः चतुर्वेदः 69

12. एकजीववादनिरासः योगीन्द्र गणाचारि 75

13. जीवत्रैविध्यनिरूपणम् - DEVENDAR 87

14. ईश्वरस्वरूपनिरूपणम् डा- आर् विटोबाचार्यः 99

15. भगवतोः निर्गुणत्वस्वरूपविचारः श्रीकरः कुलकर्णि 109

16. श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः नवमाध्यायभाष्यद्वयस्य तुलनात्मकमध्ययनम् डा. श्रीनिधि वि. 117

17. भगवच्छास्त्रे दशविधहेतुनिरूपणम् (अष्टम-नवम-दशम-हेतवः) प्रदीपसिंहाचार्यः चतुर्वेदः 123

# द्वैतदर्शने मोक्षसाधनसामग्र्यः

- डा.के. शङ्करनारायण अडिग

सहाचार्यः, द्वैतवेदान्तविभागः,

राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपति

समग्रेऽस्मिन् वैरिञ्चे प्रपञ्चे सर्वेऽपि मनुजाः 'सुखमेव मे स्यात्, दुःखं मनागपि मा भूत्' इति दुःखास्पृष्टसुखमेव वाच्छन्ति सैषा स्थितिस्तु मुक्तावेव भवति । श्रीमदानन्दतीर्थभगवत्पादाचार्यैः प्रवर्तिते तत्ववादापरपर्याये द्वैतदर्शने मुक्तिस्वरूपं तु जीवानामन्यथास्वरूपत्यागेन स्वरूपेण व्यवस्थितिरेवेति वर्णितम् । तथाच श्रीमद्भागवते उक्तम् -

'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः'१ । जीवानां यदन्यथारूपं स एव बन्ध इत्युच्यते । स च बन्धः जीवानां भावरूपाज्ञानादिनिमित्तकः परमात्माधीनः परमार्थ एव । जीवस्वरूपावरणभूताः जीवबन्धाः सप्त भवन्ति । अनाद्यविद्या, कामः, प्रारब्धकर्म, लिङ्गशरीरं, स्वगुणाच्छादिका-परमाच्छादिकेति द्वे प्रकृती, ईश्वरेच्छा चेति । एतन्निमित्तकः बन्धः पारमार्थिकः भगवदधीन एव । तेभ्यो मुक्तिरपि श्रीमन्नारायणाधीन एव । तथैव श्रुतिरप्याह— 'त्वं मुक्तिदो बन्धदोऽतो मतो नस्त्वं ज्ञानदोऽज्ञानदश्चासि विष्णो ।' इति । तथैव स्मृतिरप्याह—

'सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः ।

बन्धमोक्षौ च पुरुषाद् यस्मात् स हरिरेकराट् ।।'२ इति ।।

श्रीमन्नारायणानुग्रहेण जीवानां बन्धनिवृत्तौ नैजसुखानुभूतिरूपमोक्षो भवति । एतादृश-मोक्षसाधनानि तु विष्णुः, भगवत्प्रसादः, भक्तिः, तत्वज्ञानं, श्रवणादीनीति बहूनि भवन्ति ।

द्वैतसिद्धान्ते मोक्षसाधनानि

तेषु मोक्षसाधनेषु तत्ववाददर्शनेऽस्मिन् मुख्यमोक्षसाधनं साक्षाद् भगवान् विष्णुरेव । 'बन्धको भवपाशेन भवपाशाच्च मोचकः'३ इत्यादिवचनात् ।

अत्रायं प्रश्नः । यदि मोक्षसाधनं भगवान् विष्णुः तर्हि तस्य सदातनत्वेन इदानीमेव सर्वेषां मोक्षः कुतो न स्यादिति । अत्रायं परिहारः । लोके तावत् साधनं द्विविधमनुभूयते । सिद्धमसिद्धं च । तत्रासिद्धं साधनं फलकामेन निष्पाद्यं भवति । यथा स्वर्गादिसाधनं यागादि । यत् सिद्धं तु साधनं तत् सव्यापारीकरणीयम् । यथा सिद्धं वृक्षच्छेदनसाधनं कुठारादि उद्यमननिपतनरूपव्यापारसाहित्येन

कार्यकारि भवति । तथाऽत्रापि सिद्धं साधनं भगवान् मुमुक्षुणा सव्यापारीकरणीयः । व्यापारश्च प्रसन्नतैव । भगवत्प्रसादः व्यापार इत्यत्र 'यस्य, प्रसादात् परमार्तिरूपादस्मात् संसारान्मुच्यते नापरेण'४ इति श्रुतिः प्रमाणम् । यथा प्रसन्नो राजा कारागृहे बद्धम् अपराधिनं निगडबन्धनात् मोचयति । तथैव प्रसन्नो भगवान् जीवं संसारात् मोचयति ।

नारायणप्रसादस्य मोक्षसाधनत्वप्रतिपादनम्—

किञ्च नारायणप्रसादेनैव मोक्षं काठकश्रुतिरपि वदति— 'यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम्'५ इति । इच्छारूपो भगवान् यं प्रति प्रसन्नो भवति तस्यैव साक्षात्कारविषयो भूत्वा मोक्षं ददाति । मोक्षसाधनीभूतो नारायणप्रसादस्तु तज्ज्ञानादेव भवति । 'प्रियो हि ज्ञानिनोऽत्यर्थं अहं स च मम प्रियः' इति ।

यद्यपि - 'तमेवं विद्वान् अमृत इह भवति नान्यः पन्था अयनाय विद्यते'६ इति श्रुतिः भगवदपरोक्षज्ञानेन मोक्षं प्रतिपादयति । तथैव, 'दृष्ट्वैव तं मुच्यते' इति श्रुतिरपि । तथापि अनयोः श्रुत्योः कर्मादिना न मोक्षो भवति ज्ञानेनैव मुच्यते इत्यर्थ अभिप्रेत इति ज्ञातव्यः । उभयोरपि श्रुत्योः यद्यपि भगवत्प्रसादो न श्रूयते । तथापि 'यमेवैष वृणुते तेन लभ्यः' इत्यत्र यस्य प्रसादात् परमार्तिरूपाद् अस्मात् संसारान्मुच्यते नापरेण' इति वाक्यानुसारेण ज्ञानानन्तरं मोचकेश्वरप्रसादोऽध्याहर्तव्यः । एवं च इदमत्र सुसम्पन्नम् ।

मोक्षसाधनं श्रीमन्नारायणप्रसादः । तत्साधनं स्वबिम्बरूपिभगवदपरोक्षज्ञानम् । भगवत्-साक्षात्कारोऽपि भगवत्प्रसादादेव भवति । विना भगवदनुग्रहात् सहस्रैरपि प्रयत्नैरव्यक्तस्वभावो भगवान् साक्षात्कर्तुमशक्य एव । प्रसन्नस्तु सोऽचिन्त्यशक्तिबलात् स्वात्मानं दर्शयतीति वक्तुं शक्यते । तत्र दर्शनसाधनीभूतो भगवत्प्रसादस्तु वैराग्यं, विष्णुभक्तिः, अध्ययनम् शमदमादि-सम्पत्तिः मुमुक्षा इत्यधिकारसम्पन्नेन मुमुक्षुणा भक्तेन क्रियमाणेन श्रवणमनननिदिध्यासनादिना भवति । तत्र वाक्यार्थज्ञानरूपे श्रवणे कृतोऽपि वाक्यार्थदार्ढ्यार्थं मननापरपर्याययुक्त्यनुसन्धानरूपो विचारः करणीयः । तेन च निदिध्यासनं कर्तुं शक्नोति साधकः । निदिध्यासनं नाम साधकयोग्य-गुणोपेतस्य निर्दोषस्य स्वबिम्बरूपभगवद्विग्रहस्य आदरनैरन्तर्येण विषयवैराग्यसहितभक्त्या विचिन्तनमेव । तथैव वदति श्रुतिः - 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः'७ इति ।

ब्रह्मजिज्ञासायामधिकारः —

श्रवणमनननिदिध्यासनरूपब्रह्मजिज्ञासां कर्तुं साधकस्य अधिकारोऽपि आवश्यकः, स च

विष्णुभक्तिः अध्ययनं, शमदमादिसम्पत्तिः नित्यानित्यवस्तुविवेकः वैराग्यमित्येते धर्माः । एते च धर्माः मुमुक्षोरावश्यकाः भवन्ति ।

कर्मणा साक्षान्न मोक्षः

'नान्यः पन्था अयनाय विद्यते'८ इति श्रुतिः ज्ञानान्यमोक्षमार्गं निषेधति । अतो मोक्षस्तु कर्मणा नैव भवति । तत्र निष्कामकर्म अन्तःकरणशुद्धिद्वारा ज्ञानप्राप्तयेऽङ्गं भवति । 'कर्मणा ज्ञानमातनोति । ज्ञानेनामृतीभवति'(श्रुतिः) इति श्रुतेः ।

क्वचित् 'अपाम सोमममृता अभूम'९ इति कर्मणा साक्षान्मोक्षं श्रावयन्त्यः श्रुतयः श्रूयन्ते । तास्तु सावकाशत्वेन निरवकाशज्ञानमोक्षप्रतिपादकश्रुतिविरोधेनान्यथा योज्याः ।

'अपाम सोमममृता अभूम अगन्म ज्योतिरविदाम देवान्' इति श्रुतेरयमर्थः । सोममपाम = निष्कामसोमयागानुष्टानेनान्तःकरणशुद्धिद्वारा ज्योतिरगन्म = भगवत्साक्षात्कारं प्राप्नुवाम ।

अनन्तरं प्रारब्धकर्मावसाने देवान् = ब्रह्मादिदेवान् अविदाम प्राप्नुवाम । ततश्च तैः साकममृता अभूम' इति द्वैतदर्शने तच्छ्रुतेरर्थो ज्ञातव्यः ।

द्वैतसिद्धान्ते मोक्षसाधनसामग्रीकोटिप्रविष्टानि

द्वैतनये मोक्षसाधनानि अनेकानि सन्ति । तानि च-

१. तारतम्यज्ञानं - ब्रह्मादिसर्वजीवानां तारतम्यज्ञानं, विष्णोः सर्वोत्तमत्वज्ञानं च मोक्षसाधने स्तः । एताभ्यां विना न कथञ्चन कस्यापि मुक्तिर्भवति । तथा चोक्तं महाभारततात्पर्यनिर्णये-

'तारतम्यं ततो ज्ञेयं सर्वोच्चत्वं हरेस्तथा ।
एतद्विना न कस्यापि विमुक्तिः स्यात् कथञ्चन ।।'१० इति ।

२. पञ्चभेदज्ञानं, श्रीहरेरवताररूपेषु गुणक्रियादिषु चाभेदज्ञानं विष्णोर्निर्दोषत्वगुणपूर्णत्वज्ञाने च मोक्षसाधनानि सन्ति । अन्यथा मुक्तिर्न भवत्येव ।

'पञ्च भेदांश्च विज्ञाय विष्णोः स्वाभेदमेव च ।
निर्दोषत्वं गुणोद्रेकं ज्ञात्वा मुक्तिर्न चान्यथा ।।'११

३. श्रीहरेरवताररूपाणि आवेशादींश्च सम्यग् ज्ञातुः साधकस्य मुक्तिर्भवति -

अवतारान् हरेर्ज्ञात्वा नावतारा हरेश्च ये ।

तदावेशान् तथा सम्यग् ज्ञात्वा मुक्तिर्न चान्यथा ।।१२

४. सृष्ट्याद्यष्टकर्ता विष्णुः इति ज्ञानं विना न मुक्तिः

'सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबन्धनान् ।

मोक्षं च विष्णुतस्त्वेव ज्ञात्वा मुक्तिर्न चान्यथा ।।'१३

५.वेदादयो विष्णुपरा इति ज्ञानादेव मुक्तिः -

वेदांश्च पञ्चरात्राणि सेतिहासपुराणकान् ।

ज्ञात्वा विष्णुपरानेव मुच्यते नान्यथा क्वचित् ।।१४

चत्वारो वेदा पञ्चरात्राणि स्मृतयः इतिहासग्रन्थाः सकलपुराणानि च मुख्यवृत्त्या विष्णुम्-ोवप्रतिपादयन्तीति ज्ञानादेव मुक्तिः ।

एतानि सर्वाणि मोक्षस्य साधारणसाधनानि । भक्तिस्तु मोक्षस्य असाधारणकारणं मुख्यसाधनम्-ाति ज्ञेयम् ।

६. महात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।

स्नेहो भक्तिरिति प्रोक्तः तथा मुक्तिर्नचान्यथा ।।१५

भक्तिरेव परमसाधनभूता -

मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी ।

यद्यपि मोक्षास्य अन्यानि साधनानि सन्ति । वेदाध्ययनम्, तत्त्वज्ञानं, विष्णुभक्तिः, वैराग्यम्, निषिद्धकर्मत्यागः, सदा शास्त्रोक्तवर्णाश्रमोचितविहितकर्मानुष्ठानम्, सदा विष्णुस्मरणम् इत्यादीनि । एतानि विना न मोक्षो भवेत् । अत्र विष्णुभक्तिरपि साधारणसाधनकोटिप्रविष्टा विद्यते । तथापि भक्तिः सर्वेभ्यः साधनेभ्योऽधिकेति ज्ञेयम् ।

अपरोक्षज्ञानादपि मोक्षसाधनीभूता परिपक्वभक्तिरधिकसाधनमिति श्रीमध्वाचार्यैः गीता-भाष्येऽवादि ।

'अज्ञात्वा ध्यायतो ध्यानाद् ज्ञानमेव विशिष्यते ।

ज्ञात्वा ध्यानं ज्ञानमात्राद् ध्यानादपि तु दर्शनम् ।।

दर्शनाच्चैव भक्तिश्च न किञ्चित् साधनाधिकम् ।।'१६ इति ।

तथैवानुव्याख्याने - ३.३

‘साधनेभ्योऽधिका भक्तिर्नैवान्यत् तादृशं क्वचित्’१७ इति ।

भक्तिरेव परमसाधनमिति तन्त्रसारे भगवत्पादैः श्रीमध्वाचार्यैः प्रत्यपादि -

‘मुख्यमेवैषा नान्यत् स्यात् सर्वं व्यर्थं तया विना ।

सैकाऽप्यभीष्टफलदा मोक्षो दर्शनयुक्तया ।।’१८ इति ।

भक्तिरेव मुख्यसाधनं तया विना कृतं दानतीर्थतपोयज्ञादि सर्वं व्यर्थम् ।

‘दानतीर्थतपोयज्ञपूर्वाः सर्वेऽपि सर्वदा ।

अङ्गानि हरिसेवायां भक्तिस्त्वेका विमुक्तये ।।’१९ इति ।।

तथैव बृहद्भाष्ये चोक्तम् -

‘ध्यानं च गुरुशुश्रूषा नित्यनैमित्तिकाः क्रियाः ।

तीर्थदानतपाद्याश्च स्वाध्यायो हरिकीर्तनम् ।

द्वादश्यादि व्रतं चैव तुलस्यादेरथार्चनम् ।।

सर्वं भक्त्यर्थमुद्दिष्टं निष्फलं तत् तया विना ।।

विष्णुभक्तियुतो मुक्तिं याति नान्यः कथञ्चन ।।’२० इति ।

मोक्षस्य स्वतन्त्रसाधनं भगवान् वा भक्तिर्वा ?

एतेभ्यः सर्वेभ्योऽपि साधनेभ्यः भगवान् विष्णुरेव स्वतन्त्रः परममुख्यः मोक्षसाधनमिति एतैः प्रमाणवचनैरवसीयते -

‘बन्धको भवपाशेन भवपाशाच्च मोचकः ।’२१

‘सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः ।

बन्धमोक्षौ च पुरुषाद् यस्मात् स हरिरेकराट् ।।’२२

तथैव मोक्षस्य भक्तिरेव परमसाधनमिति चाऽग्रतनैः प्रमाणैः ज्ञायते -

‘भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति ।

भक्तिवशः पुरुषो भक्तिरेव भूयसी ।।’२३

'भक्तिस्त्वेका विमुक्तये' इति ।

अत्रायं जिज्ञासोदेति । भक्तिरेवाधिकारिणं साधकं भगवत्समीपं प्रापयति । भक्तिरेव विष्णुं दर्शयति । विष्णुः भक्तेरधीनः । सकलेषु साधनेषु भक्तिरेवाधिका मता इत्यपि प्रतिपादितम् । अत्र अस्वतन्त्रायाः भक्तेरेव मोक्षदायकत्वमुक्तं कथं सङ्गच्छते ? इति ।

अत्रानयोर्वचनयोः सङ्गमनमेवं कार्यम् ।

वस्तुतः श्रीहरिरेव स्वतन्त्रः परममुख्यो मोक्षसाधनम् । परन्तु स भक्तिं विना न मोक्षं ददाति । भक्तिरपि मोक्षहेतुभगवत्प्रसादसम्पादकतयाऽस्वतन्त्रमोक्षसाधनेषु श्रेष्ठेति परिगण्यते ।

तस्माद् 'भक्तिरेवैनं नयति'२४ इति श्रुतेरयमर्थः श्रीमध्वाचार्यैः ब्रह्मसूत्रभाष्ये प्रतिपादितः ।

'भक्तिस्थः परमो विष्णुः तयैवैनं वशं नयेत् ।
तयैव दर्शनं यातः प्रदद्यान्मुक्तिमेतया ।
स्नेहानुबन्धो यस्तस्मिन् बहुमानपुरस्सरः ।
भक्तिरित्युच्यते सैव करणं परमेशितुः ।।'२५ इति ।

अतो 'भक्तिरेवैनं नयति, इति वाक्यं काष्ठं पचतीति वाक्यवद् उपचारतः प्रयुक्तम् । भक्तिस्तु विष्णोर्मोक्षदाने श्रेष्ठं साधनम् - 'करणं परमेशितुः' इति प्रमाणानुसारेण साधनेषु प्रधानसाधनं भक्तिः । कस्मादपि कारणात् स्वातन्त्र्येण मुक्तिकारणत्वं तस्याः नास्ति । भगवान् विष्णुरेव स्वातन्त्र्येण मोक्षसाधनमिति श्रीमध्वाचार्याणां सिद्धान्तः ।

मुक्तिसाधनेषु प्रधानसाधनं भक्तिः -

१. गीतायां भगवान् श्रीकृष्णो वदति - यत् स्वस्य परोक्षज्ञाने, अपरोक्षज्ञाने स्वस्मिन् प्रवेशात्मकसायुज्यमोक्षे च परमभक्तिः प्रधानसाधनमिति ।

'नाहं वेदैः न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ।।
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।।'२६ इति ।

भगवान् परमभक्त्यैव लभ्यः - भक्तिरेव मुक्तेः परमसाधनमिति श्रीकृष्णो वदति -

'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया'२७

निरन्तरभक्तिप्रवाहात्मकभक्तियोगेन भक्तो प्राकृतिकबन्धान् हित्वा महालक्ष्मीद्वारा श्रीकृष्णमेव प्राप्नोतीति गीतायां श्रीकृष्णवचनम्-

'मां च योऽव्यभिचारेण भक्तियोहेगेन सेवते ।

स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ।।'२८ इति ।

अत्रेयं शङ्का सम्भवेत् । 'भक्तिस्त्वेका विमुक्तये' इति भक्तेर्मोक्षसाधनत्वं क्वचिदुच्यते द्वैतनये । तथा 'नान्यः पन्था अयनाय विद्यते' इति मोक्षस्य ज्ञानमेव मार्गो नान्यो मार्गो विद्यते - इति श्रुतिर्वक्ति । अतस्तयोर्वचनयोर्विरोधे किं मोक्षसाधनमिति सन्देहो भवति ।

अत्रोच्यते । ज्ञानमपि भक्तिशरीरप्रविष्टं वर्तते । यतो हि भक्तिस्वरूपे माहात्म्यज्ञानमन्तर्गतम् । अतो एतयोर्द्वयोर्मध्ये एकं हित्वा अन्यस्यास्तित्वमेव नास्ति ।

तथाहि- 'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।

स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा ।।'२९ इति ।

तस्माद् द्वाभ्यामपि मोक्षवचनं न विरुद्धम् । किन्तु उक्तार्थस्य पूरकमेव । तत्ववाददर्शनेऽस्मिन् भक्तिज्ञाने अन्योन्यस्मिन् अन्योन्यमोतप्रोततया वर्तेते । ज्ञानं विना केवला भक्तिः निर्बीजा भवति । भक्तिं विना केवलं ज्ञानं शुष्कं भवति । तथोचोक्तम् - श्रीमध्वाचार्यैः

'ज्ञानस्य भक्तिभागत्वाद् भक्तिर्ज्ञानमितीर्यते ।

ज्ञानस्यैव विशेषो यद् भक्तिरित्यभिधीयते ।।'३० इति ।

'ज्ञानभक्ती विना नैव मुक्तिः कस्यापि विद्यते ।

तयोरेकतरेणैव विष्णुगेनोभयं विना ।।

एवमप्येतयोरेकभावेऽन्यनियतेर्ध्रुवम् ।

एकेनापि भवेन्मुक्तिस्तदर्थं त्वन्यसाधनम् ।।'३१ इति च ।

तदर्थस्तु - ज्ञानसत्वे भक्तिः भवत्येव । भक्तिसत्त्वे विष्णुमाहात्म्यज्ञानम् अवश्यं भवत्येव । तस्मादेकेन मोक्षवचनं न विरुद्धम् ।।

भक्तेर्वैविध्यम्

मुक्तिसाधनीभूतायाः भक्तेरनेकानि प्रयोजनानि सन्ति । श्रवणाध्ययननिदिध्यासनादिना श्रीम्-न्नारायणे भक्तिर्जायते । तया परोक्षज्ञानम् । तेन च भक्तिः । तया च बिम्बरूपिनारायणस्यापरो-क्षज्ञानम् । तेन च परमभक्तिः । तया च परमभगवत्प्रसादः । तस्मान्मुक्तिः भवति । एतत्सर्वस्य साधनीभूतायाः भक्तेरपि फलानुसारेण अपक्वा पक्वा, परिपक्वा अतिपरिपक्वा इति नानाप्रभेदाः सन्ति ।

तथा चोक्तं श्रीमध्वाचार्यैः गीतातात्पर्यनिर्णये—

'भक्त्या प्रसन्नः परमो दद्याज्ज्ञानमनाकुलम् ।
भक्तिं च भूयसीं ताभ्यां प्रसन्नो दर्शनं व्रजेत् ।
ततोऽपि भूयसीं भक्तिं दद्यात् तन्नान्यथा भवेत् ।
मुक्तोऽपि तद्वशो नित्यं भूयो भक्तिसमन्वितः ।
साध्याऽऽनन्दस्वरूपैव भक्तिर्नैवात्र साधनम् ।।'३२ इति ।

भक्त्या प्रसन्नो विष्णुः भक्ताय संशयविपरीतभिन्नं स्थिरं परोक्षज्ञानं ददाति । ततः निश्चयज्ञानभक्तिभ्यां भक्ताय विष्णुरधिकां भक्तिं ददाति । पुनः तया प्रसन्नोऽपरोक्षविषयो भवति । अपरोक्षज्ञानानन्तरम् अतिपरिपक्वां दृढतरां भक्तिं भक्ताय दत्वा तादृशज्ञानभक्तिभ्यां प्रसन्नो भूत्वा मुक्तिं यच्छति । मुक्तोऽपि भगवदधीनो भूत्वा भगवति भूयसीं भक्तिं करोति । मोक्षे च विद्यमाना भक्तिः न साधनरूपा, किन्तु फलरूपाऽऽनन्दरूपैव भवति ।

'भक्तिमान् परमे विष्णौ यस्त्वध्ययनवान् नरः' इति साधकास्याधिकारिणः प्रथमतः साधारण-ाभक्तिरपि आवश्यकी । तया स शास्त्रजन्यज्ञानं वैराग्यं च सम्पाद्य तत्वज्ञानं सम्पादयेत् । अनन्तरं सैव भक्तिः पक्वा परिपक्वा भूत्वा अपरोक्षज्ञानजननद्वारा भगवत्प्रसादद्वारा मोक्षसाधनमपि भवति ।

उपसंहारः -

एतावता प्रबन्धेनेदं निष्पन्नम् । मोक्षस्य प्रसन्नो भगवान् विष्णुः स्वतन्त्रः परमो मुख्यश्च साधनम् । भक्तिस्तु मोक्षहेतुभगवत्प्रसादसम्पादकतयाऽस्वतन्त्रमोक्षसाधनेषु श्रेष्ठा । अनन्तरं भग-ावदपरोक्षज्ञानेन भूयसीं भक्तिं प्राप्य साधको मुक्तो भवति । अन्यानि सर्वाणि साधनानि भक्त्यर्थं भवन्ति । भगवद्भक्तिरेव मुख्यसाधनमिति मथितार्थः ।

******

# END NOTES :

०१. भागवतम्.२.१०.६
०२. ब्र.सू.भा.उदा.स्कान्दपुराणवचनम् - १.१.२
०३. अनुव्या.१.१.१
०४. वि.त.नि.उदा.श्रुतिः -१.१
०५. कठ.२.२३
०६. तै.आ.३.१२
०७. बृ.उ.६.५.६
०८. तै.आ.३.१२
०९. ऋ.८.४८.३
१०. म.भा.ता.नि.. १-८०
११. म.भा.तानि. १-८१
१२. म.भा.तानि. १-८२
१३. म.भा.तानि. १-८३
१४. म.भा.तानि. १-८४
१५. म.भा.ता.नि.१-८५
१६.नारदीयपुराणवचनम्-गी.भा.६.४६-४७
१७. अनुव्या.३.३
१८. त.सा.सं.४.१७३
१९. म.भा.ता.नि.१.५६
२०. बृ.भा.३.२
२१. न्या.सुधा.१.१.१
२२ अनुव्याख्यानोदाहृतहरिवंशप्रमाणवचनम्.१.१.२
२३. सू.भा.उदा.माठरश्रुतिः - ३.३.५४
२४. सूत्रभाष्य.३.३.५४ ; माठरश्रुतिः
२५. ब्रह्मसूत्रभाष्यम् -३.३.५४
२६. भ.गी.११.५४
२७. भ.गी.८.२२
२८. भ.गी.१४.२७
२९. म.भा.ता.नि.१.८५
३०. अनु.व्या, ३.४.१९९
३१. अनुव्या.३.४
३२. गीतातात्पर्यनिर्णयः

# संस्कृतसाहित्ये मानविकता

- डा. पि. नारायणन्
न्म्पूतिरि, प्रोफेसर् (कार्यमुक्त),
कालिकट् विश्वविद्यालयः, केरला
मो.नं. ९४४७५३७०९८

भारतीयेतिहासयोः काव्यनाटकेषु च यद्यपि महात्मनां चरित्रचित्रणं साधु अनष्ठितं तथापि तेषाम् आचारानुष्ठानैः व्यवहारैश्च मानविकतायाः अन्यूना शोभा अवलोकयितुं शक्यते । न केवलमेकस्य प्रान्तस्य वा जनसमूहस्य चरितेन काव्यं कालातिवर्ति भविष्यति अस्माकं कविवर्याः अचिन्तयन् । स्वकीयां प्रज्ञाम् अवलम्ब्य विश्वे विद्यमानानां मानवमूल्यानां तथा मानविकतायाश्च चित्रमाविष्कुर्वन्तः ते विश्वसाहित्ये विख्याताश्च संवृत्ताः । प्राचीनाश्च ते ऋषयः 'विश्वं भवत्येकनीडम्' इत्युपदर्शयन्तः परस्परप्रेम्णः तथा समवृत्तितायाश्च उदात्तमाशयं लोकाय समर्पयन् । आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा इति सूचितस्य रामस्य हृदयेन केवलं लोकाराधनतत्परत्वम् अपि तु लोकेषु मिथः सौहार्दस्य सङ्कल्पोऽपि वर्तते । अर्थशास्त्रकारेणापि प्रजाहिततात्पर्यमेव राज्ञः तात्पर्यमिति प्रादर्शि ।

प्रजाहिते हितं राज्ञः प्रजानां च सुखे सुखम् ।
नात्मप्रियं प्रियं राज्ञः प्रजानाश्च सुखे हितम् ।। (अर्थशास्त्र-विनयाधिकरणम्)

कालिदासादयस्तु स्वकथापात्राणां राज्ञां क्षितेः सीमा तावत् 'समुद्ररशना चोर्वी', 'जुगोप गोरूपधरामिवोर्वीम्' इत्यादिभिः वर्णनैः बहुविस्तृता इति अदर्शयन् । एवं स्थितेऽप्यसौ राजा न वा हस्तिनापुरस्य न वा अयोद्यायाः इत्यकल्पयन् । तेषां राज्ञाम् उदरैः गुणैः विचित्राभिः क्रियाकलापैश्चैते विश्वस्य नेतारो भवन्तीति अस्मान् आवेदयन् ।

एवं महाकवीनां वचस्सु विश्वमानविकतायाः परामर्शाः बहव विद्यन्ते इति दर्शयितुमेवायं यत्नः ।

'अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।'

अयं श्लोकः उदारचरितानां सुमनसां चिन्तापद्धतौ परथैकप्रवृत्या कथं जनाः कृतार्थाः भवेयुः इति सूचयति । यद्येकस्मिन् कुटुम्बे विद्यमानाः पितृपुत्रादयः परस्परं मानवमूल्यानि परिरक्ष्य सहवर्तित्वं कामयमानाः सन्तः साहोदर्यं परिपोषयन्ति तादृशैः कुटुम्बैः समाकुलं समाजं राज्यस्य प्रगत्यै अलम् ।

उदात्ताशयानां मनीषीणां ईदृशानि वाक्यानि 'तेन त्यक्तेन भुञ्जीथाः' इति वाक्यं कटाक्षयन्ति । 'मा ते सङ्गोऽस्त्वकर्मणि' इति भगवतः वाक्यमनुस्मरन्तः प्राचीनाः अन्योन्यस्नेहेन जीवनस्य महिमानम् एधन्ते । अपि एकैकस्य मोक्षरूपेण यद् लक्ष्यं दर्शनेषु घोषितं तदपि फलेच्छारहितेन कर्मणा एव सिध्यति इति सूच्यति । एवं कर्मणां गौरवं महत्त्वं च प्रदर्श्य तदर्थं जनान् प्रेरयति इति कर्मसाध्यमेव निश्रेयसमिति ज्ञापयति ।

कुमारसम्भवे एकत्र तपस्थितां पार्वतीं दिदृक्षवः ऋषयः तपोवनमुपागता इत्युपवर्ण्य तपोवनस्य रूपं एवम् इति प्रदर्शयति ।

विरोधिसत्त्वोञ्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथिः ।

नवोटजाभ्यन्तरसम्भृतानलं तपोवनं तच्च बभूव काननम् ।। (कु.स.५.१७)

अस्यायमर्थः - तस्मिन् कानने विरोधिसत्त्वाः अहिनकुलगोव्याघ्रकाकोलूकप्रभृतयः जीविनः पूर्वमत्सरं परित्यज्य परान् मित्रभावेन वीक्ष्यावसन् । तत्रस्था तरवः अतिथिगणान् अभीष्टफलकुसुम्-ाप्रदानैः अपूजयन् । तपोऽङ्गभूतं वह्निं इन्धनाद्यैः संवर्ध्यावर्तत पार्वती । ईदृशैः हेतुभिः तत्काननं तपोवनोपमितम् अजायत इति । कवेः कालिदासस्य हृदये प्रपञ्चोऽयं कथं भवेदिति स्पष्टं दर्शयति । यस्यां जगत्यां राज्यानि राष्ट्राश्च वा मिथः शत्रुभावं विहाय यदा वर्तन्ते तत्रैव लोकस्य प्रगतिर्भवेत् । तथा यदा मानवाः प्रकृतिम् अबाधित्वा तया समं रञ्जनेन वर्तन्ते तदा इयम् अभीष्टफलदात्री भविष्यति । यदा हि आत्मनः अभ्युदयाय ज्ञानरूपं वह्निं यः कश्चित् प्रत्यहं ज्वलयति तस्य सर्वेभ्यः कर्मभ्यः निश्रेयसं भविष्यति । कवेः प्रपञ्चवीक्ष्णस्य निदर्शकमिदम् ।

अभिज्ञानशाकुन्तले कण्वः एवं वदति - 'वनौकसोऽपि सन्तः लोकाज्ञा वयम्' इति । लोकस्य विभिन्नेषु भागेषु कथम् आचारान् अनुतिष्ठिन्ति इति ज्ञात्वैव कण्वः एवमभिप्रैति । आचारादिभिः कथम् अस्माकं संस्कृतिः संरक्ष्यते इति अनेन द्योत्यते । अवनभोजनादिषु युगपत् स्थितेः तथा सहयोगस्य च प्राधान्यं सूचयद्भिः वचोभिः विद्वेषराहित्यमपि अवश्यपालनीयमिति उपनिषद्वाक्यमस्म्-ाान् स्मारयति । तस्मादेव, अध्ययनावसरे भोजनावसरे च छात्रान् बोधयितुं 'सह नौ भुनक्तु' इत्यादि वाक्यान्युपयुज्यन्ते । द्वेषरूपेण व्यवहारेण आचारेण वा यत्र जनाः क्लिश्यन्ते तेभ्यः साहाय्यमपि इति छात्रान् गुरवः पाठयन्ति ।

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।

देवा भागं यथा पूर्वे संजनाना उपासते ।। १०.१९१.२

यात्रायां सम्भाषणे संवादे च युगपदेव यूयं वर्तध्वम् इतीयं ऋक् समवस्थितेः सहयोगस्य च महत्वं व्यनक्ति । भेदभावं निराकरोति च ।

समानो मन्त्रः समिति समानी समानं मनसस्सह चित्तमेषाम् ।

समानं मन्त्रभिमन्त्रयेव समानेन वा हविषा जुहोमि ।। १०.१९१.३

सर्वेष्वपि कार्यजलेषु भेदभावं विहाय समत्वस्य सहिष्णुतायाश्च अनुरणनानि श्रावयितुम् इयम् ऋक् उपकारिका ।

नृपस्य वर्णाश्रमपालनं यः स एव धर्मो मनुना प्रणीतः ।। (रघु.१४.६७)

इति कर्तव्योद्घोषणेन राजानः सम्यग् निवेदिताः । सा चेयं वर्णसमीक्षा गुणकर्माश्रिता इति कथनेन केवलेन जनुषा न किमप्यायाति इति सिध्यति । अपि च एतेषु गुणकर्मविभागेषु भेदः संलक्ष्यते तदपि प्रातिभासिका इति द्योत्यते ।

रुपकार्यसमाख्याश्चभिद्यते तत्र तत्र वै

आकाशस्य न भेदोऽस्ति तद्वत् जीवेषु निर्णयः । (मा.उप.अद्वैतप्रकरणम्,६)

जीवेषु भेदोपलक्षणाः रूपकार्यसमाख्याः वस्तुतः भेदाभावं न प्रकटयति इत्यनेन वाक्येन मानवानाम् एकत्वं साधितं भवति ।

मलयालभाषायां निष्णातः अक्कित्तम् अच्युतन् नम्पूतिरिरिति कविरासीत् । ज्ञानपीठपुरस्कारेण सम्मानितः अयं स्वीये काव्ये मानविकताया महिमानमित्थम् अलिखत् ।

उपाधिरहितं प्रेम बलं प्राप्नोति च क्रमात् ।

तदेव सुन्दरं सत्यम् धर्मश्च परिशीलने ।।

अन्यत्र एतेनैवमुक्तम् -

इतरेषां कृतं यावदश्रुपातं करोम्यहम् ।

आत्मन्युदयते तावत् सहस्रं सौरमण्डलम् ।।

इतरेषां दुःखानि दूरीकर्तुं यदा जनः प्रवर्तते तत्र तावत् चेतसि प्रेम्णः सहस्रं सौरमण्डलम् उदेति
।

अधुनातनीं परिस्थितिमालोक्य, 'वसुधेयं नोपवासयोग्या सम्पादिता स्वार्थैकपरैर्मनुजापसदैः' इति व्यञ्जयन्ति सन्त्यमूनि वाक्यानि । यदा हि स्नेहपाशेन सर्वे लोकाः बन्धिताः तदा अयं प्रपञ्चः स्वर्गमप्यतिशेते । अत एव स्वर्गोपमं भवत्ययं प्रदेश इति बहुत्र वर्णितं दृश्यते - यथा

'महीतलस्पर्शनमात्रभिन्नं ऋद्धं हि राज्यं पदमैन्द्रमाहुः'

'शेषैः पुण्यै हृतमिव दिवः काञ्चनं खण्डमेकम् ।।'

सुखदुःखयोरनुगतमद्वैतं सर्वास्ववस्थासु जन्तून् अनुसरन्ति इति स्थिते एकस्यैव कृते प्रवृत्तयः एकं प्रार्थयितुं कथं क्षमः इति भवभूतिः ।

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यत् -

तामभ्यगच्छद्रुदितारुसारी

मुनिः कुशेध्माहरणाय यातः ।

निषादविद्धाण्डजदर्शनोत्थः

श्लोकत्वमापद्यत यस्य शोकः ।। (रघु.१४.७०)

इति कालिदासपदद्ये रुदितानुसारित्वं महत्या मानविकताया निदर्शनमिति वक्तुं शक्यते । यत्र हि इतरे जनाः रुदन्ति यत्र च पीड्यन्ते तत्र तान् उपसान्त्वयितुमर्हन्ति मानवाः ।

स्त्रीपुरुषयोः समत्वाङ्गीकारः मानविकताया अपरो भागः । 'प्रायेणैवं विधे कार्ये पुरन्ध्रीणां प्रगल्भता' इति वाक्यं स्त्रीणां समाजे औन्नत्यं सूचयति । अन्यैः ऋषिभिः साकं एतस्याः अरुन्धत्याः आगमनं शोभनाय अलमिति कथयति । अजः दमयन्तीं सखीरूपेण आद्रियते इति जीवनेषु साध्येषु एतासां योगदानं निस्तुलं भवति-

गृहीणी सचिवः सखी मिथः

प्रियशिष्या ललिते कलाविधौ ।

करुणाविमुखेन मृत्युना

हरता वद किं न मे हृतम् ।। (रघु.८.६७)

त्वद्दुःखेन दुःखी त्वत्सुखेन सुखी इत्येवं भूते मयि तवायं निष्ठुरः व्यापरः स्मर्तुमप्यहमशक्यः । मानविकमूल्यानि परित्यज्य स्वेच्छया यस्य कस्यापि प्रवृत्तिर्भवति तत्रापि कविं शब्दायते ।

उत्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि ।

त्वां प्रत्यकस्मात्कलुषप्रवृत्तौ अस्त्येव मन्युर्भरताग्रजे मे ।। (रघु.१४.७३)

यद्यप्यसौ आदर्शभूतः सत्यधर्मपरायणः मर्यादापुरुषोत्तमः भवति तथापि तेनानुष्ठितेन सीता परित्यागेन खिन्नहृदयः क्रुद्धश्च आदिकविः एवं प्रस्तौति ।

मानविकतानामा अयं बहुचर्चितः विषयः वेदकालादारभ्यैव प्रसिद्धिमुपगतः आसीत् । शासकानां नेतॄणां च स्वार्थैकफलानयत्वात् चारुरूपेण अधुना न प्रवर्तते इत्येव ।

*****

# न्यायवैशेषिकदर्शनयोः मनस इन्द्रियत्वम्

- विद्वान् अविनाशः

मन्यते अवबुध्यते ज्ञायते वा अनेन इति करणव्युत्पत्त्या मन ज्ञाने इति दिवादिकात् मनधातोः, मनु अवबोधने इति तनादिकात् मनुधातोर्वा सुन् प्रत्यये कृते मनः शब्दो निष्पद्यते । एवञ्च विषयज्ञाने यत् साधनं भवति तदेव मन इति मनःशब्दस्यार्थस्सिद्ध्यति । प्रत्यक्षादिषु ज्ञानेषु सुखदुःखादीनाम् उत्पादने मनःसाधनं भवति । शरीरान्तःप्रदेशे वर्तमानं सत्- ज्ञानमुत्पदयती-त्यन्तःकरणमित्युच्यते ।

चिती संज्ञाने इति भौवादिकात् चित् धातोः क्तप्रत्यये कृते चित्तमिति शब्दस्य निष्पत्तिर्भवति । चित्तादयः शब्दाः मनसः पर्यायवाचकाः भवन्ति ।

तदुक्तममरकोशे-

१'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इति

मनः शरीरस्यान्तः हृदयप्रदेशमाश्रित्य तिष्ठतीति प्रदेशावच्छेदेन तस्य हृदयम् इति नामापि सम्भवति ।

नैयायिकानां मतम् -

मनस इन्द्रियत्वम् - मनस इन्द्रियत्वविषये न्यायसूत्रेषु किमपि कथितं न दृश्यते । तथापि केचन नैयायिकाः मनस इन्द्रियत्वं साधयन्ति । न्यायदर्शनस्य व्याख्याकारेण आचार्य शालिग्रामशास्त्रिणा मनस इन्द्रियत्वं सम्यगवयवस्थापितम् । तेषामभिप्रायः ।

न्यायदर्शने यद्यपि मनस इन्द्रियत्वं न कथितं तथापि वैशेषिकैरपि स्वीकृतं मनस इन्द्रियत्वं वैशेषिकन्यायदर्शनयोः समानतन्त्रत्वात् परमतप्रतिषिद्धम् अनुमतमिति न्यायेन अत्राप्यङ्गी-करणीयम् । गौतमस्यापि मनस इन्द्रियत्वे विप्रतिपत्त्यभावादेव तेन तस्य निरासः न कृतः । अतस्तस्यापि मनसः इन्द्रियत्वमभिमतमेव । एवञ्च मनसोऽपीन्द्रियत्वात् न तज्जन्यं सुखदुःखादिज्ञानमपि प्रत्यक्षमेव भवति अतश्च घ्राणजं, रासनं, चाक्षुषं, स्पर्शनं, श्रौत्रं, मानसश्चेति प्रत्यक्षं षड्विधम् । इन्द्रियपदा-र्थसन्निकर्षः संयोगः संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषण-ाविशेष्यभावश्चेति षड्विधो भवतीति यत् कथितं तत्र कारणन्तु इन्द्रियाणां षट् सङ्ख्याकत्वमेव । इन्द्रियाणि षट् भवन्तीति सन्निकर्षाणामपि षट्त्वं संभवति । सुखदुःखेच्छाद्वेषप्रयत्ना आत्मनः मानसप्रत्यक्षविषया इति ।

एवञ्च नैयायिकानां मते मनस इन्द्रियत्वमस्तीति ज्ञायते ।

मनस इन्द्रियत्वं वात्स्यायनेनापि न्यायदर्शनभाष्ये निरूपितम् । 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेशमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्२ इति सूत्रे इन्द्रियार्थसन्निकर्षेण प्रत्यक्षं जायत इति प्रत्यक्षलक्षणं गौतमेन निर्दिष्टम् अस्मिन् सूत्रे इन्द्रियपदस्य चक्षुरादिनि बाह्येन्द्रियाण्येवार्थः न तु आभ्यन्तरं मनः । सूत्रे मनसः निवेशाभावात्तस्य इन्द्रियत्वं नास्तीति न वाच्यम् । चक्षुरादीन्दियेभ्यः भिन्नत्वात् मनसः सूत्रे न निवेशः । चक्षुरादीनि बाह्येन्द्रियाणि भूतेभ्य उत्पद्यन्ते । अतस्तानि भौतिकानि । तेषां रुपादि एकैकस्यैकैको विषय नियतो भवति । रूपादिगुणयुक्तमेव चक्षुरादीनामिन्द्रियत्वं मनस्तु नित्यं भवतीति तस्य भूतेभ्य उत्पत्तिर्नास्ति । मनसः रूपादयस्सर्वेऽपि विषया भवन्तीति तस्यानियतविषयत्वम् । चक्षुरादिवत् मनसः गुणसहितस्यैवेन्द्रियत्वं, न सम्पद्यते । एवं चक्षुरादिभ्यः बाह्येन्द्रियेभ्यः मनसः अन्तरिन्द्रियस्य धर्मभेदोऽस्तीति गौतमेन महर्षिणा पूर्वस्मिन् सूत्रे मनःशब्दो न निविष्टः ।

तर्हि मनस इन्द्रियत्वे, इन्द्रियनिरूपणात्मके 'घ्राणरसन चक्षुस्त्वक् श्रोत्राणीन्द्रियाणि भूतेभ्यः' इत्यस्मिन् सूत्रे गौतमेन ब्राह्येन्द्रियैः घ्राणादिभिः साकं मनसो गणना किमर्थं न कृता ? इति सन्देहे सति वात्स्यायनेनैवं समाधत्तम् । ३तन्त्रान्तरे वैशेषिकदर्शने मनस इन्द्रियत्वकथनात्, तत्समानतन्त्रे न्यायदर्शनेऽपि कथितं भवति । परमतमस्माभिर्न प्रतिषिध्यते चेत् तदस्माकमभिमतमेवेत्यवधारणीयम् इति । अत एव न्यायवदर्शने कुत्राऽपि मनस इन्द्रियत्वनिरासो न दृश्यते । एवञ्च नैयायिकानामपि मनस इन्द्रियत्वमभिमतमिति सिद्ध्यति ।

वैशेषिकाः -

मनसः इन्द्रियत्वम् - मीमांसका अपि मनसः इन्द्रियत्वं साधयन्ति । चक्षुरादीन्द्रियवत् मनोऽपि ज्ञानसाधनं भवतीति तस्य इन्द्रियत्वं सिद्ध्यति । चक्षुरादीनीन्द्रियाणि रूपादीनां ज्ञानमुत्पादयन्ति, मनस्तु सुखदुःखादीनां ज्ञानम् । एतत् चक्षुरादिवत् बाह्यानां विषयाणां मानमुत्पादयितुं न समर्थम् । अपि तु शरीरावच्छिन्नं सत् आन्तरविषयकमेव ज्ञानं जनयतीति मनसः शरीरावच्छिन्नस्यैवेन्दिद्रयत्वमिति मानमेयोदयकारः४ ।

न केवलं मनः सुखादिज्ञानजनकं, अपि तु रूपादिज्ञानोत्पादने चक्षुरादिपरतन्त्रं सत् तत्राऽपि कार्याणि करोति । अतः चक्षुरादीन्दिद्रयजन्ये प्रत्यक्षज्ञानेऽपि मनसः कारणत्वमस्ति । एवमेव अनुमानादिष्वपि लिङ्गादीनां साहायेन तानि तानि ज्ञानान्युत्पादयतीति तत्राऽपि मनसः कारणत्वम् । एवञ्च

सर्वेष्वपि मानेषु मनसः प्रवृत्तिरस्तीति ज्ञानसामान्यं प्रति तस्य साधनत्वं वदति मानमेयोदयकारः५ ।

एवं मनसः विभुत्वपित्वमपि साधयति । आकाशादिवत् मनसः विभुत्वाङ्गीकारे आकाशादिव अनुपंहितत्वात् तस्य इन्द्रियत्वं न सम्भवतीत्याशङ्क्य मनसः सकलशरीरोपाधित्वस्वीकारात् इन्द्रियत्वमस्तीति समादधाति६ ।

प्रभाकरमतानुयायी शालिकानाथोऽपि मनसः इन्द्रियत्वं निर्दिशति । चक्षुरादीन्दिद्रयपेक्षया सर्वशरीरवृत्तित्वात् तस्य वैशिष्टयम् । मनः त्वक्च सर्वेषु शरीरेषु अविशेषे इन्द्रिये भवतः७ ।

मण्डनमिश्रः मनसः अन्तरिन्द्रियत्वम् स्वीकृत्य तस्य बहिः स्वातन्त्र्यं नास्तीति निरूपयितुं बहिःस्वातन्त्र्याङ्गीकारे च मनसः अन्धबधिरादयो न भवेयुरिति सूचयति८ ।

मनसः आन्तरिकसुखादिसाधने एव स्वातन्त्र्यम् । बहिरपि स्वातन्त्र्याङ्गीकारे चक्षुरादीन्द्रियहीनस्यापि मनसः सत्वात् तेनैव सः रूपादिप्रत्यक्षमधिगच्छति । एवं श्रोत्रेन्द्रियहीनोऽपि शाब्दं प्रत्यक्षम्  । अन्धादीनां यथा चक्षुराद्यभावः तथा मनोऽपि न भवतीति न वाच्यम् । तेषां पूर्वानुभूतविषयस्मृतिदर्शनात् । निर्मनस्कत्वे स्मृत्याद्यभावप्रसङ्गः । मनः स्वतन्त्रतया चक्षुरादिनिरपेक्षमेव यदि रूपादिग्रहणे समर्थं स्यात्, तर्हि लोके कोऽपि जनः अन्धः, बधिरो वा न भवेत् इति मण्डनमिश्रस्याशयं स्पष्टयति वाचस्पतिमिश्रः९ ।

मीमांसकानां मनोवैभववादं नैयायिकाः खण्डयन्ति । युगपत् मानानुत्पत्तिलक्षणमनुसृत्य मनसः अणुरूपत्वं सिद्ध्यति । मनसः विभुत्वाङ्गीकारे तु शरीरव्यापि मनोद्वारा शिरस आरभ्य पादपर्यन्तं जायमानानां युगपत् ज्ञानं भवितव्यम् । अस्य समाधानं चिदानन्दपण्डितेन नीतितत्त्वाविर्भावे एवं प्रदत्तम् - युगपत् ज्ञानानुपपत्तिः मनसः लिङ्गमिति स्वीकर्तुं न शक्यते । यथा विभुना मनसाऽपि उपाधिस्वीकारद्वारा युगपत् ज्ञानानुपपत्तिः साधयितुं शक्यते । तथैव शतावधानिन एकस्मिन्नेव काले अनेकानि ज्ञानान्युत्पद्यन्त इति मनसो विभुत्वं सिद्धं भवतीति ।

इत्थं केषाञ्चिन्मते मनोवैभववादः प्रदर्शितः । अधुना अणुत्ववादिनां मतान्युपन्यस्यन्ते । प्राभाकरः मनसः अणुत्ववादि इति पूर्वमेव कथितम् । तेष्वग्रगण्यः महामहोपाध्यायः श्री शालिकानाथमिश्रः१० स्वीये प्रकरणपञ्चिकाख्ये ग्रन्थे मनसः अद्रव्यद्रव्यत्वं प्रतिपाद्य, तस्य परम महत्परिम्ाणवत्वाङ्गीकारे  विभुद्रव्येणात्मना साकं संयोगो न घटत इति वदति । अवयवरहितद्रव्ययोः, अस्पन्द द्रव्ययोश्च परममहत् परिमाणवतोरुभयोर्विभुनोः द्रव्ययोः संयोगो न जायते । संयोगस्त्रिविधः अन्यतरकर्मजः, उभयकर्मजः, संयोगजश्चेति । विभुत्वे मनसः विभुद्रव्येणात्मना साकं त्रिविधोऽपि

संयोगो न स्पन्दद्यत इति तस्याभिप्रायः । तथा च मनसः अणुपरिमाणवत्वमेवाभ्युपेयमिति सिद्धम् । अणुत्वे तु मनसः आशुतरसञ्चारित्वात् शीघ्रं तत्तदिन्द्रियाधिष्ठानतां प्राप्य आत्मसंयोगद्वारा ज्ञानम्-ुत्पादयति११ ।

एवं कुमारिलभट्टमतानुयायी गागाभट्टोऽपि मनोऽणुत्ववादीति ज्ञायते । अनेन स्वमतखण्डनार्थं मनोवैभववादस्तिरस्कृतः । अतीन्द्रियं मनः केवलं आत्मतद्योगगुणतद्गतजातिमात्रग्रहणे स्वतन्त्रं भवति । बाह्ये विषये मनसः स्वतन्त्रता नास्ति । तत्र कारणन्त्वणुत्वमेव । अणुपरिमाणस्य मनसः देहात् बहिर्भावो न सम्भवतीति तत्र सन्निकर्षो न जायते । एवमेव युगपत् ज्ञानानुत्पत्तिः तस्याण-ुपरिमाणवत्वे प्रमाणमिति गागाभट्टस्याभिप्रायः डा.एस.वी.रघुनार्थाचार्यैरुद्धृतः१२ ।

इत्थमेव भाट्टः प्रस्थानधौरेयः पार्थसारथिमिश्रोऽपि मनोऽणुत्ववादमेव समर्थयतीति डा.एस्.वी. रघुनाथाचार्याः प्रकटयन्ति । पार्थसारिथिमिश्रस्य मनोविचारं प्रस्तूय तत्र 'अन्यमनस्कस्येत्यादिप्रय-ोगदर्शनात् अन्यमनस्कत्वम् अणुतादशायामेव युज्यत इति तस्यापि मनसः अणुतायामेव नैर्भयमिति गम्यते' इति श्रीरघुनार्थाचार्याः आहुः१३ ।

एतत्परिशीलनेनेदं वक्तुं शक्यते यत् मीमांसकेषु भाट्टप्रभाकरमतानुयायिषु अनेके न्यायवैशेषिकादिमतानुसारं मनसः विभुत्वं निराकुर्वन्तः अणुत्वमेव प्रतिपादयन्तीति । इत्येवं क्रमेण न्यायवैशेषिकमतयोः मनस इन्द्रियत्वम् निरूपितम् ॥

***

त्र्श्र एुे :

१. अमरकोशः - १.५.३१

२. न्यायदर्शनम् -१.१.४.पृ.स.२६

३. तन्त्रान्तरसमाचारौ तत् प्रत्येतव्यमिति - परमतप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः - वात्स्यायनभाष्यम् - १.१.४ पृ.सं. ३२

४. मनस्तु सुखाद्यपरोक्षज्ञानसाधनेन्द्रियत्वेन कल्प्यते । तस्य च विभुत्वं साधयिष्यते । तथाऽपि शरीरावच्छिन्नस्यैव तस्येन्दिद्रयत्वम् । मानमेयोदयः ; पृ.सं.१२

५. रूपादिज्ञानेष्वपि तत् चक्षुरादि परतन्त्रं प्रवर्तत एव । अनुमानादिष्वपि लि.....दि सहायं इति स्थितिः । मानमेयोदयः, पृ.सं.१२.

६. विभुनो मनसः अनुपहितत्वे गगनादिवदिन्द्रियत्वायोगात् उपाधिर्वक्तव्यः । मानमेयोदयः, पृ.सं.२१८

७. सर्व शरीरेषु मनः त्वक्वावी....मिन्द्रियद्वयम् । प्रकरणपश्चिका, पृ.सं. ३३१

८. स्वातन्त्र्येऽन्धबधिराद्यभावप्रस.....दित्युक्तम् । विधिविवेकः, पृ.सं.८५

९. स्वातन्त्र्ये रूपादौ मनसोऽन्दबधिराद्यभावप्रस.....त् । न खल्वन्धादयो निर्मनस्कास्तेषां स्मृत्याद्यभावप्रस....त् । मनश्चे... क्षुरादिनिरपेक्षमीक्षेत रूपादीन् न कश्चिदन्धबधिरादिः प्रसज्येतेति । न्यायकणिका, पृ.सं. ८५

१०. अद्रव्यद्रव्यत्वेऽपि परममहत्वाभ्युपगमे आत्मना सह संयोगासम्भवः । न हि परमम्-हतोरपरिस्मन्दयोरनवयवयोश्च संयोगापतिः । त्रिविध एव संयोगः अन्यतरकर्मजः, उभयकर्मजः, संयोगकर्मजश्चेति । तस्मात् परमाणुपरिमाणं मनः । प्रकरणपश्चिका, पृ.सं.३३२

११. आ....तरसश्चारि तत् आ....तरेन्दिद्राधिष्ठानद....नात् । प्रकरणपश्चिका पृ.सं.३३२

१२. ता...तरिन्द्रियं स्वातन्त्र्येण आत्मतद्योग्यगुणतद्गुणतद्गतजातिमात्रग्राहकं बाह्यविषयेषु तस्य स्वातन्त्र्याभावात् । कुतो न स्वातन्त्र्यमिति चेन्न तस्याणुपरिमाणस्य देहात् बहिर्भावाभावेन सन्निकर्षासम्भवात् । युगपत् ज्ञानानुत्पत्तिश्च प्रमाणम् । अपि मीमांसका मनोवैभववादिनः । एस्.वि. विश्वविद्यालयः ओरियन्टल् जर्नल्. पृ.सं. ३७

१३. पृ.सं.३६

# दक्षिणा ज्ञानसन्देशः

– डा. माधवाचार्यपाण्डुरङ्गी
सहायकसंशोधकः,
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

उद्धवकृतप्रश्नानाम् उत्तररूपत्वेन श्रीकृष्णः उपदिशिति दक्षिणा ज्ञानसन्देशः इति । (भाग. ११.१९.३८) । अत्र केयं दक्षिणा ? किं तत्स्वरूपम् ? कथं सा ज्ञानसन्देशरूपा? इति अध्येतॄणां शेमुषी -

अस्याः उत्तरात् पूर्वं अवश्यमेतदवगन्तव्यं यत् सर्वे प्रजाः देव-ऋषि-आचार्य-पितृऋणयुक्ता इति गुरुकुलेषु आचार्यादधिगतविद्याः स्नातकाः तद्ऋणपरिहार्या गुरुभ्यः अवश्यं दक्षिणां दद्यासुः । सर्वे गुरुदक्षिणा इति कथ्यते । कीदृशी दक्षिणा समुचिता स्यात् जीविकाकल्पितवध्द्वयः ? इति उद्धवप्रश्नस्य आशयः । भगवन् श्रीकृष्णः उपदिशिति 'दक्षिणा ज्ञानसन्देशः' इति । गुरुभिः प्राप्तविद्याः स्नातकाः ज्ञानं यथायोग्यं शिष्येषु संदिशेयुः । तथा च ज्ञानप्रसारणमेव गुरुभ्यः समुचितदक्षिणा ।

अपि च सर्वमपि देवताकार्यं दक्षिणाकं भवेत् । तथा हि - एकदा ऋषयः गङ्गातीरे बहत् सत्रम्-ोकम् अकुर्वन् । महता वैभवेन प्रवर्तितं अप यज्ञं अभीष्टफलदं नाभवत् । तदा विचारितं ऋत्विग्भ्यः अदत्तदक्षिणातः यज्ञं निष्फलं जातम्, इतोऽपि सत्रे मुख्यकारणं लक्ष्मीरूपदक्षिणायाम् अननुसन्-धानम् । - विष्णुपुराणम् ।

कथं विष्णुपत्नी दक्षिणानाम्नी इति धन्याश्चर्योपाख्यानं उत्तरति । वृत्तान्तमिदं महाभारतादिषु दृष्यते ।

पुरा एकदा श्रीकृष्णः वैदर्भीसहितः द्वारकापत्तने रैवतकगिरौ विहरति स्म । तदा नानादेश्याः दुर्योधनाद्याः भूपालसन्ध्याः समागत्य श्रीकृष्णं नमश्चक्रुः । तदवसरे नारदः गगनमार्गात् एत्य श्रीकृष्णं, 'त्वं धन्यः' 'त्वम् आश्चर्यः' त्वादृशो नास्ति कश्चित् ससम्भ्रमः आह । भगवान् कृष्णः तदाह 'दक्षिणाभिः साकं' इति ।

दक्षणाभिः साकामित्येव कृष्णं
प्रप्रच्छुरेतत् किमिति स्म भूपाः ।
नारायणो मुनिमूचे वदेति

शृणुध्वमित्याह स नारदोऽपि ।। (२०.६६) (म.ता.नि)

ततः नारदः तान् अवसरमिदम् एवम् अवर्णयत् । एकदाऽहं गङ्गायां कूर्मरूपं देवं दृष्ट्वा, उत्तमत्वभावेन 'त्वमुत्तमो नास्त्यधिकस्तवेति' ऊचे एवमुक्तो कूर्मरूपो देवः । मृद्सकाशात् गङ्गा उत्तमा इति अब्रवीत् । नारदेन पूर्ववदुक्ता गङ्गा, नैकनद्याश्रयः वरुणः एव मत्तः (मत्सकाशात्) उत्कृष्टः इति जगाद ।

ततो नारदः वरुणमुपेत्य त्वं धन्यः त्वमाश्चर्यः इति निजगाद । तदा वरुणः, सर्वाश्रया पृथिवी (उमा) मत्तः उत्कृष्टः इति अवोचत् ।

शिव-शेष-गुरुडाः उत्तमाः । इत्यूचे तेभ्योऽपि ब्रह्मा, ततोऽपि वेदाभिमानिनी विष्णुपत्नी उत्तमा चकास्ति ।

'त्वं धन्यः त्वमाश्र्चर्च।' इति नारदोक्ता रमा, अहं वेदाभिमानिनी, वेदादपि तत्फलभूतः यज्ञः, श्रेष्ठः, अतो तदभिमानिनी यज्ञा उत्तमा इत्याबभाषे ।

यज्ञास्वरूपं -

विष्णुवाविष्टा यज्ञनाम्नी तदङ्कः

सोऽपि एवं स्थिता -........

सोचे केशवो इत्युत्तमोक्तं ।

न तत् समश्चाभ्यधिकः कुतः स्यात् ।

ऋषे सत्यं नान्यथेऽपि स्म भूयः ।। (म.ता.नि.२०.७१)

एवं रमया उक्तः नारदः द्वारकायां कृष्णमेत्य त्वं धन्यः त्वमाश्चर्यः इति कृष्णम् अस्तौत् । तदा कृष्णः

न मादृशः कश्चिदस्त्युत्तमो वा ।

इत्येवावादीद् दक्षिणाभिः सहेति

सर्वोत्तमत्वं दक्षिणानां स्मरन् सः ।। (२०.७५)

दक्षिणास्वरूपं भगवतः वामाधरूपा, नाम यस्याः दक्षिणभागे इनः स्वामी परमात्मा स्थितः सा दक्षिणा । सा दक्षिणाभिमानिनी च हरि पूजारूपयज्ञादिषु ऋत्विजां दीयमानगोसुवर्णप्रभृतीनां

अभिमानिनी सती तत्तत्क्रियासु दक्षतां सम्पादयति अस्याः अन्योत्तमत्वं उक्तं ''कृष्णेनाप्रतिमेव भूता अन्योतमत्वं दक्षिणानां च शश्वत् । सेयं भैष्मी दक्षिणा केशवोऽयं तस्याः श्रेष्ठः पश्यत राजसद्याः'' (१.२०.७७) तत्सहितात् जगतः अपि अदिकः अहं सत्यभिप्रायेण कृष्णः दक्षिणाभिः साकम् इति राजमण्डले न्यगदत् ।

रमा-यज्ञा-दक्षिणादयः अभिन्नाः सर्वत्र समा एव विलसन्ति । एवं स्थिते कथं दक्षिणारूपस्य उत्तमत्वं भवितुमर्हतिं । सत्याक्षेपस्य पुज्याः वादिराजश्रीमच्चरणाः -

यथा एकस्यैव राजकुमारस्य मेष-तुरग-गजाख्येषु क्रमेण अधिकस्थानेषु स्थितौ तस्यैव स्थानकृ तनीचोच्चभावोपादिका नीचोच्चता द्रष्टृणां दृशि दृश्यते, अत एव गजराजस्थितं महाराजम् इति परितो नमन्ति, तथा सहापि एको भावः ।

वेदाभिमानिनी साक्षात् सा विष्णोर्दूरवत् स्थिता ।

यज्ञाख्या सैव विष्णोस्तु यातूरुस्थलमाश्रिता

हरिणा रतियोगस्था दक्षिणाऽख्याऽपि सैव तु ।

उत्तरोत्तरतः साऽपि विशिष्टा दक्षिणा सुखे । (भा.ता.नि. ११.१६.१२)

इति वचनात् दक्षिणा अधिकाधिकसुखरूपा कर्म कारयित्वा भक्तानां सुखवहा ।

अपि च इयं दक्षिणा - बहुरूपा अत एव दक्षिणाभिः साकम् इति बहुवचनप्रयोगः । विष्णुपत्नी श्रीरेव, विष्ण्वङ्कस्थिता यज्ञा इति स्तूयते । इयं यज्ञा, यज्ञाख्यविष्णुपत्नी दक्षिणा इति प्रथिता, आकूत्यां रुचिप्रजापतेः आविर्भूता ।

अस्माभिः सर्वाण्यपि कार्याणि विष्णुपूजारूपत्वेन कर्तव्यानि । यावज्जीवं निष्कामविष्णुपूजनं जीवनयज्ञः भवति । ईदृशयज्ञः सदक्षिणाकः एवं सुपूर्णः फलदायको भवति ।

# संस्कृतभाषायाः समभिवृद्धौ महिलानां योगदानम्

– डा. नागरत्ना हेगडे

अक्षरम्, गिरिनगरम्, बेङ्गळूरु-५६००८५

प्रपञ्चे सर्वेषु क्षेत्रेषु नारीणां महत् योगदानं वर्तते । तच्च योगदानं संस्कृतसाहित्येऽपि विद्यते । संस्कृतवाङ्मये आ आदिकालादपि विदुषीणां योगदानम् आसीत्, अपि च ताभिः पुरुषसमानतयैव साहित्यरचना कृता, तस्मिन् क्षेत्रे प्रगतिश्च साधिता ।

आ वैदिककालादपि गार्गी मैत्रेयी च इव स्त्रियः अपि विद्यावत्यः भवन्ति स्म । राजपुत्र्यः विशेषतः काव्यकलासु निपुणाः भवन्ति स्म इत्यत्र बहूनि उदाहरणानि उपलभ्यन्ते । तस्मात् कवयित्र्यः अपि सर्वेषु काव्यप्रकारेष ग्रन्थरचनाद्वारा विख्याताः आसन् । किन्तु बह्वीनां तासां ग्रन्थाः लुप्तप्रायाः वर्तन्ते । संस्कृतकवयित्रीणां साहित्यरचना समृद्धा आसीत् इति सुभाषितसङ्ग्रहात्, शासनादिभ्यः, काव्यमीमांसादिग्रन्थेभ्यः च अवगम्यते । प्राकृतगाथासप्तशतीसुभाषितेषु कानिचन ताभिः कवयित्रीभिः  एव रचितानि ।

राजशेखरस्य पत्नी अवन्तिसुन्दरी विख्याता कवयित्री आसीत्, काव्यलक्षणज्ञा च आसीत् इति तस्याः एव वाग्भिः ज्ञायते । 'काव्यरचनायां लिङ्गभेदः नास्ति । पुरुषाः इव स्त्रियः अपि काव्यरचनायां समानसामर्थ्यं वहन्ति' इति राजशेखरः स्पष्टं घोषयति ।

सुभाषितकारैः उद्धृतानि कवयित्रीणां नामानि कौतुकपूर्णानि वर्तन्ते । यथा - चण्डालविद्या, सरस्वतीकुटुम्बदुहिता, प्रियंवदा, जघनचपला, विकटनितम्बा, मदालसा इत्यादयः । एतासा- ं देशकालविचारः न स्पष्टः । किन्तु तासां पद्यानां रमणीयता तु सहृदयान् आकर्षति ।

शिथिलं जायमानस्य प्रेम्णः अवस्था कथं भवति इति अत्यन्तं रमणीयशैल्या वदति भावदेवी

तथाभूदस्माकं प्रथममविभिन्ना तनुरियं
ततो नु त्वं प्रेयानहमपि हताशा प्रियतमा ।
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं
मयाप्तं प्राणानां कुलिशकठिनानां फलमिदम् ।१

परस्परं प्रेमानुबन्धः अकारणं दैवकृतं च इत्यमुं भावं लक्ष्मीनामिका कवयित्री अर्थान्तरन्यासेन एवं वर्णयति -

भ्रमन् वनान्ते नवमञ्जरीषु न षट्पदो गन्धफलीमजिघ्रत् ।

सा किं न रमया न च किं न रन्ता बलीयसी केवलमीश्वरेच्छा ।।'२

प्राचीनाः संस्कृतकवयित्र्यः -

विज्जिका - संस्कृतकवयित्रीषु अग्रस्थानम् अस्याः एव । महाकविना राजशेखरेण -

सरस्वतीव कार्णाटी विजयाङ्का जयत्यसौ ।

या वैदर्भगिरां वासः कालिदासादनन्तरम् ।।

इति नितरां श्लाघिता । इयं तावत् बादामिचालुक्यचक्रवर्तिनः इम्मडिपुलिकेशिवर्यस्य स्नुषा (क्रि.श.६८०) स्यादिति ऊह्यते । अनया रचितं नाटकं 'कौमुदीमहोत्सवः' । तच्च किञ्चन लघु ऐतिहासिकं नाटकम् । अस्याः दृष्ट्या ब्रह्मा, व्यासः, वाल्मीकिश्च त्रयः एव कवयः । इतरान् कवित्वेन नैव मन्यते सा ।

विज्जिकायाः किञ्चन पद्यं प्रसिद्धम् -

नीलोत्पलदलश्यामां विज्जिकां मामजानता ।

वृथैव दण्डिना प्रोक्ता सर्वशुक्ला सरस्वती ।।

अपि च तस्याः धाष्टर्यं अनेन पद्येन ज्ञायते -

एकोऽभून्नलिनात् ततश्च पुलिनात् वल्मीकतश्चापरः

ते सर्वे कवयः प्रसन्नमतयः तेभ्यो महद्भ्यो नमः ।

अर्वाञ्चो यदि गद्यपद्यरचनाचातुर्यमातन्वते

तेषां मूर्ध्नि दधामि वामचरणं कर्णायराजप्रिया ।।३

गङ्गादेवी -

कर्णाटकराज्यरमारमणस्य विजयनगरस्य बुक्करायस्य स्नुषेयम् । वीरकम्पणरायस्य वीरपत्नी एषा । 'मधुराविजयम्' अनया रचितम् ऐतिहासिकं महाकाव्यम् । तिरुवाङ्कूरु ग्रन्थमालायाम् अस्य काव्यस्य मुद्रणम् अभवत् ।

कवयित्र्याः काव्यरीतेः किञ्चन उदाहरणम् -

कविप्रशंसा —

तार्किका बहवः सन्ति शाब्दिकाश्च सहस्रशः ।

विरलाः कवयो लोके सरलालापपेशलाः ।।

सुभद्रा—

सुभद्रायाः पद्यानि भूयसा न प्राप्यन्ते । यस्याः एकमेव पद्यं वल्लभदेवस्य सुभाषितावल्यां प्राप्यते । तस्याः विषये राजशेखरेण एवम् अभिहितम् -

पार्थस्य हृदये स्थानं लब्धं खलु सुभद्रया ।

कवीनां च वचोवृत्तिचातुर्येण सुभद्रया ।।४ इति ।

तिरुमलाम्बा-

इयमपि विजयनगरराजवंशीया एव । अच्युतदेवरायस्य प्रेयसी (प्रियतमा) इयम् । 'वरदाम्बिकापरिणयः' नामिका चम्पूः अनया रचिता ।

रामभद्राम्बा—

तञ्जावूरु रघुनाथनायकस्य राज्ञी इयम् । १७शतके आसीत् । पत्युः प्रशस्त्यै अनया महाभागया रचितम् ऐतिहासिकं काव्यं 'रघुनाथाभ्युदयः' । रघुनाथनायकः श्रीरामस्य एव अवतारः इति भावयति सा । इतिहारसदृष्ट्या इदं काव्यं नितराम् उपारकम् । रामभद्राम्बा मनसा पतिम् एवं वर्णयति–

अमुष्य सौन्दर्यममुष्य धीरताममुष्य गाम्भीर्यममुष्य वैभवम् ।

अमुष्य वैदुष्यममुष्य वर्तनं फणीश्वरो वा भणितं न हि प्रभुः ।।५ इति ।

रघुनाथनायकस्य आस्थाने मधुरवाणीनामिका काचित् कवयित्री आसीत् । तया १४ सर्गात्मकं प्रसिद्धम् आन्ध्ररामायणं संस्कृतेन अनूदितं वर्तते । तदीयकविताप्रशंसायाः कश्चन प्रकारः अत्र दर्श्यते-

सङ्घ्यावतां सर्वपथीनदीभिः

संशोधिता चेत्कविता कवीनाम् ।

कस्तुरिकाचन्दनकुङ्कुमाद्यै-

रुवर्तिताङ्गी युवतीव दिव्येत् ।। इति ।

मध्यकालीनाः संस्कृतकयित्र्यः —

लक्ष्मीराज्ञी-

लक्ष्मीराज्ञ्याः जन्म मलबारस्य राजवंशे उत्तवलत्तूकुले अभवत् । अस्याः जीवनकालः - १७४५ तः १८०८ पर्यन्तम् । १८०० तमे वर्षे 'सन्तानगोपालनामकं' सर्गत्रयात्मकं खण्डकाव्यं प्रणीतम् अनया । यच्च काव्यं श्रीमद्भागवताधारितं वर्तते । डा. कुञ्जुनिवर्येण अस्याः अपरग्रन्थस्य 'भागवतसंक्षेप'स्यापि उल्लेखः कृतः वर्तते ।

१८शतके सुन्दर्या कमलया च 'विशालभजिकायाः' टीका चमत्कारतरङ्गिणीनाम्ना लिखिता ।

पण्डिता क्षमाराव् -

आधुनिकसंस्कृतविदुषीषु सर्वप्रथमं पण्डितायाः क्षमाराव् - महाभागायाः नाम श्रुतिपथम् आयाति । अस्याः जन्म जुले ४ दिनाङ्के १७८०तमे वर्षे पुणेनगरे जातम् । संस्कृतक्षेत्रे प्रख्यातस्य विदुषः शङ्करपाण्डुरङ्गपण्डितस्य पुत्री इयम् । अनया बाल्ये अतीव कलेश अनुभूतः । पण्डितया क्षमया सौराष्ट्रतः मेट्रिक्परीक्षा उत्तीर्णा ।

कृतयः -

अस्याः स्वातन्त्र्यसङ्ग्रामविषये महाकाव्यं प्रसिद्धम् अस्ति । तदतिरिच्य 'मीरालहरी' 'ग्राम्-ाज्योतिः', शङ्करजीवनाख्यानम्', 'विचित्रपरिषद्यात्रा' इत्यादयः अपि प्रसिद्धाः । आधुनिकत्वं, व्यक्तित्वस्य गरिमा च अस्याः सर्वकृतिषु प्रतिबिम्बितं वर्तते । तदीयमीरालहर्याः कश्चन श्लोकः अत्यन्तं रमणीयः —

> धावल्यं सितनीरजं त्यजति किं पङ्केऽपि नित्यस्थितं
> सौभाग्यं विजहाति किं हिमगिरिश्छन्नस्तुषारैरपि ।
> कान्तिं मुञ्चति किन्नु हीरकमणिर्लोष्टैश्छ सन्दूषितः
> किं चित्रं यदि धर्मतो न चलिता मीरापि तत्तर्जनैः ।।६

लीलराव् - कालः - १८५०

क्षमारावपुत्री इयम् ।

कृतयः —

१. गिरिजायाः प्रतिज्ञा

२. बालविधवा

| | |
|---|---|
| ३. होलिकोत्सवः | ४. क्षणिकविभ्रमः |
| ५. गणेशचतुर्थी | ६. मिथ्याग्रहणम् |
| ७. कटुविपाकः | ८. कपोतलयः |
| ९. वृतशंसिनरछत्रम् | १०. स्वर्णपुरकृषीवलाः |
| ११. अनूपः | १२. क्षमाचरितम् |
| १३. असूयिनी | १४. वीरभाः |
| १५. तुकारामचरितम् | १६. ज्ञानेश्वरचरितम् |
| १७. जयन्तु कुमानीयाः | १८. मीराचरितम् |
| १९. हरिसिंहः | २०. परमभक्तः |
| २१. कृपाणिका | २२. नाट्यचन्द्रिका |
| २३. तुलाचलाधिरोहणम् | २४. शिवाजीराट् |

त्रिवेणी-

१९ शतके अनन्ताचार्यस्य पुत्र्या त्रिवेण्या बहूनि काव्यानि नाटकानि च रचितानि, येन संस्कृतासाहित्यं समृद्धं जातम् । तया 'रङ्गाभ्युदयम्', 'सम्पत्कुमारविजयं' चेति नाटकद्वयं, 'लक्ष्मीसहस्रं', 'रङ्गनाथसहस्रं' चेति स्तोत्रकाव्यद्वयम्, 'रङ्गराजसमुदयं,' 'तत्त्वमुदोदयं' चेति तत्त्वज्ञानपरं नाटकद्वयं च रचितम्, अमितं यशः च अर्जितम् ।७

कामाक्षी-

१९शतके विदुषी कामीक्षी रामचरितनामकं लघुकाव्यम् अरचयत् ।८

२०शतके ९१२२ तमे वर्षे अलमोल्लानाम्न्या विदुष्या बुद्धचरितनामकस्य ग्रन्थस्य रचनापूर्वकं चरितग्रन्थक्षेत्रेऽपि योगदानं विहितम् ।९

नलिनीशुक्ला- १९४०

अनया भावाञ्जलिः, स्वरूपलहरी, प्रकीर्णम्, वाणीशतकम्, निर्झरिणी च रचिताः ।१०

रमाचौधुरी- इयं यतीन्द्रचौधुरीमहाभागस्य पत्नी ।

शङ्करशङ्करः, कविकुलकोकिलम्, कविकुलकमलं, कविकुलकुमुदं, मेघमेदुरमेदिनीयम्, भा-

रततातः, भारताचार्यः, भारतपथिकः, देशदीपः, पल्लीकमलम् एतानि प्रमुखनाटकानि ।।११

न केवलं प्राचीनकाले, मध्यकाले वा, अपि तु आधुनिककालेऽपि कवयित्र्यः ग्रन्थरचनायां नितरां बद्धादराः वर्तन्ते इति अधः प्रदत्तया आवल्या अवगम्यते-

डा. पुष्पा दीक्षित् -

१-७-१९४२ दिनाङ्के जबलपुरनगरस्य प्रख्यातायुर्वेदचिकित्सकात् शास्त्राणां पारदृश्वनः प्राण-ााचार्यसुन्दरलालशुक्लात् जानकीदेव्यां लब्धजनिरियम् आचार्यविश्वनाथत्रिपाठिभ्यो व्याकरणमधीत्य छत्तीसगढप्रदेशशासनस्य महाविद्यालये प्राध्यापिका आसीत् । अनया बहवः ग्रन्थाः रचिताः । सङ्गणकमाध्यमेनापि सूत्राणि बोधयति इयम् ।

१. अष्टाध्यायीसहजबोधः, इडागमः, शीघ्रबोधव्यकारणम्, प्रक्रियानुसारिपाणिनीयधातुपाठः, पाणिनीयधतुपाठः (सार्थ), तिङ्-कृत्-काषः, अग्निशिखा (गीतिकाव्यम्) इत्यादयः बहवः ग्रन्थाः रचिताः ।

२. सम्प्रयोगम् - डा. एस्. आर्. लीला

*****

End Notes :

१. संस्कृतभाषाशास्त्र मत्तु साहित्य चरित्रे पृ.सं.४८५

२ .संस्कृतभाषाशास्त्र मत्तु साहित्य चरित्रे पृ.सं.४८६

३. संस्कृतसाहित्येतिहासः - पृ.सं.७८

४. संस्कृतसाहित्येतिहासः - पृ.सं.७९

५. संस्कृतभाषाशास्त्र मत्तु साहित्य चरित्रे - पृ.सं.४९

६. आधुनिकसंस्कृत साहित्य का इतिहास - पृ.सं.३०६

७. आधुनिकसंस्कृतसाहित्ये स्त्रीणां योगदानम् - डा.मीरा द्विवेदी- पृ.सं.१०२

८. आधुनिकसंस्कृतसाहित्ये स्त्रीणां योगदानम् - डा.मीरा द्विवेदी- पृ.सं.१०२

९. आधुनिकसंस्कृतसाहित्ये स्त्रीणां योगदानम् - डा.मीरा द्विवेदी- पृ.सं.१०३

१०. आधुनिकसंस्कृत साहित्य का इतिहास - पृ.सं.३६१

११. आधुनिकसंस्कृत साहित्य का इतिहास - पृ.सं.४१७

परामृष्टग्रन्थसूची -

१. ज्ञानदीप्तिः - डा. नागरत्ना हेगडे - संस्कृतभारती २००१

२. उतिष्ठत जाग्रत - डा. नागरत्ना हेगडे - राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २००३

३. गोमन्तकम् - डा. नागरत्ना हेगडे - संस्कृतभारती, गोवा, २००६

४. मनः तत्प्रशमनं च - डा. नागरत्ना हेगडे - संस्कृतभारती, नवदेहली, २०११

५. आधुनिकसंस्कृते प्रान्तीयभाषाणां प्रभावः - डा.नागरत्ना हेगडे - बोधायनप्रकाशनम्, बेङ्गळूरु, २०१७

६. रुचिराः बालकथाः - डा. नागरत्ना हेगडे - संस्कृतभारती, बेङ्गळूरु, २०२०

७. रामायणीयम् - डा. नागरत्ना हेगडे - संस्कृतभारती, बेङ्गळूरु, २०२०

८. गौतमबुद्धः - डा. नागरत्ना हेगडे -न्याशनल् बुक् ट्रस्ट्, नवदेहली, २०२०

---------

१. सम्राट् चन्द्रगुप्तः - डा. सरिता कृष्णशास्त्री - संस्कृतभारती, बेङ्गळूरु

२. योगाचार्यः श्री जनार्दनस्वामी - डा. सरिता कृष्णशास्त्री - संस्कृतभारती, बेङ्गळूरु

३. पूर्णाङ्कं प्रति - डा. सरिता कृष्णशास्त्री - संस्कृतभारती, बेङ्गळूरु.

४. वसुदेवः - डा. सरिता कृष्णशास्त्री - संस्कृतभारती, बेङ्गळूरु

५. लोकसङ्ग्रह - डा. सरिता कृष्णशास्त्री - संस्कृतभारती, बेङ्गळूरु.

६. खण्डो बल्लालः - डा. सरिता कृष्णशास्त्री - संस्कृतभारती, बेङ्गळूरु

७. श्री गुरुजी समग्रवाङ्मयम् -(१-७ भागाः)- डा. सरिता कृष्णशास्त्री- संस्कृतभारती, बेङ्गळूरु.

८. डा. केशव बलिराम हेडगेवारः - डा. सरिता कृष्णशास्त्री - थ्ङ्क्षत्रृङळूत्रृ ङत्रैत्रुत्रृ भारतसर्वकारः, नवदेहली ।

९. स्वामी विवेकानन्दः - डा. सरिता कृष्णशास्त्री - केन्दिद्रय साहित्य अकाडेमि, नवदेहली

१०. मनोगतम् - डा. सरिता कृष्णशास्त्री - संस्कृसंवर्धनप्रतिष्ठानम्, नवदेहली

११. परीक्षायोद्धारः - डा. सरिता कृष्णशास्त्री - च-थ्ेक्ुत्रऋइळूत्रु

१३. अगस्त्यः - डा.शान्तला विश्वासः - संस्कृतभारती, बेङ्गळूरु

१४. हे मनः - समाश्वासितु - शान्तला विश्वासः - संस्कृतभारती, बेङ्गळूरु

१५. करुणादेवी - डा. मञ्जूषा चन्ने - संस्कृतभारती, बेङ्गळूरु

१६. अभिशप्तं पुष्पम् - डा. मञ्जूषा चन्ने - संस्कृभारती, बेङ्गळूरु

१७. बाला सरोजिनी - डा. मञ्जूषा चन्ने - संस्कृभारती, बेङ्गळूरु

१८. श्यामस्य माता - मञ्जूषा पण्डरीनाथ कुलकर्णी - संस्कृभारती, बेङ्गळूरु

१९. बालनाट्यवल्लरी - श्रीमती दुर्गा पारखी - संस्कृभारती, बेङ्गळूरु

२०. श्रीमती सुचेता - युगावतारः - संस्कृभारती, बेङ्गळूरु

२१. विरामः आगतः - श्रीमती हेगडे - न्याशनल् बुक् ट्रस्ट्, नवदेहली,

२२. ईदगाहः - श्रीमती श्यामला - न्याशनल् बुक् ट्रस्ट्, नवदेहली

एवं पुरुषकवीनां समरूपेण नारीभिरपि काव्यरचनानैपुण्यं सम्पादितम् । महत् यशः च अर्जितम् ।

न केवलं ग्रन्थरचनाक्षेत्रे, अपि तु सम्प्रति बह्व्यः महिलाः स्वगृहं संस्कृतगृहं कुर्वत्यः, पुत्रान् संस्कृतं पाठयन्त्यः, संस्कृतमातृभाषाभाषिणः बालान् वर्धयन्त्यः, ग्रन्थरचनां च कुर्वत्यः संस्कृतप्रचाराय यन्तते । एतत् महत् योगदानम् । आगामिनि शतके एतासाम् उल्लेखः भवेत इति भाति ।

सन्दर्भग्रन्थाः —

१. आधुनिकसंस्कृतसाहित्य का इतिहास - आचार्य श्रीबलदेव उपाध्यायः

२. संस्कृतभाषाशाख मत्तु साहित्य चरित्रे - डा.के.कृष्णमूर्ति, विद्वान् एन्. रङ्गनाथ शर्मा, डा एच्. के. स्दिगङ्गय्यः

३. आधुनिकसंस्कृतसाह्यि स्त्रीणां योगदानम् - डा.मीरा द्विवेदी

४. संस्कृतसाहित्येतिहासः - अचार्यः रामचन्द्रमिनः

******

# द्वैतवेदान्ते विशेषः

विद्वान् के. श्रीनिधिः

'अस्त्यत्र प्रमेयविषयः शिंशुपा वृक्षविशेषः मा हिंस्यात् सर्वा भूतानि अग्निशोमीयं पशुमालभेत इत्यत्र समान्यविशेषभावः वर्तते' इत्यादौ वैलक्षण्यार्थकः विशेषशब्दः प्रयुक्तः । तथा च भेदाभावेऽपि यत्र भेदव्यवहारादिकार्यं भवति तन्निर्वाहायाचार्यैः भेदप्रतिनिधितया विशेषो नाम पदार्थः अभ्युपगातः । यथा घटरूपयोर्गवाश्वादिवद्विविक्तत्वेन प्रतीयभावादभेदस्तावत्प्रमितः । तथापि 'घटस्यरूपं' इत्याधारादेयभावेन व्यवहारः, रूपे ज्ञातेऽपि कदाचित् घटादीनामज्ञानम्, तद्वाचकयोः शब्दयोः पर्यायताभावः, रूपरसादीनामनेकत्वेऽपि घटस्यानेकत्वाभाव इत्यादिरूपानां घटेन निर्विशेषभेदे सर्वथानुपपद्यमानं रूपादीनां धर्मिणा निर्विशेषभेदं निवारयंस्तेषां घटविषेषत्वं व्यवस्थापयति । रूपादीनां घटेन भेदाभावेऽपि अपर्यायशब्दव्यवहारादिभेदकार्यनिर्वाहाय कश्चन विशेषो नाम पदार्थोऽङ्गीकार्य एवेत्यर्थापत्त्या विशेषस्यातिरिक्तपदार्थत्वं सिध्यति । तदुक्तम्-

१भेदहीने त्वपर्यायशब्दान्तरनियामकः ।

विशेषो नाम कथितः सोऽस्ति वस्तुष्वशेतः' ।। इति ।

एवं प्रत्यक्षमपि विशेषे प्रमाणं भवति ।

तदुक्तमाचार्यैः -

२'उक्त्वा धर्मान्पृथक्त्वस्य निषेधादेवमेव हि ।

विशाषो ज्ञायते श्रुत्या भेदादन्यश्च साक्षित' ।। इति ।

अस्यायमर्थः '३सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म' '४यः सर्वज्ञः (स) सर्ववित्' 'बृहन्तो ह्यस्मिन् गणाः' इत्यादौ असङ्ख्यान् धर्मानस्मिन्नुक्त्वा

'५यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।

एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति ।

'६नेह नानास्ति किञ्चन ।

मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति' ।।

इत्यादिश्रुतिषु भगवति स्वभिन्नधर्माणां 'नानेव' इत्यत्र इवशब्देन भिन्नाभिन्नधर्माण-

ाश्च निषेधातत्तेषां भगवताभेदेऽप्यपर्यायशब्दवाच्यत्वम्, एकत्वानेकत्वादिभेदव्यवहारोऽपि सर्वेषां साक्षीप्रमितः वर्तते । तथा च तादृशश्रुतिसहकृतसाक्षी तेषां धर्माणां ब्रह्मणा सविशेषाभेदं - साधयन्ती भेदाभावेऽपि भेदव्यवहारनिर्वाहकविशेषे प्रमाणं भवति । न च भेदेनैव तादृशव्यवहारे किं विशेषेणेति वाच्यम् । भेदस्योक्तश्रुतिबाधितत्वात् ।

एवं तादृशभेदव्यवहारसहकृतरूपादीनां घटादिना सह गवाश्वादिवद्विवेकेनानुपलभ्यमाना- भेद-ग्राहकप्रत्यक्षमपि विशेषप्रमाणं भवति । न च प्रत्यक्षस्य केवलं धर्मधर्मिणोरभेदसाधकतया कथं विशेषे प्रमाणत्वमिति वाच्यम् । केवलस्य तस्य धर्माणां धर्म्यभेदसाधकत्वेऽपि भेदव्यवहारानु-ग- ृहीतस्य च विशेषसाधकत्वं युक्तमेव । न हि सहकारिणामभावे करणानां या शक्तिः सैव सहकारिसम्- ाविधानेऽपि । प्रत्यक्षस्य संस्कारसहकृतस्य अतीतगोचरत्वादुपपत्तेः ।

एवं सर्वैरप वादिभिः स्वसमयपरिरक्षणार्थं विशेषोऽङ्गीकार्यः । तथाहि- भेदवादिनोऽभेदवादिनो भेदाभेदवादिन इति त्रिविधा प्रसिद्धाः । तत्र भेदवादिनः धर्मधर्मिणोः इहेदमित्यबाधितप्रतीतिबलात् भेदमभ्युपगम्य विशिष्यव्यवहारनिर्वाहाय समवायसम्बन्धिमङ्गीकुर्वन्ति । तैरपि विशेषोऽङ्गीकार्य एव । ते हि घटे रूपमित्याद्यबाधितेहप्रतीतिब्रलात् गुणादीनां गुण्यादिना साकं समवायमकुर्वि- न्त । तद्वदेवेह तन्तुपटयोः समवाय इत्यत्राप्यबाधितेहप्रत्ययसत्वेऽपि समवायतन्तुपटयोः समवाया- न्तराङ्गीकारे ताऽपीहप्रत्ययनिर्वाहाय समवायान्तरमित्यनवस्थाभयात् तयोः सम-वायमनङ्गीकृत्य ततस्वरूपत्वेनैवाङ्गीकुवन्ति । तथाच तन्तुपटसमवायस्य तन्तुपट-स्वरूपत्वेऽपि इह तन्तुपटयोः समवाय इति व्यपदेशभेदनिर्वाहाय समवायस्य तेन सह निर्विशेषाभेदोऽङ्गीकर्तुं न शक्यते । किन्तु तद्विशेषत्वमेव समवायस्य । तस्मात् भेदवादिभिः अवश्यं विशेषोङ्गीकार्य एव ।

न चैवं विशेषेऽपि 'विशेषो द्रव्यगत' इत्यादि तद्गतत्वव्यवहारनिर्वाहाय विशेषद्रव्यगतत्वयोः यावदाश्रयभावित्वेनाभेदाद्विशेष एवाङ्गीकार्यः । तत्रापि तादृाव्यवहारोऽस्तीति तत्रापि विशेषाङ्गीकारे चानवस्थेऽति वाच्यम् । विशेषस्य स्वनिर्वाहकतया द्रव्येऽङ्गीकृतस्यैव तस्य स्वस्मिन्नपि भेदव्यवहा- ानिर्वाहकतया विशेषे विशेषान्तरानङ्गीकारेणानवस्थाभावात् ।

न च गुणगुणिनोः भेदं समवायश्चाङ्गीकृत्य समवाये तद्गतत्वव्यवहारनिर्वाहाय समवायान्तरं नाङ्गीक्रियते । येनानवस्था स्यात् । किन्तु तस्यैव समवायस्य स्वनिर्वाहकतया स्वस्मिन्नपि भेदव्यवहा- रनिर्वाहकत्वं युज्यतेऽपि वाच्यम् ।

स्यादेतदेवं यदि समवायः प्रामाणिकः स्यात् । न चैवम् । समवाये प्रमाणाभावात् । न हि

लौकिकानां भूतलेघटसंयोग इतिवत् कपाले घटसंयोगः वर्ततेऽपि प्रतीतिरस्ति । न चैवं विशेषस्याप्यप्रामाणिकत्वात्तस्यापि स्वनिर्वाहकत्वमनङ्गीकृत्यानवस्ता परिहारो वा इहेदमिति भेदव्यवहारनिर्वाहो वा न युक्त इति वाच्यम् । गुणगुणिनोः अपर्यायशब्दवाच्यत्वान्यथानुपपत्यैव विशेषसिद्धेः ।

न च 'गुणगुण्यादिविषिष्टबुद्धिः सम्बन्धिभिन्नसम्बन्धपूर्विका अबाधितेह प्रत्ययत्वात्' इति प्रम्ााणस्य समवायेऽपि विद्यमानत्वेन स्वस्याप्यनवस्था परिहाराय स्वनिर्वाहकत्वँ युक्तमेवेति वाच्यम् । इह तन्तुपटयोः समवाय इति प्रत्यये सम्बन्धिभिन्नसम्बन्धपूर्वकत्वाभाववत्यबाधितेह-प्रत्ययत्वस्य सत्वेन व्यभिचारात् । न चापर्यायशब्दवाच्यत्वस्यापि घटपटादौ विशेषाभात्रेपि सत्वेन तस्यापि व्यभिचारितत्वेन विशेषासाधकत्वात् विशेषेऽपि प्रमाणाभाव इति वाच्यम् । केवलमपर्यायशब्दवाच्यत्वस्यास्म्ााभिः हेत्वकरणात् । कित्वभिन्नेष्वपर्यायशब्दवाच्यत्वनिवोहायैव विशेषोऽङ्गीक्रियते । घटपटयोस्त्वपर्यायशब्दवाच्यत्वे सत्वेऽप्यभेदाभावान्न व्यभिचारः ।

न च, स्यादेतदेवं यदि गुणगुण्यादिनाभेदः प्रामाणिकः स्यात् । न चैवम् । सर्वत्र घटे रूपमित्यादि भेदव्यवहारेण भेदस्येव सर्वत्र प्रमितत्वेन तेषामभेदस्यैवाभावात् इति वाच्यम् । इह समवायेऽस्तित्वं, समवाये प्रमेयत्वं, ज्ञाने विषयित्वमित्यादावभिन्नेऽपि भेदव्यवहारदर्शनेन भेदव्यवहारस्य भेदासाधकत्वस्य पूर्वमुक्तत्वात् । तस्मात् गवाश्वादिवत् भेदेनानुपलमभात्तत्राभेद एवाङ्गीकार्यः । न च गवाश्वादिवद्विवेकेनानुपलम्बोऽपि नीरक्षीरादिसमानद्रव्याभिघाते सति भेदेऽपि विवेकेनानुप-लम्बात् व्यभिचारीति वाच्यम् । विवेकेन प्रमाणसामान्यानुपलम्भो हि हेतूक्रियते । न च क्षीरनीरयोः केनापि प्रमाणेन विवेकः नोपलब्धः । गुणादीनां गुण्यादिना तु केनापि प्रमाणेन विवकानुपलम्भादभेदेऽपि भेदव्यवहारस्याङ्गीकार्यत्वात्तन्निर्वाहाय विशेषोऽङ्गीकार्य एव ।

अपि च भवद्भिरिहेदमित्यादि भेदव्यवहारनिर्वाहाय गुण्यादिभिः सहाभदोऽङ्गीकृतः समवाये तद्गतत्वास्तित्वप्रमेयत्वादीनामिहेदमिति भेदव्यवहारस्य विद्यमानत्वेऽपि तत्र भेदमनङ्गीकृत्य तेषां तत्स्वरूपविशेषत्वमङ्गीकृत्य भेदव्यवहारनिर्वाहः कृतः । एवं केषुचित् स्थलेषु भेदव्यवहारनिर्वाहाय भेदः समवायश्चोररीकृतः । अन्यत्र तेषां तत्स्वरूपत्वमङ्गीकृत्य विशेषेण भेदनिर्वाहः कृतः । एवं भवद्भिरपि तद्गतत्वाद्यभिन्नधर्मेषु इहेदमिति व्यवहारनिर्वाहायावश्यमङ्गीकार्येण विशेषेणैव गुणादीनामपि द्रव्यविशेषत्वमङ्गीकृत्य भेदव्यवहारनिर्वाहसम्भवे द्वैविद्यकल्पने कल्पनागौरवात् । न च तद्गतत्वादीनां सामवायादिना भेद एवाङ्गीक्रियते, न तु तेषां तदविषत्वमिति वाच्यम् । समवाये विद्यमानां तद्गतत्वादीनां द्रव्यगुणादावन्तर्भावासम्भवेन तेषामतिरिक्तत्वस्यैवाङ्गीकार्यत्वात् स्रप-

त्तपदार्थनियमभङ्गः स्यात् । एवमस्तित्वादिष्वप्यस्तित्वादीनां विद्यमानत्वेन तेषामधिकरणभेदे तेष्व-प्यस्तित्वमस्तीति धर्मसन्तानादनवस्था च स्यात् ।

एतदप्याह भगवान् भाष्यकारः -

'७षट् पदार्थातिरेकः स्यात् पदार्थानियमेऽपि हि ।

धर्मस्य धर्मसन्तानादवस्था स्वनिर्भवेत् ।।' इति ।

अनास्याभयादेव हि तेन गोत्वं सदिति सामान्ये सामान्यव्यवहारसद्भावेऽपि जातिर्नाङ्गीकृता ।

तदुक्तम् -

'८सामान्यस्यापि सामान्यं गुणस्यापि गुणो यतः ।

नाङ्गीकृतः स च यदि नानवस्था क्वचिद्भवेत्' ।। इति ।

तदाह सूत्रकारोऽपि -

'९ओम् समवायाभ्युपगमाच्च साम्यादनवस्थितेः ओम्' इति ।

एवं गुणादीनां गुण्यादिनां ये अभेदमङ्गीकुर्वन्ति । ते तु प्रत्यक्षेण गवाश्वादिवद्विविक्तत्वेनान ुप-लम्भातयोरभेदं भेदव्यवहारनिर्वाहार्थं भेदश्चाङ्गीकुर्वन्ति । तत्र विशेषाभावे च एकत्रैकप्रतियोगि-ाकयोः भेदाभेदयोः कुत्राप्यनुपलम्भात् साङ्कर्यवारणं सर्वथाऽशक्यम् । अन्यथा भेदाभेदवदेव सर्वेषामपि विरुद्धानां पदार्थानामेकत्र सहावस्थानसम्भवेन विरोधवार्तैव लुप्येत । तयोः सहावस्थानस्य प्रम-ाणसिद्धत्वद्विरोधस्य दर्शनमूलत्वेन सहावस्थितत्वेन दृष्टे विरोधो वक्तुं न शक्यते इति चेत् सत्यम्-् । भेदाभेदयोस्तावत् भावाभावरूपत्वेन विरोधः सर्वानुभवसिद्धः । तादृशविरुद्धयोरेकत्राव-स्थानं तन्निर्वाहकविशेषेण विना न सम्भवति । विशेषो ह्यन्यत्र विरुद्धत्वेन दृष्टयोरविरोधः क्वचित्प्रमितः तन्निर्वाहकतयैव धर्मिग्राहकमानेन प्रमितः । यथाभिन्ने भेदव्यवहारोऽन्यत्र विरुद्धत्वेन दृष्टः गुण-गुण्यादिषु प्रमाणसिद्धश्च । तन्निर्वाहो हि विशेषेण भवति ।

नचैवं सर्वत्र विशेषेणैव व्यवहारनिर्वाहे किं भेदेनेति भेदविलयप्रसङ्गः इति वाच्यम् । विशेषो हि भेदप्रतिनिधितया यत्राभेदः प्रमितः तत्र भेदासम्भवेन भेदकार्यनिर्वाहर्थमङ्गीकृतः । सर्वत्र भेदकार्यस्य तेनैव तस्य भेदत्वमेव स्यात् । न तु तत्प्रतिनिधित्वम् । तस्मात् यत्र भेदाभावः प्रमाणसिद्धः भेदकार्यश्च दृश्यते तत्र भेदप्रवेशासम्भवात् भेदप्रतिनिधित्वेन तत्कार्यं विशेषः निर्वहति ।

अत एवायावद्रव्यभाविगुणगुण्यादीनां 'तस्मिन् सत्यप्यसत्वादि'ति हेतुना भेदस्यैव प्रमितत्वेन

तयोरभेदाभावात् तत्र भेदकार्यं भेद एव करोति । न तु विशेष इति न तत्र विशेषोऽङ्गीकार्यः तस्मादेव तर्हि भेदाभेदोऽङ्गीकृतः । एतदप्युक्तमाचार्यैः -

'१०भेदो नाशे भवेत्तथा ।

११सामस्त्योच्छेदिनोऽन्यत्र धर्मा उभयरूपकाः ।

भावे त एव चोच्छेदात्तद्ये च समस्तशः ।।' इति ।

तस्मात् सर्वैरपि वादिभिः स्वसिद्धान्तसंरक्षणार्थं विशेषोऽङ्गीकार्य एव । श्रीवादिराजश्रीचरणैः युक्तिमल्लिकायम् -

यथा हनूमान् गन्धमादनपर्वतमानीय सर्वेषां जीवरक्षणं कृतवान् तद्वत् भगवानाचार्योऽपि विशेषनामकपदार्थं प्रमाणेन तस्मादुक्तमाचार्यैः -

'१२एतादृशे विशेषेऽस्मिन् को द्वेषो वादिनां भवेदि'ति ।।

*****

त्र्श्र णॄ :

१. श्रीमदनुव्याख्यानम् - अ-१, पा-१, श्लो.१०९

२. ऋग्भाष्यम्

३. तैत्तरीयोपनिषत् ब्रह्मवल्ली मं.२

४. मुण्डकोपनिषत् प्र.खा.१, म.९

५. कठोपनिषत् अ.२,व.१, मं.१४

६. कठोपनिषत् अ.२,व.१, मं.११

७. श्रीमदनुव्याख्यानम् - अ.२,पा.२,श्लो.१०६

८. श्रीमदनुव्याख्यानम् - अ.२,पा.२,श्लो.१०७

९. श्रीमदनुव्याख्यानम् - अ.२,पा.२,सू.१३

१०. श्रीमदनुव्याख्यानम् - अ.२,पा.२,श्लो.१०८

११. श्रीमदनुव्याख्यानम् - अ.२,पा.२,श्लो.११२

१२. श्रीमदनुव्याख्यानम् - अ.२,पा.२,श्लो.१०२

# धर्माधर्मयोः अष्टौ प्रमाणानि

-डा. इ.एन्. श्रीनिवासः

धर्मश्चतुर्षु पुरुषार्थेषु प्रथम इति प्रसिद्धमेव । 'अथातो धर्मजिज्ञासा' (जै.सू.१.१.१) इति धर्मजिज्ञासार्थमेव प्रवृत्तं मीमांसाशास्त्रं महर्षिजैमिनिप्रणीतं द्वादशलक्षण्याख्यं विराजते दर्शनलोके । तत्र प्रथमाध्याये धर्मप्रमाणम्, द्वितीये धर्माणां परस्परभेदः, तृतीये किं कर्म कस्य कर्मणोऽङ्गम्-ित्याद्यङ्गाङ्गिभावः, चतुर्थे किं स्वतन्त्रफलसाधनं किं वा कर्मसमृद्ध्यर्थम् इत्यादिक्रत्वर्थपुषार्थविचारः, पञ्चमे कस्य कर्मणोऽनन्तरं किमित्यादि धर्मगतक्रमविशेषविचारः, षष्ठे कस्मिन् धर्मे कोऽधिकारी कोऽनधिकारीत्याद्यधिकारविचारः, सप्तमे धर्मस्य प्रकृतिगतस्य विकृतावतिदेशः सामान्यतः, अष्टमे स एव विशेषतः, नवमे ऊहः, दशमे बाधः, एकादशे तन्त्रं, द्वादशे प्रसङ्गः इत्येवं सर्वेष्वध्यायेषु धर्मकथैव विद्यते । शास्त्रस्य प्रयोजनं तु साङ्गकर्मानुष्ठानद्वारा स्वर्गादिप्राप्तिरेव । तादृशकर्मानुष्ठानार्थं वेदार्थज्ञानम् अपेक्षितम् । तच्च अबाधितम् अप्रामाण्यज्ञानानास्कन्धितं वेदार्थज्ञानं मीमांसाशास्त्रं विना भवतीत्यतः मीमांसाशास्त्रम् अरम्भणीयमेव । 'स्वाध्यायोऽध्येतव्यः' इत्ययं विधिश्च वेदाध्ययनं वेदार्थविचारश्च कर्तव्यमिति बोधयति ।

यागादिरेव१ धर्मः । कलञ्जभक्षणादिरधर्म इति मीमांसाशास्त्रवचनम् । 'चोदनालक्षणोऽर्थो धम्-ाः' (जै.सू. १.१.२) इति धर्मलक्षणम् । वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः (अर्थसङ्ग्रहः) अथवा वेदबोधितेष्टसाधनताको धर्म (मीमांसापरिभाषा) इति तदर्थः । एवं वेदबोधितानिष्टसाधनताकोऽधर्म इति अधर्मस्य लक्षणम् । मानाधीना मेयसिद्धिरिति उक्तरीत्या धर्माधर्मयोः ज्ञानं प्रमाणेन सिद्ध्यति । तत्र प्रमाणानि अष्टौ विधि-मन्त्रनामधेय-अर्थवाद-वाक्यशेष-स्मृति-आचार-सामर्थ्यरूपाणि निरूपितानि विद्यन्ते । तद्यथा-

१. विधिः - अज्ञातार्थज्ञापकः, (प्रमाणान्तरेण अप्राप्तप्रापकः) वेदभागः विधिः । यथा 'दर्शपू-र्णमासाभ्यां स्वर्गकामो यजेत' इति । स्वर्गोद्देशेन दर्शपूर्णमासयागौ विधीयेते । यथा च दध्ना जुहोति इति अग्निहोत्रहोमम् उद्दिश्य दधिरूपगुणो (द्रव्यं) विधीयते । अयमेव धर्मः । 'न कलञ्जं भक्षयेत्' - अत्र कलञ्जभक्षणं निषिध्यते । अयम् अधर्मः ।

२. मन्त्रः — प्रयोगकालीनार्थस्मारको वेदभागः मन्त्रः । दर्शपूर्णमासप्रकरणे 'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि, तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेधा सुमनस्यमानः (तै.ब्रा.३.७.५) इति मन्त्रः पुरोडाशस्थापनार्थं कपालस्य घृतेन लेपनावसरे पठनीयः घृतादिपदार्थं

स्मारयति । अत्र लौकिकोदाहरणं देवपूजावसरे 'प्रणवेन शङ्खमापूर्य' इति मन्त्रः शङ्खं , जलं, ओङ्कारश्च स्मारयति । अयमेव धर्मः ।

३. नामधेयः — नामधेयानां विधेयार्थपरिच्छेदकतया अर्थवत्वम् - यथा 'उद्भिदा यजेत पशुकामः' इति नामधेयवाक्यं पशुकामः उद्भिन्नामकयागं कुर्यात् इति अन्यकर्मापेक्षया उद्भिन्नामकं यागं पृथक्कृत्य दर्शयति । अयमेव धर्मः ।

४. अर्थवादः - प्राशस्त्यनिन्दान्यतरपरं वाक्यम् अर्थवादः । विधेयार्थस्य प्रशंसा/स्तुतिः अथवा निषेधार्थस्य निन्दा यत्र क्रियते स च वेदभागः अर्थवादः इति उच्यते । यथा 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एव एनं भूतिं गमयति' इति अर्थवादः वायव्यं श्वेतमालभेत भूतिकामः' इति विधिना विहितं वायुदेवताकं यागं स्तौति ।

'बर्हिषि रजतं न देयम् इति निषेधवाक्यपूरकतया, 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्वशीयत तद्रजतमभवत्, अश्रुजं हि रजतं, यो बर्हिषि ददाति पुरास्य संवत्सराद् गृहे रुदन्ति ।' इत्ययम् अर्थवादः यागेषु रजतदानं न कुर्यात् इति रजतदानं निन्दति/निषेधति । एवं स्तुतः अर्थः धर्मः, निन्दितोऽर्थश्चाधर्मः ।

५. वाक्यशेषः - विधिगतजटिल/सन्दिग्धविषये परिहारं-सूचयति योऽर्थवादः स वाक्यशेषः । यथा 'अक्ताः२ शर्करा३ उपदधाति' इति अयं विधिः/वैदिकं वाक्यं होमकुण्डनिर्माणावसरे पठितः । यदा होमकुण्डः इष्टकाभिः निर्मीयते, तदा इष्टकाः अन्तरा रन्ध्रा भवन्ति, तत्र कीटादयः न प्रविशेयुः इति उद्देशेन रन्ध्राः / छिद्राः शर्कराभिः स्नेहद्रव्यलिप्ताभिः पूर्यन्ते । अत्र तत् स्नेहद्रव्यं जलं वा तैलं वा घृतं वा उपयोक्तव्यमिति सन्देहे उक्तविधिसन्निधितपठितः 'तेजो वै घृतम्' इति वाक्यशेषः घृतमेव स्नेहद्रव्यत्वेन उपयोक्तव्यमिति स्तुवन् परिहारं सूचयति । अयमेव धर्मः ।

६. स्मृतिः - ऋषयः वेदार्थं सम्यक् अवगम्य जनानाम् उपयोगार्थं वेदार्थं स्मृत्वा सरलया रीत्या ग्रन्थरूपेण लिलिखुः, त एव स्मृतिग्रन्थाः । मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, पराशरस्मृतिः इत्यादयः प्रसिद्धाः स्मृतिग्रन्थाः । अत्र स्मृतिग्रन्थेषु योऽर्थः विहितः स धर्म इति । योऽर्थः निषिद्धः स अधर्म इति परिगण्यः । यथा मातुलकन्यापरिणयः न कार्यः इति स्मृतिवचनम् । अतोऽधर्म इति परिगणनीयः । किन्तु लोके आचारे मातुलकन्यापरिणयः तत्र तत्र दृश्यते । स अधर्म एव ।

७. आचारः - शिष्टानाम् आचारः धर्माधर्मयोः प्रमाणम् । शिष्टाः यद्यदाचरन्ति स धर्मः । ते यन्नाचरन्ति स अधर्मः इति । यथा शिष्टा रात्रिश्राद्धं न आचरन्ति, अतः तत् अधर्म इति निर्णयः

आचारप्रमाणेन ज्ञायते ।

८. सामर्थ्यम् - वस्तूनां तत्तत्कार्यकरणयोग्यता सामर्थ्यम् । यथा यागानुष्ठानावसरे द्रवद्रव्यम् आदातुं स्रुवः, घनद्रव्यम् आदातुं सृक्, मांसादि आदातुं स्वदितिश्च योग्य इति तेषां योग्यतां परिगण्य्य तत्तत्कार्येषु उपयोगः कर्तव्यः । स एव धर्मः । अत्र लौकिकोदाहणरम् चमसेन आचमनं, कलशेन अभिषेकश्च कार्यः न तु तत् वैपरीत्येन । यतो हि चमसस्य आचामनकर्मणि सामर्थ्यं कलशस्य च अभिषेककर्मणि सामर्थ्यम् ।

एतानि धर्माधर्मयोः अष्टौ प्रमाणानि स्थूलतया वेद-स्मृति-आचारेषु संविभवक्तानि ज्ञेयानि । अत्र पूर्वपूर्वप्रमाणम् उत्तरोत्तरप्रमाणापेक्षया प्रबलम् । वेदस्मृत्योः विरोधे सति वेदोक्तमेव आचरेत् । स्मृत्याचारयोः विरोधे सति स्मृत्युक्तमेव अनुतिष्ठेत् । इत्थश्च धर्माधर्मयोः वेदः स्वतन्त्रः सर्वश्रेष्ठः प्रमाणम्, इतरे तु वेदमूलकतया इत्यंशः सुनिष्पन्नः । इदमेवाह मनुरपि - यथा -

वेदः स्मृतिः सदाचाराः स्वस्य च प्रियमात्मनः ।

एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।। इति । (मनुस्मृतिः - २.१२)

*****

ट्रिप्पणी :

१. आदिपदेन दानहोमादयः द्रव्यगुणादयश्च गृह्यन्ते इति श्रीचिन्नस्वामिशास्त्री मीमांसान्यायप्रकाशव्याख्याने सारविवेचिन्याख्ये ।

२.. अक्ताः कृताञ्जनाः अथवा लिप्ताञ्जनाः ।

३. शर्कराः - लोष्टखण्डाः न वालुकाः ।

आकरग्रन्थाः

१. मीमांसापरिभाषा - कर्ता- कृष्णयज्वा, सम्पादकः - गङ्गाधरमिश्रः, प्रकाशकसंस्था - चौखम्बा ओरियण्टालिया, वाराणसि, १९८०

२. अर्थसङ्ग्रहः - कर्ता - लौगाक्षिभास्करः - प्रकाशकसंस्था - चौखम्बा सुरभारती प्रकाशकम्,

वाराणसी -१९८३(मीमांसार्थसङ्ग्रहकौमुदीव्याख्योपेता)

३. आपोदेवीव्यः - कर्ता - आपदेवः, सम्पादकः - महामोपाध्यायवासुदेवशास्त्री अभ्यङ्करः,

प्रकाशकसंस्था - भण्डार्कर ओरियन्टल् रिसर्च इन्स्टिट्यूट् , पुणे, १९७१

४. भाट्टदीपिका - कर्ता - खण्डदेवः , सम्पादकः - एस्. सुब्रह्मण्यशास्त्री.

प्रकाशकसंस्था - श्रीसद्गुरुप्रकाशन, दिल्ली, १९७८

५. प्रकरणपञ्चिका - कर्ता - शालिकनाथमिश्रः (न्यायसिद्धिव्याख्यानोपेता)

प्रकाशकसंस्था- काशीहिन्दुविश्वविद्यालयः, १९६१

६. मीमांसा-उद्धरण-कोशः - सम्पादकः - धन्नलाल जवाहरलाल अग्रवाल

प्रकाशकसंस्था- वैदिकसंशोधनमण्डलम्, पुणे, १९८५

७. मीमांसादर्शनम् - रचयिता - जैमिनिः (शाबरभाष्योपेतम्), सम्पादकः - डा. उम-ाशङ्करशर्मा,

प्रकाशकसंस्था- चौकम्बा सुरभारती प्रकाशकम्, वारणासी, १९८९

*****

# सतीपद्धतिः शास्त्रसम्मता वा ?

- डा. रङ्गनाथकट्टि
निदेशकः (प्रभारी),
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

मृते भर्तरि दशरथे, गतचेतनं राजानं विलोक्य कौसल्या सुमित्रादिभिः नृपवधूभिः साकं, बहुधा विललाप । पश्चात् सकरुणमिदमवादीत् ।

विहाय मां गतो रामो भर्ता च स्वर्गतो मम ।
विपथे सार्थहीनेव नाहं जीवितुमुत्सहे ।। (६६.४)
भर्तारं तं परित्यज्य का स्त्री दैवतमात्मनः ।
इच्छेत् जीवितुमन्यत्र कैकेय्यास्त्यक्तधर्मणः ।। (६६.५)
साऽहमद्यैव दिष्टान्तं गमिष्यामि पतिव्रता ।
इदं शरीरमालिङ्ग्य प्रवेक्ष्यामि हुताशनम् ।। (६६.१२) इति ।

नन्वत्र कौसल्यया 'पतिमालिङ्ग्याहं हुताशनं प्रवेक्ष्यामि' । पत्यनुगमनमेव पतिव्रतास्त्रीणां धर्मः । का वा स्त्री आत्मनः दैवतं भर्तारं परित्यज्य जीवितुमुत्सहेत् ? इत्युक्तम् । एतन्न घटते । 'आत्म-हत्यारूपानुमरणस्य शास्त्रनिषिद्धत्वात् ।

तथा च श्रुतिः— 'तस्मादुह न पुरायुषः प्रेयात्' इति । ईशावास्येऽपि—

'असुर्या नाम ते लोकाः अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चाऽत्महनो जनाः ।।' इति ।

तथा आङ्गिरसस्मृतिरपि—

'या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ।
सा स्वर्गमात्मघातेन नाऽत्मानं न पतिं नयेत् ।।' इति ।

व्याघ्रपादश्च—

'न म्रियेत समं भर्त्रा ब्राह्मणी शोककर्शिता ।
न ब्रह्मगतिमाप्नोति मरणादात्मघातिनी ।।' इति ।

तस्मादात्मघातरूपानुमरणं कथं धर्मो भवेत्, प्रत्युत अवस्थानेनैव स्वर्गादिफलावगम्-ोनाव-स्थानस्यैव युक्तत्वात्, तथा च पराशरः—

‘मृते भर्तरि या नारी ब्रह्मचर्यव्रते स्थिता ।
सा मृता लभते स्वर्गं यथा ते ब्रह्मचारिणः ।।’ इति ।

मनुरपि—

‘आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी ।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ।।
अनेकानि सहस्राणि कौमारब्रह्मचारिणाम् ।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् ।
मृते भर्तारि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता ।
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः ।।’ (५.१५८-१६०) इति ।

आधुनिका अपि हिन्दूसंस्कृतेरनिष्टा पद्धतिरियं सतीपद्धतिरिति अभिप्रयन्ति । अत एव स्वातन्त्र्यसङ्ग्रामे राजाराम्मोहनराय-प्रभृतयोऽस्याः निर्मूलने प्रायतन्त इति इतिहासात् श्रूयते ।

एवं चानुमरणमकृत्वाऽत्रैव स्थीयते चेत् तेन बहुफलं साधयितुं शक्यते । एवं स्थिते बहुफलम्-ावस्थानं विहाय प्रसिद्धमनुमरणं करिष्यामि इति कौसल्यया कथमुक्तम् ? इति शङ्कायां, व्याख्यात्रा त्र्यम्बकरायमखिना एवं समाहितम् -

यद्यपि नियतयाऽवस्थाने बहुफलमस्ति इत्येतत्सत्यमेव । तथाऽपि- ‘अनुगमनेऽपि वैध० यावस्थानिन्दापूर्वकं बहुफलमस्ति’ इति प्रतिपादितम् ।

तथा च सङ्ग्रहे—

‘जीवहीनो यथा देहः क्षणादशुचितां व्रजेत् ।
भर्तृहीना तथा योषित् सुस्नाताऽप्यशुचिः सदा ।
अमङ्गलेभ्यः सर्वेभ्यो विधवा ह्यत्यमङ्गलम् ।
विधवादर्शनात्सिद्धिः काऽपि तात न जायते ।
विधाय मातरं चैकां सर्वमङ्गलवर्जिताम् ।

तदाशिषमपि प्राज्ञ त्यजेदाशीविषोपमम् ।
कन्याविवाहसमये वाचयेयुरिति द्विजाः ।
भर्तुः सहचरी भूयाज्जीवतोऽजीवतोऽपि वा ।।
भर्त्रा सहानुयातव्यो देहावस्था यया सदा ।
चन्द्रमा ज्योत्स्नया तद्वद् विद्युत्वाद् विद्युता यथा ।
अनुव्रजन्ति भर्तारं गृहात्पितृवनं मुदा ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् ।
यमदूताः पलायन्ते सतीमालोक्य दूरतः ।
अपि दुष्कृतकर्माणं समुत्सृज्य च तत्पतिम् ।
न तथा बिभिमो वह्ने न तथा विद्युतो यथा ।
आपतन्तीं समालोक्य वयं दत्ताः पतिव्रताम् ।
तपनस्तपतेऽत्यन्तं दहनोऽपि च दह्यते ।
कम्पन्ते सर्वतेजांसि दृष्ट्वा पातिव्रतं महः ।
यावत्स्वलोमसङ्ख्याऽस्ति तावत्कोट्ययुतानि च ।
भर्त्रा स्वर्गसुखं भुङ्क्ते रममाणा पतिव्रता ।।' इति ।

शङ्खोऽपि —

'मृते भर्तरि या नारी समारोहेद्धुताशनम् ।
साऽरुन्धतीसमाचारात् स्वर्गे लोके महीयते ।।' इति ।

पराशरोऽपि—

'तिस्रः कोट्यर्धकोटीश्च यानि रोमाणि मानुषे ।
तावन्त्यब्दसहस्राणि स्वर्गे लोके महीयते ।।' इति ।

व्यासोऽपि—

'यदि प्रविष्टो नरकं पतिः पापैः सुदारुणैः ।

सम्प्राप्तौ यातनास्थानं गृहीतो यमकिङ्करैः ।।

तिष्ठतो ह्यवशो दीनो वेष्टमाणः स्वकर्मभिः ।

व्यालग्राही यथा व्यालं बलाद् गृह्णात्यशङ्कितः ।

तद्वद्भर्तारमादाय दिवं याति च सा बलात् ।

या भर्तृपरमा नित्यं स्तूयमानाऽप्सरोगणैः ।

क्रीडते पतिना सार्धं यावदिन्द्राश्चतुर्दश ।

ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत् पतिः ।

पुनात्यविधवा नारी तमादाय मृता तु या ।।' इति ।

एवं च उदाहृतशास्त्रबलाद् भर्त्रा सहानुगमनं धर्म एव ।

तथैवाऽचारोऽपि पतिव्रतानाम् ; यथा विष्णुपुराणे—

'रेवती चैव रामस्य देहमाश्लिष्य सत्तम ।

विवेश ज्वलितं वह्निं तत्सङ्गाह्लादशीतलम् ।।' इति ।

तत्रैव स्थलान्तरे जनकतनयामालिङ्गच्य काशीराजतनयानुमरणं कृतवतीति प्रतिपादितम् ।

'ततश्चितिस्थं भूयोऽपि भर्तारं सा शुभेक्षणा ।

अन्वारुरोह विधिवद् यथापूर्वं मुदा पतिम् ।

ततोऽवाप तया सार्धं राजपुत्र्या स पार्थिवः ।

ऐन्द्रानतीत्य वै लोकान् लोकान्कामदुहोऽक्षयान् ।

स्वर्गाक्षयत्वमतुलं दाम्पत्यमतिदुर्लभम् ।

प्राप्तं पुण्यफलप्राप्यं संशुद्धिं तां द्विजोत्तम ।।' इति ।

मौसलपर्वण्यपि—

'श्वोभूते तु ततः शौरिर्वसुदेवः प्रतापवान् ।

त्यक्त्वाऽऽत्मानं महातेजा जगाम गतिमुत्तमाम् ।

तं देवकी च भद्रा च रोहिणी मदिरास्तथा ।

अन्वारोहन्त च तदा भर्तारं योषितां वराः ।।' इति ।

यदुक्तं प्राक् श्रुतिविरोध इति तन्न, आत्महत्यानिषेधपरायाः श्रुतेर्विहितानुमरणव्यतिरिक्तात म-हिंसाविषयत्वात् ; अन्यथा— 'सितासिते सरितो यत्र सङ्गते' इत्यदिश्रुतिविहिततनुत्याग-ोऽपि । 'तस्माद् ये युद्ध्यन्ते प्रधनेषु शूरासः' इति श्रुतिविहितशरीरपरित्यागोऽपि युद्धे न स्यात्, तथा दक्षपश्वालम्भनमपि न स्यात् । तस्य हिंसारूपत्वात् । यदि च निषेधशास्त्रस्य विहितस्य व्यतिरिक्तपरत्वात् प्रयागमरणादिकमुपपन्नमिति तदा प्रकृतेऽपि तुल्यमिति । यदपि चोक्तम् 'या स्त्री ब्राह्मणजातीया' इत्यादिस्मृतिविरोध इति तन्न, तस्याः स्मृतेः ब्राह्मणी पृथक् चितिमारुह्य न गच्छेदित्येतत्परत्वात् ।

तथा च ब्रह्मवैवर्ते— 'पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति' इति । तस्मादनुगम्-ानाव-स्थानयोरुभयोरपि शास्त्रीयत्वाद् विकल्प एव ; अत एव उभयविधाचारोऽपि पतिव्रतानाम् ।

यथा आदिपर्वणि—

'अहं ज्येष्ठा धर्मपत्नी ज्येष्ठधर्मफलं मम ।
अवश्यं भाविनो भावान्मा मां माद्री निवर्तय ।
अन्वेष्यामीह भर्तारमहं प्रेतवशं गतम् ।।'

इति वदन्तीं कुन्तीम्–

'दारकेष्वप्रमत्ता च भवेथाश्च हिता मम ।
अतोऽन्यं न प्रपश्यामि सन्देष्टव्यं हि किञ्चन ।
इत्युक्त्वा तं चिताग्निस्थं धर्मपत्नी नरर्षभ ।
मद्रराजसुता तूर्णमन्वारोहद् यशस्विनी ।।'

इति कुन्त्याः अवस्थानं माद्र्याः सहगमनं च प्रतिपादितम् । तथा मौसलेऽपि—

'इन्द्रप्रस्थे ददौ राज्यं वज्राय परवीरहा ।
वज्रेणाक्रूरदारास्तु वार्यमाणाः प्रवव्रजुः ।
रुक्मिणी त्वथ गान्धारी शल्या हैमवतीत्यपि ।
देवी जाम्बवती चैव विविशुर्जातवेदसम् ।

सत्यभामा तथैवान्या देव्यः कृष्णस्य सम्मताः

वनं प्रविविशू राजंस्तापस्ये धृतनिश्चयाः ।।' इति ।

एवमितिहासपुराणेषु पतिव्रताभिरनुगमनं कृतम् अवस्थितं च इति प्रतिपादनेन उभयविधशास्त्रानुरोधेन च, उभयमपि धर्म्यं तुल्यकल्यं च तुल्यफलत्वात्, तुल्यफलत्वं च ब्रह्मचर्येणावस्थितायाः कुन्त्या अनुगमनं कृतवत्या माद्याश्च पतिसालोक्यप्रतिपादकेन स्वर्गारोहणिके 'पत्नीभ्यां सहितः पाण्डुर्महेन्द्रसदनं ययौ' इति वचनेनावगम्यते । तस्मात् कौसल्योक्तमनुगमनं नानुपपन्नम् । अत एव अवस्थानस्यापि शास्त्रीयत्वात् कौसल्या अनुगमनमकृत्वा स्थितेत्येतदप्युपपन्नमेव ।

*****

# श्रीशतानन्दमुनिविरचितश्रीहरिवाक्यसुधासिन्धौ प्रतिपादितस्य एकान्तिकधर्मस्य विमर्शात्मकाध्ययनम्

**कृष्ण. कोर्ति**
**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीशतानन्दमुनिविरचित-श्रीहरिवाक्यसुधासिन्धुग्रन्थमाश्रित्य एकान्तिकधर्मस्य स्वरूपं विमृष्टम् अस्ति। अत्र जीवस्य कर्मबन्धः, तस्य निवारणे भक्तेः महत्त्वं, तथा च 'को नाम धर्मः' इति जिज्ञासायां साङ्ख्य-वैशेषिक-मीमांसादिदर्शनानां मतानां विमर्शः कृतः। अन्ते च "वेदबोधितश्रेयःसाधनताकत्वं धर्मत्वम्" इति लक्षणं संस्थाप्य, भगवत्प्रीत्यर्थं क्रियमाणः वेदाद्यनुकूलः आचारः एव परमधर्मः इति निर्णीतम् अस्ति।

२. विषय-विवेचनम् (Body of the Article)

श्रीशतानन्दमुनिविरचितश्रीहरिवाक्यसुधासिन्धौ प्रतिपादितस्य एकान्तिकधर्मस्य विमर्शात्मकाध्ययनम्

प्रदीपसिंहाचार्यः

प्रस्तावना

अस्मिन् भागे एकान्तिकधर्मस्वरूपम्, सर्वसामान्यधर्माः प्रवृत्तिधर्मः, निवृत्तिधर्मः, इत्यादिकं यथामति विमृश्यते । तथा शतानन्दमुनिभिः विरचितश्लोकेषु प्रयुक्तानां शब्दानां प्रमेयानां विशेषविवरणं च तत्रतत्र क्रियते ।। प्रमेयाश्चैवं भवन्ति जीवेशजगदादीनां सत्यत्वमिथ्यात्वविचारः, सृष्टिविचारः, सत्वगुण-रजोगुण-तमोगुणानां स्वरूपम्, स्वप्नसत्यत्वादिविचारः इत्यादि ।।

एकान्तिकधर्मविचारः

२३६ तरङ्गे एकान्तिकधर्मविचारः शतानन्दमुनिभिः प्रस्तुतः । तथाहि तद्वचनमित्थं

संगृह्यते ।

“योसौ देहोस्ति जीवस्य कर्माधीनः स वर्तते ।

एकस्थेस्ततो नास्ति निर्धारः तस्य साधवः ।। ४ ।।

क्वचित् सुखी क्वचित् दुःखी स्वतन्त्रोस्ति क्वचिच्च सः ।

परतन्त्रः क्वचिच्चास्ति क्वचिद् गेहे क्वचि वने ।।

एवं सति तु सत्सङ्गवासे नियमपालने ।

नियतत्वं भवेन्नैव तस्य कर्मवशत्वतः ।

एकान्तिकत्वं भक्तस्य तदा सिद्ध्येत् न सर्वथा ।

स्वधर्मज्ञानवैराग्ययुजा भक्त्यैव तद्यतः ।।

प्राधान्ये कर्मणो हीत्थं क्वचित् कालस्य वा सति ।

एकान्तिकत्वं भक्तस्य कथं तिष्ठति सर्वदा ।।” [१]

इत्यादिना प्रश्नः कृतः । तदयं भावः । जीवस्य देहः कर्माधीनः । कर्मणामनन्तत्वात् तदनुसारेण सुखदुःखाद्यवस्था भवति । एवं सति नियमादीन् पालयितुं न शक्यते । तथा च कथं भक्तः कथं एकान्तिको भवेदिति । परिहारस्त्वित्थं भवति । कृष्णेच्छातो अन्यत् प्रारब्धकर्म नास्ति । स्वभक्तैः अतिदृढतया संश्रितः कृष्ण एव स्वाश्रितानां भक्तानां धर्मं ज्ञानं वैराग्यं च देशकालादिवैषम्यादावपि सर्वथा रक्षति । आन्तरे धर्मादिच्युतिर्यथा न स्यात् तथा भक्तिः कृता चेत् सा एकान्तभक्तिः एकान्तधर्मः भवेत् । इत्यादि ।। तथाच धर्मादिच्युतिर्न भवेत् इत्युक्तो धर्मलक्षणजिज्ञासा भवति ।। को नाम धर्म इति ।।

को नाम धर्मः

धर्मलक्षणं हि अनेकधा शास्त्रेषु प्रतिपादितं संगृह्य अन्ततः धर्मस्वरूपनिर्णयः क्रियते ।

महर्षिणा जैमिनिनाऽऽद्यसूत्रेण प्रमाणस्वरूपसाधनफलैः साभासैश्च विचारयिष्यमाणः

सकलः धर्माधर्मप्रमेयरूपः शास्त्रार्थः प्रतिज्ञातः । शास्त्रारम्भमूलं च

"धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।

इतिकर्तव्यताभागं मीमांसा पूरयिष्यति" [२]

इत्युक्त्या - "स्वाध्यायोऽध्येतव्यः" [३] इति अध्ययनविधिरेव । एवं च अथशब्दस्य अध्ययनानन्तरं इत्यर्थः । नन्वेवं तर्हि स्मृतिविरोधः । तत्र अध्ययनानन्तरं न विचारस्य कर्तव्यता प्रतिपाद्यते, किन्तु स्नानम् । "अधीत्य स्नायात्" [४] इति वाक्येन । इति चेत्, उच्यते । विचारे अध्ययनानन्तर्यम् अव्यवधानरूपं विवक्षितम् क्लृप्तदृष्टार्थत्वनिर्वाहाय । अन्यथा अध्ययनानन्तरं समावर्तनानुष्ठाने अध्ययनविधिबोधिताध्ययनस्य अदृष्टार्थत्वं स्यात् । विचारमन्तरेण अर्थज्ञानानुत्पत्तेः । अतः "अधीत्य स्नायात्" इति स्मृतिबाधार्थमेतावत्पर्यन्तमपि तात्पर्यं कल्पनीयम् । वस्तुतस्तु स्मृत्या स्नानोपलक्षित सकल ब्रह्मचारिधर्मनिवृत्तेरध्ययनानन्तर्यं प्रतिपाद्यते न तत्र सर्वांशे बाधः । किन्तु गुरुकुलनिवृत्त्यंश एव स्मृतेर्बाधः । तस्यैव विचारविरोधित्वात् तदुक्तं कुमारिलभट्टैः वार्तिके-

"स्नानोपलक्षिता छात्रनिवृत्तिर्गुरुवेश्मनः ।

विरोधित्वेन बाध्येत न च मध्वादिभक्षणम् ।

तस्मात् गुरुकुले तिष्ठेत् मधुमांसाद्यवर्जयन् ।

जिज्ञासेताविरुद्धत्वात् धर्ममित्यवगम्यते ॥" [५] इति ।

ततश्चायं प्रथमसूत्रार्थः- अथ साङ्गवेदाध्ययनानन्तरम् । यतस्तन्मात्रेण विचारमन्तरा तत्फलं अनुष्ठानोपयोगपरिच्छेदरूपं धर्माधर्मरूपार्थज्ञानं न सम्भवति अतः अध्ययनस्यार्थज्ञानरूप दृष्टप्रयोजनकत्वात् हेतोः, धर्मजिज्ञासा तादृशधर्माधर्मज्ञानाय प्रमाणस्वरूपसाधनफलैः धर्माधर्मविचारः कर्तव्य इति सम्पद्यते ।

इदानीं धर्मपदार्थविचारस्य अवसरः । तत्र विवदन्ते स्वमतसमर्थनैकचतुराः । तथाहि - धर्मो नाम मनसो वृत्तिविशेषः इति साङ्ख्याः । मनसो वृत्तिविशेषस्य मनसा साक्षिणा वा आपरोक्ष्यसम्भवात् तस्य पारोक्ष्यकथनं व्याहन्येत इति साङ्ख्यमतमयुक्तम्

। अत एव चित्तस्य शुभा वासना धर्म इति शक्यवादोऽपि निरस्तः । आर्हतास्तु - कार्यारम्भकान् सूक्ष्मान् मूर्तिमतः पुद्गलान् धर्ममाहुः । पुद्गलशब्दस्यात्रैव व्यवहारः तेषाम् । परन्तु लोके धर्मशब्दप्रयोगो हि पुद्गलादिषु नास्ति । नापि तेषां श्रेयस्साधनताऽवगम्यते । इति लोकवेदविरुद्धत्वात् नेदं युक्तम् ।

वैशेषिकास्तु अपूर्वमेव धर्मः । तच्च पुण्यमेव "धर्मः क्षरति कीर्तनात्" [६] इत्यादौ तथैव व्यवहारदर्शनात् । तत्र धर्मपदस्य पुण्यमेवार्थः । अन्यथा तस्य क्षरणोक्त्ययोगात् इति अभिप्रयन्ति । तथैव मीमांसकैकदेशिनामप्यभिप्रायः । तथा च अपूर्वस्य प्रत्यध्यायं विचाराभावेन न शास्त्रप्रतिज्ञाविषयत्वं धर्मविचारस्य युज्यते इति चेत् , उच्यते- यागादिकर्मकर्तरि अपूर्वज्ञानशून्यैरपि धार्मिकपदप्रयोगाद् धर्मपदस्य यागादिरेवार्थः । "धर्मं चर" [७] इति श्रुतिः, "धर्मस्त्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः । नोत्पादयेत् यदि रतिं श्रम एव हि केवलम्" [८] इति स्मृतिरप्यत्र प्रमाणम् । अपि च-

"इज्याचारदयाहिंसादानस्वाध्यायकर्मणाम्
अयं तु परमो धर्मः यद्योगेनाऽत्मदर्शनम् ॥" [९]

इति स्मृतौ "एषां मध्येऽयं परमो ब्राह्मणः" इत्यत्र षष्ठ्यन्तपदनिर्दिष्टानां ब्राह्मणत्ववत् इज्यादीनामपि धर्मत्वप्रतीतेः यागादेरेव धर्मत्वम् । नन्वेवं यदि इज्यादेरेव धर्मत्वं तर्हि "धर्मः क्षरति कीर्तनात्" इति पुण्ये प्रयोगः कथं युज्यते इति चेत् लक्षणयैव तत्र निर्वाहः । उभयत्र शक्तिकल्पने गौरवात् । लक्षणाबीजं तु - विहितधर्मजन्यत्वमेव । एवं च क्वचित् अपूर्वस्य विचारितत्वेऽपि प्राधान्येन क्रियादिरूपस्यैव धर्मस्य विचारप्रतिज्ञाविषयत्वं, सिद्ध्यति ।

लक्षणप्रमाणाभ्यां हि स्वरूपनिश्चय इति प्रथमं लक्षणं निरूप्यते - "चोदनालक्षणोऽर्थः धर्मः" [१०] इति सूत्रेण। तस्यार्थस्तु अर्थ्यते फलजनकत्वेन प्रार्थ्यते यः सः चोदनाप्रमाणकः धर्मः इति । तथा च चोदनाप्रमाणकेष्टसाधनताको धर्मः इति परिष्कृतं लक्षणम् । तत्र चोदनापदस्य यद्यपि विधिपरत्वं "चोदनेति

क्रियायाः प्रवर्तकं वचनमाहुः” [११] इति भाष्यात्

“क्रियाद्यपेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ । तेन प्रवर्तकं वाक्यं शास्त्रेऽस्मिन् चोदनोच्यते ॥” [१२] इति वार्तिकाच्च । तथाऽपि “वेदोऽखिलो धर्ममूलम्” [१३] इत्यादिस्मृत्या निखिलवेदस्य धर्मप्रमाणत्वावगमात् बृहट्टीकायामपि “चोदनानिर्दिष्टो यः प्रमाणपरिग्रहः सप्रकारः स आद्येन लक्षणेन प्रपञ्चितः” इति कथितत्वात्, वार्तिकेऽपि ।

“सिद्धप्रमाणाभावस्य धर्मे वेदस्य सर्वशः ।

विध्यर्थवादमन्त्राणामुपयोगोऽधुनोच्यते ॥” [१४]

इति निखिलवेदस्य कण्ठतः ग्रहणात् धर्माधर्मलक्षणे वेदस्यैव प्रमाणत्वेन निवेशः सुस्थिर एव । अतः मन्त्रार्थवादादि कल्प्यविधिविधेये वेदप्रमाणकत्वात् धर्मत्वलाभः इति केचिद् वदन्ति ।

पार्थसारथिमिश्रास्तु - जिज्ञासासूत्रे धर्माधर्मविषयप्रमाणमात्रप्रतिज्ञानेऽपि चोदनासूत्रे “चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः” [१५] इति प्रमाणात् विध्युद्देशपरपर्यायसाध्यादिविशिष्टक्रियाप्रतिपादक-पदसमूहात्मकवाक्यपरत्वमेव तादृश्या चोदनाया एव प्रामाण्यमित्येव च नियमः । प्रवर्तकत्वपर्याप्त्यधिकरणमन्त्रार्थवाद नामधेयोपेतविधिवाक्यवाचित्वे कथंचिदर्थवादनिरूपणस्या-द्याध्यायसङ्गतत्वेऽपि तद्बहिर्भूतस्मृत्यादिविचारस्यासङ्गतत्वापत्तेः । न च चोदनातिरिक्तस्यापि प्रमाणस्याग्रे निरूपणेन तवापि चोदनैव प्रमाणमिति नियमव्याकोपः इति वाच्यम् । प्रसङ्गादेव चोदनातिरिक्तानां अर्थवादादीनां वेदभागादीनां स्मृत्यादीनां चाप्रधानभूतानां अपौरुषेय वेदतुल्यत्वात् परिग्रहस्य दृढत्वात् सम्भावितत्वाच्च जिज्ञासितं प्रथमसूत्रप्रतिज्ञातं प्रामाण्यं निरूप्यते उत्तरत्र इति नासङ्गतिः इत्याहुः ।

शम्भुभट्टास्तु विधितात्पर्यविषयीभूतेष्टसाधनताकत्वस्य धर्मलक्षणत्वेऽपि लौकिकचोदनाविषयीभूतेष्टसाधनताकेऽतिव्याप्तिवारणाय अवश्यं वैदिकपदं उपादेयमिति लाघवात् वेदपदमेव केवलमुपादातुमुचितम् । विधिपदेनैव लौकिकचोदनाविषयीभू

तेष्टसाधनताकेऽतिव्याप्तिवारणं सम्भवत्येव । लौकिकिलङादिप्रयोगेऽनधिगतार्थगन्तृ त्वाभावेन विधित्वाभावात् इति वाच्यम् । तथापि मन्त्रार्थवादमूलकेष्टसाधनताकेऽव् याप्तिः । तस्य धर्मलक्षणलक्ष्यत्वात्, तत्र मन्त्रार्थवादादीनामेव प्रमाणत्वात् । अतः तत्साधारण्यलाभाय वेदपदघटितलक्षणमेव कार्यमिति न काऽप्यनुपपत्तिः ।

तथा च "वेदबोधितश्रेयःसाधनताकत्वं" धर्मलक्षणमिति सिद्धम् । अत एव भाट्टरहस्येऽपि वेदपघटितमेव लक्षणमुक्तम् । अत्र वेदबोधितत्वमात्रोक्तौ स्वर्गादिषु अतिव्याप्तिः । अतः श्रेयः साधनताकत्व-निवेशः । तावन्मात्रोक्तौ च अन्नभक्षणादौ तृप्तिसाधनत्वसत्वात् अतिव्याप्तिः इति वेदबोधितत्व-निवेशः । एवं च तृप्तिसाधनत्वस्य लोकत एव अवगमात् नातिव्याप्तिः । वेदबोधितत्वं यदि वेदजन्यबोधविषयत्वं तर्हि हिमनिवृत्तिजनके अग्नौ अतिव्याप्तिः । अतः वेदातिरिक्तप्रमाणेना बोध्यत्वे सति वेदबोध्यत्वम् । वेदातिरिक्तप्रत्यक्षप्रमाणबोध्यत्वात् हिमनिवृत्तिजनकेऽग्नौ नातिव्याप्तिः । नन्वेवं वेदातिरिक्तस्मृति-बोधितेष्टसाधनताकत्वात् धर्मस्य, अव्याप्तिः, इति चेत् , न । स्वातन्त्र्यविशेषणेन तद्दोषपरिहारसम्भवात् । स्वातन्त्र्यं च स्वानुपजीवित्वं बोध्यम् । तथा च वेदातिरिक्तवेदानुप-जीविमानान्तरजन्यप्रतीत्यविषयत्वे सति वेदबोध्यत्वम् । वेदबोधितत्वमिति सिद्धम् ।

आपातप्रतिपन्नेष्टसाधनत्वस्य वेदबोध्यत्वात् तत्रातिव्याप्तिः । तद्वारणाय अबाधितेति प्रतीति विशेषणम् । अत्र वेदपदं न मन्त्रब्राह्मणग्रन्थपरं असम्भवापत्तेः । नापि मन्त्र ब्राह्मणान्तर्गतवाक्यविशेषपरम् । लिङ्गादिकल्प्याश्रुतवाक्यप्रतिपाद्ये धर्मत्वानापत्तेः । अतः तत्पदं अपौरुषेयवाक्यसामान्यपरम् ।

नन्वथापि ब्रह्मण्यतिव्याप्तिः । तस्य जगत्कारणत्वेन श्रेयः साधनत्वात्, तस्य च "यतो वा" [१६] इत्यादिवेदैकगम्यत्वात् इति चेत् न । लक्षणे श्रेयस्त्वावच्छिन्नका र्यतानिरूपितकारणताशिलत्वस्य विवक्षितत्वात् । श्रेयस्त्वस्य ब्रह्मनिरूपितकार्यताव च्छेदकत्वाभावेन उक्तदोषाभावात् । अङ्गेषु धर्मत्वाभावव्यवहारः भाष्ये "को धर्मः कानि साधनानि इति स्वरूपजिज्ञासातः पृथक्साधनजिज्ञासया स्पष्टं प्रतीयते । क्वचिद्धर्मत्वव्यवहारः लाक्षणिक एव । विवाहार्थानृतवदनादिषु यद्यपि विधिः प्रवर्तते

इति तत्र लक्षणसमन्वयः आवश्यकः । तथापि तस्य अभ्यनुज्ञाविधित्वेन तद्विषयस्य लक्षत्वा-सम्मतेः । तत्र निषेधातिक्रमनिमित्तदोषाजनकत्वमात्रं न तु इष्टजनकत्वं इति न तत्रातिप्रसङ्गः ।

"अयं तु परमो धर्मः यद्योगेनात्मदर्शनम्" [१७]

इति प्रमाणमुनुसृत्य "एषामयं परमो ब्राह्मणः" इत्यत्र अब्राह्मणे प्रयोगाभावात् प्रत्युत ब्राह्मणे एव प्रयोगात् तथा आत्मज्ञानस्याधर्मत्वमभिप्रयन्ति शम्भुभट्टाः ।

न च नित्यनैमित्तिकर्मसु धर्मत्वस्याभिप्रेतत्वात् तत्र च फलाश्रवणात् कथं तेषां धर्मलक्षणाक्रान्तत्वमिति वाच्यम् । तत्रापि "पूर्वां सन्ध्यां जपन् तिष्ठन् नैशमेनो व्यपोहति" [१८] इत्यादिस्मृतिभ्यः, "यद्रात्र्यापापमकार्षम्" [१९] इत्यादि श्रुतिभ्यश्च पापक्षयरूप फल कल्पनाया आवश्यकत्वेन उक्तलक्षणसत्वेन धर्मत्वोपपत्तेः । ननु श्येनयागस्य कथं धर्मत्वमिति चेत् विहितत्वादेव धर्मत्वं ब्रूमः । तर्हि कथमधर्मत्वव्यवहारः ? इत्थं - न हि श्येनस्य स्वरूपतः अधर्मत्वं वक्तुं शक्यते विहितत्वात् किन्तु फलस्यैव । तच्च फलं हिंसात्मकाभिचारः एव । तस्य च न हिंस्यादिति निषेधविषयत्वात् निषिद्धस्याधर्मत्वात् । एत एवं फलस्यानर्थत्वमतः तद्वारेणानर्थत्वात् श्येनस्य न धर्मत्वं, नाप्यधर्मत्वं स्वरूपेणानर्थत्वाभावात् फलस्यानर्थानुबन्धित्वात् तद्वारेण श्येनोप्यधर्म इत्युपचर्यते । तथा च श्येनः समीहितस्य शत्रुवधस्य साधनम्, सोऽपि प्रत्यवायस्येत्येषा स्थितिवर्तते । तत्र च इष्टसाधनत्वं सद्भावात् धर्मत्वं भवेदित्यस्य इदमुत्तरं उक्तं भवति श्येनादेः धर्मशब्दार्थत्वं कीदृशमिति लोकानुसारेण सम्प्रदायनिर्णेतव्यं नात्राभिनिवेशः इत्यमेव दर्शयति वार्तिककारोपि-यदि येनेष्टसिद्धिः स्यात् अनुष्टानानुबन्धिनी तस्य धर्मत्वमुच्येत ततः श्येनादि वर्जनं यदातु चोदनागम्यः कार्याकार्यानपेक्षया धर्मः प्रीतिनिमित्तं स्यात्तदा श्येनेति धर्मता । यदि त्वप्रीति हेतुर्यः साक्षाद्व्यवहितोपि वा । सोऽधर्मश्चोदनार्थः स्यात् तदा श्येनेप्यधर्मता । इत्यादिना । एवं च प्रकृतलक्षणस्य लक्ष्यमेव श्येनयागः इति न किञ्चिदनुपपन्नम् । तथा च वेदातिरिक्तवेदानुपजीविमानान्तरजन्यप्रतीत्यविषय त्वविशिष्ट-वेदबोध्यत्वविशिष्टेष्टसाधनताकत्वं धर्मस्य परिष्कृतं लक्षणं भवति ।।

तथा च प्रकृते भगवद्भक्तैः भगवतः प्रेरणया भगवतः प्रीत्यर्थं क्रियमाणाचारः वेदाद्युकूलः वेदपुराणादिविहितश्च धर्म इत्युक्तं भवति ।। सच सर्वसामान्यधर्मः प्रवृत्तिधर्मः निवृत्तिधर्मश्चेत्यादि नानाविधः ।।

३. उपसंहारः (Conclusion)

अनेन प्रकारेण श्रीहरिवाक्यसुधासिन्धौ प्रतिपादितस्य एकान्तिकधर्मस्य विमर्शः कृतः। तत्र साङ्ख्य-वैशेषिक-मीमांसादिमतानां पर्यालोचनया सिद्धं यत् "वेदबोधितश्रेयःसाधनताकत्वं" धर्मस्य लक्षणम्। श्येनयागादीनां विचारेण स्पष्टं यत् विहितकर्मणामपि फलांशे अनर्थहेतुत्वात् अधर्मत्वव्यवहारः भवति, परन्तु स्वरूपतः तेषां धर्मत्वं वर्तते। अन्ते च सिद्धान्तितं यत् भगवद्भक्तैः भगवत्प्रीत्यर्थं क्रियमाणः वेदाद्यनुकूलः आचारः एव परमधर्मः इति।

४. सन्दर्भसूची (References)

[१] हरिवाक्यसुधासिन्धुः - २३६ तरङ्गः (श्लोकाः ४-?)

[२] श्लोकवार्तिकम् - १.१.१ (श्लोकः १५)

[३] तैत्तिरीयारण्यकम् - २.१५

[४] मनुस्मृतिः / स्मृतिवाक्यम्

[५] तन्त्रवार्तिकम् / श्लोकवार्तिकम् (१.१.१)

[६] महानारायणोपनिषद् / मनुस्मृतिः (धर्मः क्षरति...)

[७] तैत्तिरीयोपनिषद् - १.११.१

[८] श्रीमद्भागवतपुराणम् - १.२.८

[९] याज्ञवल्क्यस्मृतिः - १.८

[१०] पूर्वमीमांसासूत्रम् - १.१.२

[११] शाबरभाष्यम् - १.१.२

[१२] श्लोकवार्तिकम् (चोदनासूत्रम्)

[१३] मनुस्मृतिः - २.६

[१४] श्लोकवार्तिकम् (१.१.२)

[१५] श्लोकवार्तिकम्

[१६] तैत्तिरीयोपनिषद् - ३.१

[१७] याज्ञवल्क्यस्मृतिः - १.८

[१८] मनुस्मृतिः - २.१०२

[१९] तैत्तिरीयारण्यकम् - १०.३३ (सन्ध्यामन्त्राः)

५. ग्रन्थसूची (Bibliography)

१. शतानन्दमुनिः. श्रीहरिवाक्यसुधासिन्धुः.

२. जैमिनिः. पूर्वमीमांसासूत्रम्.

३. कुमारिलभट्टः. श्लोकवार्तिकम्.

४. शबरस्वामी. शाबरभाष्यम्.

५. मनुस्मृतिः.

६. याज्ञवल्क्यस्मृतिः.

७. व्यासः. श्रीमद्भागवतपुराणम्.

# शोधप्रबन्धस्य शीर्षकम् - हरिवाक्यसुधासिन्धौ प्रतिपादित-सर्वसामान्यधर्मस्य विमर्शात्मकाध्ययनम्

**वीरसिंह पि.आार्**
**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीहरिवाक्यसुधासिन्धुग्रन्थे वर्णितानां सर्वसामान्यधर्माणां विवेचनं कृतमस्ति। तत्र काशीखण्डे चन्द्रशर्मणा प्रतिज्ञाताः नियमाः, श्रीमद्भागवते प्रह्लाद-नारद-श्रीकृष्णोद्धवसंवादेषु प्रोक्ताः भागवतधर्माः च अत्र सङ्गृहीताः। विशेषतः एकादश्युपवास-नामसंकीर्तन-अर्चापूजन-सर्वभूतहितैषिणतादयः विषयाः अत्र विचारिताः। प्रवृत्त-निवृत्तधर्मयोः भेदः, भगवद्धर्मस्य फलश्रुतिश्च अत्र निरूपिता। एतेषां धर्माणां पालनं सर्वेषां भक्तानां कृते अनिवार्यमिति अत्र प्रतिपादितम्।

२. विषय-विवरणम् (Explanation of the Topic)

अस्मिन् प्रकरणे भक्तानां दैनन्दिनजीवने आचरणीयाः नियमाः वर्णिताः सन्ति। अत्र मुख्यतया त्रयः भागाः सन्ति:

१. भक्तस्य प्रतिज्ञाः: काशीखण्डे चन्द्रशर्मा श्रीकृष्णस्य पुरतः याः प्रतिज्ञाः कृतवान्, ताः अत्र उक्ताः। यथा- एकादश्याः उपवासः, रात्रिजागरणं, तुलसीपूजा, श्रीकृष्णस्य नामसंकीर्तनं, तस्य प्रसादग्रहणम् इत्यादयः। एते नियमाः भक्तस्य कायिक-वाचिक-मानसिकशुद्धये अत्यन्तं उपयुक्ताः।

२. भागवतधर्माः: श्रीमद्भागवतस्य सप्तमस्कन्धे प्रह्लादः नवधाभक्तिं विवृणोति। एकादशस्कन्धे नवयोगिषु अन्यतमौ कविः प्रबुद्धश्च भागवतधर्मस्य लक्षणं वदतः। तत्र सर्वत्र भगवद्दर्शनं, साधुसङ्गः, अमानित्वं, सर्वस्वशरणागतिः च मुख्याः विषयाः। स्वयं श्रीकृष्णः उद्धवम् उपदिशति यत् अर्चाविग्रहे पूजा, मन्दिरसम्मार्जनादि कैङ्कर्यं, तथा च प्रियवस्तुनः समर्पणं भक्तियोगस्य साधनानि सन्ति।

३. प्रवृत्ति-निवृत्तिधर्मौ: यः गृहस्थाश्रमस्थितः सन् भगवदाराधनं करोति सः 'प्रवृत्तधर्मः' तथा यः सर्वं त्यक्त्वा विरक्तः सन् भजति सः 'निवृत्तधर्मः'। उभयत्र कृष्णसम्बन्धः अस्तीति कृत्वा द्वौ अपि 'भगवद्धर्मौ' एव।

३. विषय-विवेचनम् (Body of the Article - Original Text)

हरिवाक्यसुधासिन्धौ प्रतिपादित-सर्वसामान्यधर्मस्य विमर्शात्मकाध्ययनम्

अथ सर्वसामान्यभगवद्धर्माः प्रस्तूयन्ते । ते च श्रीभगवद्धर्मा भगवद्भक्तलक्षणैः व्यञ्जिताः कतिचिन्मुख्या श्रीमद्भागवतादिषु विक्षिप्योक्ताः यत्नादेकत्र सङ्गृह्यन्ते ।

ते चोक्ताः काशीखण्डे द्वारकामाहात्म्ये चन्द्रशर्मणा-

"अद्य प्रभृति कर्तव्यं यन्मया कृष्ण तच्छृणु ।
एकादश्यां न भोक्तव्यं कर्तव्यो जागरः सदा ॥
महोत्सवः प्रकर्तव्यः प्रत्यहपूजनं तव ।
पलार्धेनापि बिद्धं तु भोक्तव्यं वासरान्तरे ॥
त्वत्प्रीत्याष्टौ मया कार्या द्वादश्यो व्रतसंयुता ।
भक्तिर्भागवती कार्या प्राणैरपि धनैरपि ॥
नित्यं नामसहस्रं तु पठनीयं तव प्रियम् ।
पूजा तु तुलसीपत्रैर्मया कार्या सदैव हि ॥
तुलसीकाष्ठासम्भूता माला कार्या सदा मया ।
नृत्यगीतं प्रकर्तव्यं सम्प्राप्ते जागरे तव ॥
तुलसीकाष्ठासम्भूतचन्दनेन विलेपनम् ।
करिष्यामि तवाग्रे च गुणानां तव कीर्तनम् ॥
मथुरायां प्रकर्तव्यं प्रत्यब्दं गमनं मया ।
तत्कथाश्रवणं कार्यं तथा पुस्तकवाचनम् ॥

नित्यं पादोदकं मूर्ध्ना मया धार्यं प्रयत्नतः ।
नैवेद्यभक्षणं चापि करिष्यामि यतव्रतः ॥
निर्माल्यं शिरसा धार्यं त्वदीयं सादरं मया ।
तव दत्त्वा यदिष्टं तु भक्षणीयं मुदा मया ॥
तथा तथा प्रकर्तव्यं तव तुष्टिः प्रजायते ।
सत्यमेतन्मया कृष्ण तवाग्रे परिकीर्तनम् ॥" [१]
सप्तमस्कन्धे श्रीप्रह्लादेन-
"गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च ।
श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् ।
तत्पादाम्बुरुहध्यानात्तल्लिङ्गेक्षार्हणादिभिः ॥
हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ।
इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥" [२]
एकादशे च श्रीकवियोगेश्वरेण-
"ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ।
अञ्जः पुंसामविदुषां विद्धि भागवतान् हि तान् ॥" [३]
तत्रैव प्रबुद्धयोगेश्वरेण-
"सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु ।
दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥
शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम् ।
ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः ॥
सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम् ।
विविक्तचीरवसनं सन्तोषं येन केनचित् ॥

श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ।
मनोवाक्कर्मदण्डं च सत्यं शमदमावपि ॥
श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः ।
जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् ॥
इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् ।
दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम् ॥
एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम् ।
परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥
परस्परानुकथनं पावनं भगवद्यशः
मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥" [४]
श्रीभगवता च-
"मल्लिङ्गमद्भक्तजन दर्शनस्पर्शनार्चनम् ।
परिचर्या स्तुतिः प्रह्व गुणकर्मानुकीर्तनम् ॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ।
सर्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥
मज्जन्मकर्मकथनं मम पर्वानुमोदनम् ।
गीतताण्डववादित्र गोष्ठीभिर्मद्गृहोत्सवः ॥
यात्रा बलिविधानं च सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥
ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ।
उद्यानोपवनाक्रीड पुरमन्दिरकर्मणि ॥
सम्मार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः ।

गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥
अमानित्वमदम्भित्वं कृतस्यापरिकीर्तनम् ।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः ।
तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ॥" [५]
किं च-
"श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनम् ।
परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥
आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् ।
मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥
मद्अर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम् ।
मय्यर्पणं च मनसः सर्वकामविवर्जनम् ॥
मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ।
इष्टं दत्तं हुतं जप्तं मद्अर्थं यद्व्रतं तपः ॥" [६]
अपि चाग्रे-
"कुर्यात्सर्वाणि कर्माणि मद्अर्थं शनकैः स्मरन् ।
मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ॥
देशान् पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् ।
देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥
पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् ।
कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥
मामेव सर्वभूतेषु बहिरन्तरपावृतम् ।

ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥" [७]

इत्यादि सर्वसामान्यधर्माः उक्ताः ।।

प्रवृत्तधर्मः निवृत्तधर्मश्च

प्रवृत्तधर्मनिवृत्तधर्मलक्षणं २४४ तरङ्गे विवृतं श्रीशतानन्दमुनिना । तथाहि –

"जगद्धर्ता धर्म इति तस्य संरक्षणे कृते ।

सर्वस्य जगतोपि स्याद्रक्षणं कृतमेव च ।।

सोपि द्वेधा प्रवृत्तश्च निवृत्तश्चेति वर्तते ।

उभयः कृष्णसम्बन्धात् भगवद्धर्म उच्यते ।।" [८] इति ।।

तथा भागवतेपि अस्य विवरणं एवं विहितम् ।

वर्णाश्रमधर्माः

(अत्र वर्णाश्रमधर्माणां विषये भागवतश्लोकाः अनुसन्धेयाः)

धर्मस्य फलश्रुतिः

हरिवाक्यसुधासिन्धौ २२४ तरङ्गे दुर्गपुरान्त्यप्रकरणे भगवद्धर्ममाहात्म्यं फलश्रुतिश्च विवृता । यथाहि-

"अथ ये भगदवद्भक्ताः तेषामङ्गे उभे मते ।

ज्ञानं प्रीतिश्चेति ते तु कर्तव्ये सुदृढे च तैः ।।

ज्ञानाङ्गं तु भवेद्येषां माहात्म्यातिशयं हरेः ।

विदुस्ते क्षणमपि प्रीत्यङ्गाः स्युर्न तं विना ।।" [९] इति ।।

तथाच भागवतोक्तश्रीभगवद्धर्ममाहात्म्यम् अनेन संगृहीतं भवति । उक्तं च सप्तमस्कन्धे श्रीप्रह्लादेन-

"एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ।

वासुदेवे भगवति यया संलभ्यते रतिः ॥" [१०] इति ।

एकादशे श्रीनारदेन-

"श्रुतोऽनुपठितो ध्यात आदृतो वानुमोदितः

सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि ॥" [११]

तत्रैव श्रीकवियोगेश्वरेण-

"यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् ।

धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥" [१२]

श्रीप्रबुद्धयोगेश्वरेण-

"इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया ।

नारायणपरो मायामञ्जस्तरति दुस्तराम् ॥" [१३] इत्यादि ।।

४. उपसंहारः (Conclusion)

अनेन प्रकारेण 'हरिवाक्यसुधासिन्धु'ग्रन्थे तथा श्रीमद्भागवते वर्णिताः सर्वसामान्यधर्माः विवेचिताः। एते धर्माः न केवलं पूजाविधयः, अपि तु जीवनपद्धतिः एव अस्ति। एकादश्युपवासादिभिः शरीरशुद्धिः, नामसंकीर्तनेन वाक्शुद्धिः, सर्वभूतहितेन मनःशुद्धिः च भवति। प्रवृत्तिमार्गे वा निवृत्तिमार्गे वा स्थित्वा यः कोऽपि एतान् धर्मान् आचरति, सः भगवतः अनुग्रहं प्राप्य दुस्तरां मायां तरति इति सिद्धम्।

५. सन्दर्भसूची (References)

[१] काशीखण्डः (स्कन्दपुराणम्) - द्वारकामाहात्म्यम् (१०.४८५-४९४)

[२] श्रीमद्भागवतम् - ७.७.३०-३२

[३] श्रीमद्भागवतम् - ११.२.३४

[४] श्रीमद्भागवतम् - ११.३.२३-३१

[५] श्रीमद्भागवतम् - ११.११.३४-४१

[६] श्रीमद्भागवतम् - ११.१९.२०-२४

[७] श्रीमद्भागवतम् - ११.२९.९-१२

[८] हरिवाक्यसुधासिन्धुः - २४४ तरङ्गः

[९] हरिवाक्यसुधासिन्धुः - २२४ तरङ्गः (दुर्गपुरान्त्यप्रकरणम्)

[१०] श्रीमद्भागवतम् - ७.७.३३

[११] श्रीमद्भागवतम् - ११.२.१२

[१२] श्रीमद्भागवतम् - ११.२.३५

[१३] श्रीमद्भागवतम् - ११.३.३३

६. ग्रन्थसूची (Bibliography)

१. व्यासः, वेदः. श्रीमद्भागवतपुराणम्.

२. व्यासः, वेदः. स्कन्दपुराणम् (काशीखण्डः).

३. शतानन्दमुनिः. श्रीहरिवाक्यसुधासिन्धुः.

# आत्मज्ञानविमर्शः

**प्रदीपसिंहाचार्यः चतुर्वेदः**
**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे आत्मनः स्वरूपं, तस्य नित्यत्वं, परिमाणं च विचारितम् अस्ति। अत्र इन्द्रिय-मनो-प्राण-ज्ञानात्मवादाः, तथा च बौद्ध-चार्वाक-जैन-नैयायिकमतानां निरासः कृतः। आत्मनः देहादिव्यतिरिक्तत्वं, नित्यत्वं, अणुपरिमाणत्वं च शास्त्रप्रमाणैः, युक्तिभिश्च स्थापितम्। बद्धदशायां धर्मभूतज्ञानस्य सङ्कोचः, मुक्तदशायां च विकासः भवतीति सिद्धान्तः अत्र प्रतिपादितः।

२. विषय-विवेचनम् (Body of the Article)

आत्मज्ञानविमर्शः

राघवेन्द्राचार्यः, मैसूरु

आत्मज्ञानस्य आवश्यकता

आत्मज्ञानं तु आवश्यकमेव। यद्विना न किमपि कर्तुं शक्यते । आत्मा तु जीवो वा ईश्वरो वा इन्द्रियाणि वा मनो वा प्राणो वा इत्यादि सन्दिह्यते । अतः कोऽयमात्मशब्दवाच्य इति प्रथमं जिज्ञासेत् । ततः तत्र विशेषविमर्शः सम्भवति । तथाच प्रथमं आत्मविषये नैकवादाः संगृह्यन्ते । तद्विमर्शश्च क्रियते ।

इन्द्रियात्मवादनिरासः

इन्द्रियाण्येवात्मा इति केषाञ्चिन्मतम् । तथा हि घटादिप्रत्यक्षं रूपादिगुण-प्रत्यक्षं चक्षुरादीन्द्रिये सति जायते, तदभावे न जायते इत्यन्वयव्यतिरेकाभ्यां चक्षुरादिवृत्तित्वमेव ज्ञानस्योचितम् । चक्षुः पश्यति, स्पर्शनसुखो वायुः, कटु शब्दः इत्यादि व्यवहारोऽप्यस्ति । इन्द्रियेषु च विकलेषु विकलोऽहमिति बुद्धिर्जायते । अतः इन्द्रियाण्येवात्मा इति वादः प्रतितिष्ठते । तन्न समीचीनम्, घटादिज्ञानं प्रति

चक्षुरादीनामिन्द्रियाणाम् अन्वय-व्यतिरेकानुविधानं तत्करणत्वेनाप्युपपद्यते । तथा च चक्षुषा घटं पश्यामि इति सम्प्रतिपन्नः मुख्यो व्यवहारः, चक्षुः पश्यतीति तु लाक्षणिकः । अपि च चक्षुषा विकलोऽहमित्येव वैकल्यानुसन्धानम्, न तु चक्षुरहं नास्मीति । नष्टस्येन्द्रियस्य स्ववैकल्यानुसन्धानायोगात्, उदरस्थकृम्यादीनामपि एकशरीरानुप्रवेशस्य समानत्वात् तेषामपि इतरानुभूतार्थप्रतिसन्धानापत्तेः । अपि च चक्षुरादीनां रूपादिप्रतिनियतविषयग्राहकत्वात् सर्वेषां प्रतिसन्धातृत्वेन योऽहं रूपादिद्रष्टा स एव शब्दं शृणोमीत्यादि प्रत्यभिज्ञाविषयः भवतीत्यत इन्द्रियव्यतिरिक्तात्मा अङ्गीकर्तव्यः । देहात्मवादे प्रत्येकसङ्घात-भेदेन विकल्प्य ये दोषा उक्ताः ते सर्वे समानाः इति विभावनीयम् ।

मनोऽपि नात्मा

मनसः एकत्वेन रूपादिसकलप्रतिसन्धानमुपपद्यते, निरवयवत्वेन असङ्घातरूपत्वात् प्रत्येकसङ्घातादिविकल्पानवकाशात् न पूर्वोक्तदोषगन्धः । मम मनः इति व्यतिरेकप्रत्ययस्तु राहोः शिर इतिवदभेदेऽपि सम्भवति, मनोव्यतिरिक्तात्मकल्पने च गौरवम्, अतः अहमर्थः मन एवेति केचिदभिप्रयन्ति । अत्रोच्यते रूपज्ञानाधिकरणतया यथा चक्षुरादीन्द्रियसिद्धिः तद्वत् मनसोऽपि घटादिस्मरणं करणसाध्यं क्रियात्वादित्यनुमानेन स्मृतिकरणतया आत्मभिन्नतया च सिद्धिर्भवति । आत्मा तु ज्ञानाश्रयत्वेन प्रत्यक्षसिद्धः, करणस्य च कर्तृभिन्नतया सर्वत्रोपलम्भात् ज्ञानक्रियाकर्तृत्वरूपज्ञातृत्वं मनसो दुर्घटमेवेति न मन आत्मा भवति ।

प्राणोऽपि नात्मा

"प्राणोऽस्मि प्रज्ञात्मा" [१] इति आत्मशब्दस्य प्राणे "प्राणो ह पिता" [२] इति श्रुतौ प्राणशब्दस्य आत्मनि प्रयोगो दृश्यते । प्राणे सति जीवति, असति च म्रियत इति व्यवहारश्च सर्वैरङ्गीक्रियते, देहेन्द्रियमनसां च प्रवृत्तिः प्राणाधीना, अतः प्राण एव आत्मा इति केचित् ब्रुवन्ति । तदप्ययुक्तम् । प्राणानां वायुसङ्घातत्वेन सम्प्रतिपन्नत्वात् शरीरं यथा सङ्घातत्वादचेतनं तथा प्राणाः अपि न चेतयन्ते । प्राणोऽस्मीति

श्रुतिः प्राणविशिष्टार्थिका, देहेन्द्रियमनसां च प्रवृत्तिः प्राणविशिष्टात्माधीनैव न तु प्राणमात्राधीना । मम प्राणाः इति विवेकप्रत्ययेन तयोः भेदश्च स्पष्टः ।

ज्ञानात्मवादनिरासः

चार्वाकैकदेशिनस्तु ज्ञानशून्यदशायां भोगाभावेन ज्ञानसन्ततेरेव भोक्तृत्वम् । यस्य भोक्तृत्वं तस्यैवात्मत्वमिति व्याप्त्या ज्ञानस्यैवात्मत्वं प्रतिपादयन्ति । किन्तु भोक्तृत्वं नाम अनुभवितृत्वविशेषः । स च ज्ञानमात्रस्य न सम्भवति, अतः ज्ञानाश्रयः कश्चिदात्मा ज्ञानव्यतिरिक्तः वर्तत एव ।

बौद्धमतनिरासः

बौद्धास्तु आलयविज्ञानं प्रवृत्तिविज्ञानं चेति काल्पनिकं ज्ञानभेदमङ्गीकृत्य आलयविज्ञाने ज्ञातृत्वमभ्युपयन्ति । तदेतत् बौद्धचार्वाकैकदेशिमतमपि निराक्रियते । सर्वस्यापि वस्तुनः व्यवस्था ज्ञानाधीनैव, अहं जानामीति प्रत्यक्षे क्रियात्मकस्यैव ज्ञानस्य ज्ञानरूपकर्तृधर्मतया भानात् ज्ञानं नात्मा । अतः धीसन्ततिरेव आत्मा इति वदतां चार्वाकमतं न सम्मतम् ।

अथ च सर्वं क्षणिकमिति वदतः बौद्धस्य ज्ञानस्यापि क्षणिकत्वात् तन्मते योऽहमद्राक्षं स एवाहं स्पृशामीति प्रत्यभिज्ञया आत्मनः प्रतिसन्धानानुपपत्तिः । अतः ज्ञानव्यतिरिक्तः नित्यो ज्ञाता कश्चित् वर्तत एव ।

आत्मनोऽनित्यत्वविचारः

आत्मानित्यत्ववादिनः चत्वारः । तेषु बौद्धा ज्ञानात्मवादिनः । सर्वस्यापि पदार्थस्य क्षणिकत्वादेकस्मिन्नेव शरीरे आत्मनानात्वं वदन्ति । प्राणेन्द्रियात्मवादिनःशरीरं यावत्तिष्ठति तावदात्मा तिष्ठतीति वदन्ति । अन्ये केचन मोक्षावधिरात्मा तिष्ठतीति वदन्ति, पौराणिकैकदेशिनः प्रळयान्तमात्मा वर्तते तदनु नश्यतीत्यभिप्रयन्ति ।

आत्मनोऽनित्यत्वनिरासः

तत्र प्रथमपक्षे आत्मनः क्षणिकत्वे भाविदृष्टफलमुद्दिश्य न कश्चित्प्रवर्तेत । फलकाले स्वस्यैवाभावात् । द्वितीये “ज्योतिष्टोमेन स्वर्गकामो यजेत” [३] इत्यादि

वेदविहितयागदानादिषु न कोऽपि प्रवर्तेत । मरणानन्तरं स्वर्गसुखं भवतीति खलु तत्र प्रवर्तन्ते, मरणानन्तरं देहेन सहैव यद्यात्मा नश्यति तर्हि कथं स्वर्गसुखभोगः इति वैदिककर्मस्वेव नानुषज्जन्ते । प्रळयान्तमात्मा वर्तते इति तृतीये पक्षे सर्वदुःखनिवृत्तिसहितचेतननाश एव यदि मोक्षः तर्हि संसारेणैवालं किमिति मोक्षः क्लेशसाध्यः ? आत्मनाशस्य अनिष्टत्वेनापुरुषार्थत्वात्तदुपायं न कश्चिदपि शृणुयादित्यादि दोषाः सम्भवन्ति । मोक्षावधिरात्मावतिष्ठतीति चतुर्थपक्षोऽपि न सङ्गच्छते । यतः "स तत्र पर्येति जक्षन् क्रीडन्" [४] इति हि मोक्षे भोगश्रुतेः नेदमपि सङ्गतं भवति इत्येवमिन्द्रियादिव्यतिरिक्तः नित्यः आत्मा सिद्ध्यति ।

यो यद्भोगायतनवर्ती स तत्समपरिमाणः इति व्याप्त्या आत्मा देहानुरूपपरिमाणवान्, अत एव पादे मे वेदना, शिरसि मे सुखमिति प्रतीतिः सङ्गच्छत इति ।

आत्मपरिमाणविषये जैनमतनिरासः

जैनाः देहपरिमाणानुरूपमात्मपरिमाणं वदन्ति । तन्न, यदुक्तमात्मनः देहपरिमाणसमपरिमाणं तन्नावश्यकम् । गृहादिस्थपुरुषवत् । अतः यो यद्भोगायतनवर्ती स तत्समपरिमाण इति नियमस्य व्यभिचरितत्वात्, न तया व्याप्त्या देहपरिमाणवत्वं वक्तुं शक्यम् । किञ्च मध्यमपरिमाणवत्वे घटादिवदनित्यत्वापत्तिः । सौभर्यादिवत् नानादेहस्थयोगिनाम्, देहभेदेन आत्मभेदश्च स्यात् । मुक्तौ देहपरित्यागाङ्गीकारमते देहप्रयुक्त-परिमाणस्याप्यभावः प्रसज्येत । परिमाणाभावे च अस्तित्वरूपद्रव्यत्वमेव न स्यात् । अपरिमितस्याप्यात्मनो द्रव्यत्वे विभुत्वमेव स्यात् । विभुरेव भवतु को दोष इत्युक्तिः जैनानां भवतां मते न घटत एव । यतः नित्यमूर्ध्वगमनरूप-मुक्तेरुक्तत्वात् ।

आत्मपरिमाणविषये नैयायिकमतनिरासः

नैयायिकाः पादे मे वेदना, शिरसि मे सुखमित्यादिप्रतीतिसद्भावाद्देहे सर्वत्र सुखाद्युपलम्भाच्च विभुत्वमेवात्मनोङ्गीक्रियते इति वदन्ति । तथा हि अणुत्वे च तत्तत्प्रदेशावच्छेदेन शरीरस्य आत्मनश्च उभयोरपि गतिः कल्पनीया भवति । विभुत्वे तु देहगतिमात्रस्य कल्पनमिति लाघवम् । एवमुक्ते विभोर्जीवस्य सर्वशरीरैः सह

सम्बन्धादेकस्य यदा सुखोपलब्धिः तस्यैव सुखस्य तदैवान्यस्याप्युपलब्धिप्रसङ्ग इति चेन्न । यच्छरीरं यददृष्टोपार्जितं तत्तस्य भोगायतनमितिव्याप्त्या सर्वेषां सर्वशरीरसम्बन्धे सत्यपि न सर्वत्र एकभोग-प्रसक्तिः । अपि च सौभर्यादिषु एकस्य जीवस्य अनेकशरीराधिष्ठातृत्वं च अणुत्वे नोपपद्यते । अथ च "नित्यः सर्वगतः" [५] इति श्रुतौ सर्वगतत्वोक्त्या जीवः विभुरेवेति वदन्ति । अत्रोच्यते जीवविभुत्वे उत्क्रान्तिगत्यादयः नोपपद्यन्ते । "एषोऽणुरात्मा" [६] इत्याद्याः बह्व्यः श्रुतयः सन्ति, श्रुतौ च जीवस्याणुत्वं गत्यागती च स्पष्टमभिहिते । अतो न विभुरात्मा नित्यः सर्वगतः इति श्रुतिः अतिसूक्ष्मतया सर्वत्र प्रवेष्टुं योग्या इत्यर्थपरा अतः न विभुरात्मा ।

आत्मनोऽणुपरिमाणत्वसमर्थनम्

आत्मनः अणुत्वेऽपि सौभर्यादिषु युगपदनेकशरीराधिष्ठातृत्वं स्वधर्मभूतज्ञानव्याप्त्या उपपद्यते । तथा च अणुः चेतनो जीवः अहमिति प्रतीतिसिद्धः स्वयंप्रकाशः नित्यः नाना च, धर्मभूतज्ञानस्य शास्त्रप्रमाणेन कर्मकृतसङ्कोचा-भ्युपगमात् बद्धदशायां सङ्कुचितत्वं, अत एव अल्पविषयकत्वम्, मुक्तदशायां कर्माभावाद्विकसितत्वात्सर्वविषयकत्वम् ।

३. उपसंहारः (Conclusion)

अनेन प्रकारेण आत्मनः स्वरूपविषये विविधवादानां विमर्शः कृतः। इन्द्रिय-मनो-प्राण-ज्ञानात्मवादाः, तथा बौद्ध-चार्वाक-जैन-नैयायिकमतानि च युक्तिभिः निराकृतानि। अन्ते च सिद्धान्तितं यत् आत्मा इन्द्रियादिव्यतिरिक्तः, नित्यः, अणुपरिमाणः, स्वयंप्रकाशः, ज्ञाता च अस्ति।

४. सन्दर्भसूची (References)

[१] कौषीतकि-उपनिषद् - ३.३

[२] छान्दोग्योपनिषद् - ७.१५.१

[३] आपस्तम्बश्रौतसूत्रम् / मीमांसान्यायः

[४] छान्दोग्योपनिषद् - ८.१२.३

[५] श्वेताश्वतरोपनिषद् - ६.१७ (अथवा सर्वगतः स्थाणुः - गीता २.२४)

[६] मुण्डकोपनिषद् - ३.१.९

५. ग्रन्थसूची (Bibliography)


१. कौषीतकि-उपनिषद्.

२. छान्दोग्योपनिषद्.

३. मुण्डकोपनिषद्.

४. ब्रह्मसूत्रशाङ्करभाष्यम्.

५. न्यायसूत्रम्.

६. सर्वदर्शनसङ्ग्रहः.

# एकजीववादनिरासः

**योगीन्द्र गणाचारि**
**शोधविद्यार्थी**
**कर्नाटक -संस्कृत-विश्वविद्यालयः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे अद्वैतवेदान्तोक्तस्य 'एकजीववादस्य' विस्तृतं खण्डनं कृतम् अस्ति। कैवल्योपनिषदि प्रस्तुतस्य एकजीववादस्य स्वरूपं प्रदर्श्य, हरिवाक्यसुधासिन्धुग्रन्थे त्रयोदशतरङ्गे शतानन्दमुनिभिः कृतेन निराकरणेन सह तुलना कृता। अत्र एकजीववादे बद्धमुक्तव्यवस्थायोगात्, गुरुशिष्यसम्बन्धानुपपत्तेः, श्रुतिस्मृतिविरोधात् च अनेकदोषप्रसङ्गः प्रदर्शितः। ततः विशिष्टाद्वैतदृष्ट्या जीवस्य अणुत्वं, नित्यत्वं, बहुत्वं च सप्रमाणं स्थापितम्। अन्ते च संसारिणां द्वैविध्यं, नित्यसंसारिणां विचारः, जीवस्य बन्धमोक्षहेतवश्च विवेचिताः।

२. विषय-विवेचनम् (Body of the Article)

एकजीववादनिरासः

“स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् ।

स्त्रियान्नपानादिविचित्रभोगैः स एव जाग्रत्परितुष्टिमेति ॥” [१]

इत्यादि कैवल्योपनिषदि एकजीववादः प्रस्तुतः । तथाहि- “एकमेवाद्वितीयम्” [२] इत्याद्युक्तश्रुतिभ्योऽद्वितीयचिन्मात्रो ह्यात्मा । स चात्मन्यविद्यया गुणमयीं मायां तद्वैषम्यजां कार्यसहितां च कल्पयन्नस्मदर्थमेकं युष्मदर्थांश्च बहून् कल्पयति । तत्रास्मदर्थः स्वस्वरूपः पुरुषः । युष्मदर्थश्च महदादीनि भूम्यन्तानि जडानि । स्वतुल्यानि पुरुषान्तराणि, सर्वेश्वराख्यः पुरुषविशेषश्चेत्येवं त्रिविधः । “जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति” [३] इति श्रुत्यन्तराच्च । गुणयोगादेव कर्तृत्वभोक्तृत्वे तत्रात्मन्यध्यस्ते । यथा स्वप्ने कश्चिद् राजधानीं राजानं

तत्प्रजाश्च कल्पयति, तन्नियम्यमात्मानं च मन्यते, तद्वत् जाते च ज्ञाने, जागरे च सति, ततोऽन्यन् न किञ्चिदस्तीति चिन्मात्रमेकमात्मास्त्विति । तमिमं वादं निराकर्तुमाह सिन्धुकारः त्रयोदशतरङ्गे ५ श्लोके

"एकैकोस्ति प्रति वपुः जीवो वानेक ईश्वरः ।

एक उच्येत चेत् प्लक्षवटादौ तद्विरुध्यते ।

छिन्नप्लक्षादिशाखानामन्यत्रारोपणे पुनः" [४] इत्यादिना ।

तथाच अनेन प्रसंगेन एकजीववादनिराकरणं कृतमित्यवगम्यते । तद्यथा । "एकमेव च शरीरं सजीवमन्यानि तु स्वाप्नशरीरवन्निर्जीवानि। कृत्स्नं च जगत्तदज्ञानकल्पितम्। बद्धमुक्तव्यवस्था तु नास्त्येव। जीवस्यैकत्वात्। गुरुशिष्यादिव्यवस्था तु यावदविद्यं स्वप्नवद्युक्ता। निवृत्तायां तु तस्यां नास्त्येव" इति। तन्न। तस्मिन्नेकस्मिन् जीवे सुप्ते जगदप्रतीत्यापातात्। दृष्टिसृष्टिपक्षे तस्य सुषुप्तावुद्बोधकस्य संस्कारदेरप्यभावेन पुनरुद्बोधायोगाच्च। मम कल्पकत्वे तव मोक्षार्थं प्रवृत्त्ययोगेन तवैव कल्पकत्वे वाच्येऽस्मदादिबोधार्थं तव शब्दप्रयोगरूपस्वक्रियाविरोधाच्च। परमार्थतो मया नोच्यत इति चेन्न। व्यवहारत उक्तावपि मूकोऽहमित्यादाविव स्वक्रियाविरोधात्।

न च स्वाप्नपुरुषवत् त्वत्कल्पितत्वादहं न पर्यनुयोज्य इति वाच्यम्। अपर्यनुयोज्यत्वे निर्मर्यादतया कथानधिकारापातात्। सजीवशरीर इवान्यत्रापि प्रतिशरीरमहं दुःखी अहं संसारी अहमस्वाप्समिति संसाराद्याधारजीवात्मानुभवाच्च। न चेयं धीभ्रान्तित्वादेव निर्जीवेष्वेव शरीरेषु युक्ता। तेषामयं दुःखीत्यादिभ्रान्तिविषय त्वेऽप्यहं दुःखीत्यादिभ्रान्त्याधारत्वायोगात्। न हि स्वाप्नादिशरीराणि तथा भ्राम्यन्ति। न चेयं धीः सर्वदेहानुगतचिन्मात्रस्यैव न तु जीवस्येति युक्तम्। प्रतिबिम्बरूपे जीवे एव तदौचित्यात्।

ननु जीवो न ब्रह्मप्रतिबिम्बादिः, किं तु कौन्तेयस्यैव राधेयत्ववत् ब्रह्मण एव जीवत्वं तच्च सर्वदेहगतमिति चेत्, कथं तर्हि शरीरान्तराणां निर्जीवत्वम्। वक्ष्यते च कल्पितेनापि संसारेण कदाऽप्यस्पृष्टचैतन्याभावे नित्यमुक्तत्वश्रुतिविरोधः। नापीयं धीः

कल्पकजीवकल्पितजीवान्तरस्य। कल्पितस्य भ्रान्त्याधारत्वायोगात्। अन्यथा अज्ञानभ्रान्तिसम्यग्ज्ञानमोक्षाणामैकाधिकरण्यनियमेन बहुजीववादः स्यात्। कल्पितस्य जीवस्य कल्पकं प्रति प्रत्यक्त्वायोगाच्च। अप्रत्यक्त्वेन भासमाने च प्रत्यक्त्वारोपायोगात्। अन्यस्य च प्रत्यक्त्वेनानुभवितुश्चेतनस्याभावात्। तथानुभवापलापे च तस्याप्येकस्य जीवस्याद्वैतश्रुतेश्चासिद्धेः।

ननु चोक्ता दोषा एकशरीरकैकजीववादे, न त्वनेकशरीरकैकजीववादे, तस्य सर्वत्रापि सत्त्वादिति चेन्न। तथात्वेऽननुसन्धाने तन्त्रस्य व्यावहारिकजीवभेदस्याप्यभावेन योगिनोऽनेकशरीरेष्विव तस्य सर्वशरीरगतदुःखाद्यनुसन्धानापातात्। तस्य शुकादिदेहस्थस्य तत्त्वज्ञानमोक्षावन्यदेहस्थस्य तु न ताविति बन्धमोक्षादिसङ्करापाताच्च। तस्यैव तमेव प्रति प्रत्यक्त्वपराक्त्वयोरयोगेन मैत्रं प्रति त्वमिति धीविषयस्य चैत्रस्य तमेव प्रत्यहमिति धीविषयत्वायोगाच्च।

किं च श्रुतिषु "अविद्यायामन्तरे वर्तमाना" [५] इत्यादावविद्या, "रमणीयचरणा" [६] इत्यादौ कर्मबन्धः, "सति सम्पद्य न विदुः" [७] इत्यादौ सुषुप्तिः, "वेदान्तविज्ञानसुनिश्चितार्था" [८] इत्यादौ तत्त्वज्ञानं, "परामृतात्परिमुच्यन्ति सर्वे" [८] इत्यादौ मुक्तिश्च चेतनधर्मः कथमनेकेषूच्येत। न ह्यस्मिन्मते चेतनबहुत्वं व्यावहारिकमप्यस्ति। न च मुक्तादिबहुत्वं प्राप्तम्। येन श्रुतिरतत्परा स्यात्।

किं चैकस्यैव जीवस्येश्वरादिसर्वकल्पकत्वे जीवस्य कारणत्वं निषिध्येश्वरस्य कारणत्वविधायकैरविद्यायाश्चिन्मात्राश्रितत्वभङ्गे वक्ष्यमाणैः श्रुतिस्मृतिसूत्रैर्विरोधः। किं चैवं सर्वज्ञत्वसर्वकर्तृत्वादिश्रुतीनां निर्विषयत्वं स्यात्। चिन्मात्रे ज्ञत्वस्यैवाभावाद्। ईश्वरस्य च अयं सर्वज्ञ इति जीवेन कल्पित्वेऽप्यहं सर्वज्ञ इति ज्ञातृत्वाभावेन, "तान्यहं वेद सर्वाणि" [९] इत्याद्ययोगात्। जीवस्य चासार्वज्ञ्यादिनैवानुभवात्। अपि च यः कल्पको जीवस्तस्यापि भावितत्त्वज्ञानमुपदेशसाध्यम्। "आचार्यवान् पुरुषो वेद" [१०] इति श्रुतेः। न चान्यस्तत्त्वविद् गुरुरस्ति।

ननु स्वप्नवत्तत्त्वविक्त्वेनैवान्यो गुरुः कल्पित इति चेन्न। तत्त्वाविद् गुरुः शिष्यायाद्वैतमुपदिशतीति भ्रान्तेः कल्पके जीवे प्रागेव जातत्वेनाद्वैतस्य ज्ञाततया

पुनरुपदेशवैयर्थ्याच्च। गुरोः कल्पितत्वस्यापि तत्त्वान्तर्गतत्वेन कल्पनाकाल एव गुरोः कल्पितत्वस्य निश्चिततया तत् श्रवणे प्रवृत्त्ययोगाच्च। स्वप्ने तु शब्दविशेषवक्तृत्वेनैव गुरुकल्पना न तूपदेशसाध्यज्ञानविषयतत्त्वविशेषवित्त्वेन। न च प्रकृतेऽपि तथा "यदेव भगवान् वेद तदेव मे ब्रूहि" [११] इत्यादिश्रुतेः "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः" [१२] इत्यादिस्मृतेश्चायोगात्।

किं च "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" [१३] इत्यादिविधिरपि भावितत्त्वज्ञानं कल्पकं चेतनं प्रत्येव। न च तस्य शिष्यः स्वाज्ञानकल्पित इति जानतस्तन्मोक्षार्थं प्रवचने प्रवृत्तिर्युक्ता। स्वप्ने तु कल्पितत्वाज्ञानात्प्रवृत्तिः। न चापरोक्षज्ञानाभावात्प्रवृत्तिः। दिङ्मोहादौ परोक्षज्ञानेनापि तत्प्रतिबन्धात्। न च संस्कारवशात् प्रवृत्तिः। न ह्यन्धं वेगादिवद् बलात्प्रवर्तते। किं तु तत्त्वनिश्चयप्रतिबन्धद्वारा। ततश्च भिक्षाटनादौ कथञ्चित् प्रवर्ततां नाम। अद्वैतं बोधयंस्तु कथं तदनुसन्धानहीनः स्यात्? न चायं स्वाप्नगुरुवत् कल्पितत्वादपर्यनुयोज्यः। कल्पकस्यैव गुरुत्वोक्तेः। कल्पितत्वेऽपि तत्त्वज्ञानहेतुत्वेन वेदस्य मीमांस्यत्ववद् गुरोरपि पर्यनुयोज्यत्वाच्च। अन्यथा कथासु सदुत्तराप्रतीतावहं त्वत्कल्पितो न पर्यनुयोज्य इत्येवोत्तरं स्यात्।

एतेन यावदविद्यं स्वप्नवद् व्यवस्थेति निरस्तम्। इह कल्पक एव शिष्यत्वगुरुत्वयोरुक्तत्वेन स्वाप्नवैषम्यात्। किं च स कल्पकजीव इदानीं निश्चिताद्वैतो न वा? आद्ये इदानीं संशयाद्यभावेनाद्वैतशास्त्रप्रणयनादिव्यर्थं स्यात्। अन्त्ये त्वद्वैतशास्त्रं प्रमामूलं न स्यात्। अपि च सोऽमुक इत्यनिश्चितो, निश्चितो वा? नाद्यः। बह्वायाससाध्यमोक्षार्थं प्रवृत्त्ययोगात्। न चाभिसन्धिपूर्विकाऽपीयं प्रवृत्तिः कल्पितत्वादपर्यनुयोज्या। कथासु स्वकीयविरोधादेरप्यनुद्भाव्यतापातात्। न द्वितीयः। त्वया जीवन्मुक्तत्वेन निश्चितेष्वद्वैतिषु मृतेष्वपि विश्वभ्रमानुवृत्तिदर्शनेन स गुरुशिष्यो वा, गुरुत्वेऽपि चैत्रो मैत्रो वेति निश्चेतुमशक्यत्वात्।

ननु गुरुशिष्यादिशब्दैः केनचित्क्रोडीकृतं चैतन्यमुच्यते निरस्तसमस्तभेदं वा? नाद्यः। तस्य मिथ्यात्वेनाकल्पकत्वात्। अन्त्ये कथमनिश्चयः।? तस्यैकत्वादिति चेन्मैवम्। भ्रमाधिष्ठानस्य चिन्मात्रस्यैकत्वेऽपि तस्य मुखमात्रस्थानीयस्यासंसारित्वेनाक

ल्पकत्वात्। तस्य मोक्षार्थं प्रवृत्त्ययोगाच्च। कल्पकानां च संसारिणामनेकेषामुपलम्भेनायं सत्यः संसारीत्यनिश्चयेन मुमुक्षुप्रवृत्त्ययोगात्।

अपि चानादौ संसारे कस्यचित्तत्त्वज्ञानं मुक्तिश्चाभून्न वा? आद्ये इदानीं संसारोपलब्धिर्न स्यात्। जीवान्तराभावात्। नान्त्यः, सम्प्रदायाभावेनोत्तरत्रापि तत्त्वज्ञानासम्भवात्। तत्त्ववित्त्वेन कल्पितगुरुसम्प्रदायस्य च निरासात्। तत्त्ववित्त्वेन श्रुत्यादिसिद्धानां शुकादीनां त्वदभिमतानां गौडपादादीनां चाभूता मुक्तिरन्यस्य भविष्यतीत्याशायोगाच्च। मोक्षशास्त्रप्रामाण्यात् सा युक्तेति चेदेवं यदि शास्त्रे श्रद्धा तर्हि "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्" [१४] "अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" [१५] "बहवो ज्ञानतपसा पूता मद्भावमागताः" [१६] इत्यादिश्रुतिस्मृतिप्रामाण्यात् पूर्वमपि केषाञ्चिन्मुक्तिः किं न स्यात्? न हि प्रत्यक्षेण, सुखदुःखाद्यनुसन्धानाननुसन्धानादिलिङ्गेन, "चेतनश्चेतनानाम्" [१७] इत्यादिश्रुत्या, "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः" [१८] इत्यादिस्मृत्या च सिद्धे जीवभेदे बाधकमस्ति। "अनादिमायया सुप्तो यदा जीवः" [१९] इत्यादिश्रुतावेकवचनं तु "यथा नीतिपरो राजा" इत्यादिवत्, "स्वर्गकामो यजेत" इत्यादिवच्च युक्तम्। अन्यथा "इति सृष्टौ विनिश्चिताः" इति पूर्वेण, "स पूज्यः सर्वभूतानाम्" इत्युत्तरेण च जीवभेदवाक्येन विरोधात्। न चाविद्यैक्येन तदुपहितजीवस्यैकत्वेऽप्यन्तःकरणोपहितानामनेकत्वाद् बद्धमुक्तव्यवस्थेति वाच्यम्। जीवभावेऽन्तःकरणोपाधेरपि तन्त्रत्वे बहुजीववादापाताद्। अननुगमाच्च। अतन्त्रत्वे देहादिनिवृत्तिवदन्तः करणनिवृत्तेरप्यमुक्तित्वेनोक्तव्यवस्थायोगात्।

एतेनैव हिरण्यगर्भ एव ब्रह्मप्रतिबिम्बो मुख्यो जीवः। अन्ये तु तत्प्रतिबिम्बभूता जीवाभासाः संसारादिभाज इति निरस्तम्। हिरण्यगर्भमुक्तितः प्राक्तस्याप्यमुक्त्यापातात्। अतीतहिरण्यगर्भमुक्तेः श्रुत्यादिसिद्धत्वेनेदानीं संसार्युपलम्भायोगाच्च। सादिहिरण्यगर्भप्रतिबिम्बस्थस्य संसारस्य सादित्वापाताच्च। न चातीतकल्पानामानन्त् येनैकैकस्मिन् कल्पे एकैकस्य मुक्तावपि एकैकमाषापचये माषराश्यपचयवत् क्रमेण सर्वजीवमुक्तेरिदानीं संसारोपलम्भो न स्यादिति बाधकं कल्पानन्त्यात्क्षणानन्त्य इव क्

षणानन्त्याज्जीवानन्त्येऽतिशयस्य

"अतीतानागताश्चैव यावन्तः सहिताः क्षणाः।

अतोऽप्यनन्तगुणिता जीवानां राशयः पृथक्।।" [२०]

इत्यादिस्मृतिसिद्धत्वेन प्रतिक्षणमेकैकमुक्तावपीदानीं संसारोपलम्भसम्भवात्। तस्मात्

"एकजीवमतं शब्दयुक्तिप्रत्यक्षबाधितम्।

तदप्रमाणतायां तु सोऽपि जीवो न सिद्ध्यति।।" [२१]

विशिष्टाद्वैतवेदान्ते जीवात्मा अणुस्वरूपः, नित्यः, ज्ञानानन्दरूपश्च । तस्य निरुपाधिकं भगवच्छेषत्वमभ्युपगतम् । "तेन प्रद्योतेनैष आत्मा निष्क्रामति" [२२] "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" [२३] इत्याद्याः श्रुतयः जीवस्य परिच्छिन्नपरिमाणत्वं प्रतिपादयन्ति । "एषोऽणुरात्मा" [२४] "आराग्रमात्रो हि अवरोऽपि" [२५] "वालाग्रशतभागस्य" [२६] इत्याद्याः साक्षाद् अणुत्वमेवाऽवेदयन्ति । अणुत्वेऽपि तस्य कर्मवशाद् एकद्विप्रभृतिशरीराधिष्ठातृत्वमुपपद्यते । "देहान्तर्मात्रदृष्टेः" [२७] इत्यादि श्लोकेषु जीवाणुत्वं वेदान्तदेशिकैः विशदीकृतम् ।

जीवस्य अणुत्वविचारे मतभेदास्सन्ति । केचनैवमप्यभ्युपगच्छन्ति । अणुत्वाच्च जीवो व्याप्तादीशाद्भिन्नः। नन्वेतदयुक्तम्, "नित्यः सर्वगतः स्थाणु" [२८] रित्याद्यागमैः। जीवो नाणुः प्रत्यक्षगुणाश्रयत्वात्, प्रत्यक्षत्वाच्च, घटवदित्य-द्यनुमानैश्च विपक्षे देहव्यापि स्पर्शादिज्ञानं न स्यादित्यादिबाधकसहितैस्तस्य विभुत्वादिति चेन्न, अणुर्ह्येष आत्मा यं वा एते सिनीतः पुण्यं च पापं च

"बालाग्रशतभागस्य शतधाकल्पितस्य च।

भागो जीवः स विज्ञेयः स चानन्त्याय कल्पत" [२९]

इत्यादिश्रुत्या "अणुमात्रोऽप्ययं जीव" इत्यादिस्मृत्या, जीवो न व्याप्तः उत्क्रान्तिमत् वाद्गतिमत्वादागतिमत्त्वात्क्रियावत्त्वाच्च खगशरीरवदित्याद्यनुमानैश्च विपक्षे हेतूच्छित्तिबाधकसहितैरणुत्वसिद्धेः। न चासिद्धिः, "सोऽस्माच्छरीरादुत्क्रम्यामुं लोकमधिगच्छति,

अमुष्मादिमं लोकमागच्छती"त्यादि श्रुतिभिः। "तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तत" इत्यादिस्मृतिभिश्च तत्सिद्धेः। न च गत्यादिश्रुतिर्बुद्धिविषया "नाकस्य पृष्ठे सुकृते तेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ति, ते अशुभमनुभूयावर्तन्त" [३०] इत्यादिश्रुतौ गतेः सुखदुःखाद्यनुभवसामानाधिकरण्योक्तेः। "स एनान्ब्रह्म गमयती" [३१] त्यादिश्रुतौ तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना" इत्यादि स्मृतौ च मुक्तिसामानाधिकरण्योक्तेश्च। "तेन प्रद्योतेनैष आत्मा निष्क्रामती" त्यात्मनिष्ठत्वश्रुतेश्च। अन्यथा बन्धमोक्षादिकमपि बुद्धेरेव स्यात्। न च श्रुतिर्बुद्ध्यु पाधिकगत्यादिविषया। "तद्यथाऽनः सुसमाहितमुत्सर्जद्यायादेमवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन् याती" [३२] ति स्वाभाविकगत्याश्रयशकटदृष्टान्तोक् तेः। "तमुत्क्रामन्तं प्राणोऽनूत्क्रामती" त्यादि श्रुतौ त्वद्रीत्या प्राणाख्यबुद्धिगतितः प्रागेव जीवगत्युक्तेश्च। "मन उदकामन्मीलित इवाश्नन्पिबन्नास्ते वे" त्यादिश्रुतौ मनस उत्क्रमणेऽपि आत्मनस्तदभावश्रवणाच्च। "तदा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्य" [३३] मित्यादि श्रुतौ नामरूपाद्विमोक्षानन्तरमपि गतिश्रवणाच्च। "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते," [३४] "स उत्तमः पुरुषः स तत्र पर्येती" [३५] त्यादिश्रुतौ मुक्तेऽपि गत्युक्तेश्च।

किं च बुद्धिगतेन गत्यादिना तदवच्छिन्नात्मनि गत्यादि जायते वा ? बुद्धिगतमेवारोप्यते वा ? उपचर्यते वा ? नाद्यः, घटगत्या तदवच्छिन्ने नभसि गत्यन्तरादृष्टेः, अन्यथा यतो घटस्य बुद्धेर्वा गतिः तत्राकाशस्यात्मनो वा सच्छिद्रत्वम् अन्यत्र द्विगुणीकृत्य वृत्तिश्च स्यात्। न च प्रतिबिम्बपक्षे नोक्तदोष इति वाच्यम्, तस्य वस्त्वन्तरत्वमते दोषाभावेऽपि दर्पणाभिहता दृष्टिः परावृत्य स्वमुखं गृह्णातीति त्वन्मते उपाधिगत्या बिम्बे न गतिः प्रतिबिम्बे तु सेत्यस्यायोगात्। नान्त्यौ, कर्तुरवच्छिन्नस्यै तदात्मप्रदेशस्य भोगायतनलोकान्तराप्राप्तेः, किं तु गतया बुद्ध्यावच्छिन्नप्रदेशान्तरमेव भुङ्क्त इति स्वीकारे कृतहान्यादिप्रसङ्गात्, कर्तुर्भोक्तुश्चावच्छिन्नस्य भिन्नत्वाद्, अभिन्ने चानवच्छिन्ने कर्तृत्वाद्यभावात्, बाधकं विना बहूनां वाक्यानामप्रामाण्यस्य उपचरितार्थत्वस्य चाऽयोगाच्च। न च व्यावहारिकस्य गत्यादेः, सत्त्वान्नात्यन्ताप्रामाण्यम्,

अमूर्ते मूर्तावच्छिन्नेऽपि व्यावहारिकगत्यदृष्टेः, व्यावहारिकत्वे घटगतिवद् बुद्धिगतव्या वहारिकगत्युपाधिकत्वायोगाच्च। न च व्यावहारिकत्वेऽपि धर्मिणा परमार्थसदात्मना सत्त्वाभावादौपाधिकत्वं धर्मिणोऽवच्छिन्नात्मनोऽप्यपरमार्थत्वात्। विस्तृतं चैतत्कर्तृत्वाध्यासभङ्गे।

केचित्तु आत्मत्वमणुनिष्ठं द्रव्यत्वसाक्षाद्व्याप्यजातित्वात्, पृथिवीत्ववत्, जीवो वा न व्याप्तः, भूतेतरत्वे सति परत्वासमवायिकरणानाधारत्वे सत्यसर्वज्ञत्वात्, शब्देतरानित्यविशेषगुणाश्रयत्वात्, संस्काराश्रयत्वाच्च, कटवत्। जीवोऽणुः ज्ञानासमवायिकरणाश्रयत्वात् मनोवदित्याद्यनुमानैर्जीवस्याणुत्वमित्याहुः। अणुत्वेऽपि जीवस्य देहव्यापिस्पर्शादिज्ञानं ज्ञानरूपगुणव्याप्त्या युक्तम्। जीवस्याणुत्वेऽपि तद्गुणव्याप्तिस्तु प्रदीपगुणभूतायाः प्रभायाः प्रदीपं विनान्यत्र वर्तनवत् जातिसमवायादेः धर्मितोऽन्यत्र वर्तनवद् वन्ह्योष्ण्यस्य तत्समीपे वर्तनवद् गन्धस्य द्रव्यं विनान्यत्र वर्तनवच्च युक्ता। वह्निसमीपस्थोष्ण्यस्य तत्समीपस्थानुद्भूतरूपतेजोऽन्तरगुणत्वे वह्नेरुद्भूतस्पर्शो न सिद्ध्येत्। न च गन्धे आश्रयद्रव्यावयवगतिः कल्प्या, सर्वतो योजनादिव्यापिगन्धो पलम्भायानेकस्थूलावयवापसारेण सद्यो गुरुत्वादिह्रासस्य द्रव्यक्षयस्य चापातात्। स्फटिककरण्डकान्तःस्थकस्तूर्यादौ चावयवान्तरानुप्रवेशकल्पने मानाभावात् प्रत्यभिज्ञाविरोधाच्च। “नित्यः सर्वगतः स्थाणु” रित्यत्र “नित्यसर्वगते विष्णावणुर्जीवो व्यवस्थित” इत्यादिस्मृत्यनुसारेण सर्वगतस्थश्चासावणुश्चेति विग्रहः।

अन्ये तु क्रमेण नानादेहसम्बन्धाज्जीवस्य सर्वगतत्वोक्तिरित्याहुः। प्रत्यक्षत्वा दितिहेतुस्त्वप्रयोजकः, तेनैवाविभुत्वस्यापि सुसाधत्वाद् उक्तश्रुत्यादिविरुद्धश्च। किं चात्मनां व्याप्तत्वे सर्वशरीरेन्द्रियाणां सर्वदा सर्वात्मसंयुक्तत्वेन सर्वात्मसाधारण्यात्। कर्मणापि साधारणदेहादिकृतत्वेनासाधारण्यायोगात्। अहंत्वा पादेरपि नियामकमूल सम्बन्धाद्याभावेरोनैयत्यायोगात्। सर्वाण्यपि शरीराणि सर्वेषां भोगायतनानि स्युरिति प्रतिकूलतर्कपराहतिः। एतेन चैत्रभोगार्थस्यांकुरादेः तददृष्टजन्यत्वाद् आत्मसमवेतस्य चादृष्टस्य साक्षादङ्कुराद्य सम्बन्धेनात्मद्वारा सम्बन्धस्य वाच्यत्वाद्, आत्मनो विभुत्वमिति निरस्तम्। चैत्रभोगाहेतोरप्यङ्कुरादेरात्मद्वारकादृष्टसम्बन्धेऽपि तदजन्यत्वेन तज्जन्यत्वे

तस्यातन्त्रतया प्रतियोग्यनुयोगिभाववाच्यवाचकज्ञानज्ञेयादाविवादृष्टकार्ययोरपि सम्बन्धान्तरस्यैव वक्तव्यत्वात्। अस्ति हि कारीर्यदृष्टस्य वृष्ट्या सह तदुद्देशेन विहितक्रियाजन्यत्वादिरूपः सम्बन्धः।

न च "बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट" [३६] इति श्रुतौ बुद्धिगुणेनाराग्रमात्रत्वमात्मनो गुणेन तु विभुत्वमुक्तमिति वाच्यम्, "तद्यथा अणुनश्चक्षुषः प्रकाशो व्याप्त एवमेवाऽस्य पुरुषस्य प्रकाशो व्याप्तोऽणुर्ह्येवैषपुरुष" इति श्रुत्यनुसारेण बुद्धेर्ज्ञानस्य गुणेनावरः आत्मगुणेन त्वाऽऽराग्रमात्र इति अन्वयादिति दिक्। तस्मादणुत्वादपि जीवो व्याप्तादीश्वराद्भिन्न इति। श्रीभाष्ये ज्ञाधिकरणे स्पष्टोऽयं विषयः ।

जीवबन्धहेतुः संसारस्वरूपं मोक्षहेतुश्च वेदार्थसङ्ग्रहे एवं सङ्गृहीतानि । "अत्रेदं सर्वशास्त्रहृदयम्- जीवात्मानः स्वयमसङ्कुचितापरिच्छिन्ननिर्मलज्ञानस्वरूपाः सन्तः कर्मरूपाविद्यावेष्टिताः तत्तत्कर्मानुरूपज्ञानसङ्कोचमापन्नाः ब्रह्मादिस्तम्बपर्यन्तविविधविचित्रदेहेषु प्रविष्टाः तत्तद्देहोचितलब्धज्ञानप्रसराः तत्तद्देहात्माभिमानिनः तदुचितकर्माणि कुर्वाणाः तदनुगुणसुखदुःखोपभोगरूपसंसारप्रवाहं प्रतिपद्यन्ते । एतेषां संसारमोचनं भगवत्प्रपत्तिमन्तरेण नोपपद्यते इति । [३७]

जीवस्य पुण्यपापरूपकर्मानुगुण्येन देवतिर्यङ्मनुष्यस्थावरान्यतमं शरीरं भवति । तत्तद्देहेऽपि जाग्रत्-स्वप्न-सुषुप्ति-मूर्च्छारूपा अवस्था भवन्ति । जाग्रत्स्वप्नयोः सुखदुःखयोरनुभवः । तत्तद्धेतुभूतपुण्यपापरूपकर्माधीनः । पुण्यपापे च भगवदनुग्रह-निग्रहाभ्यां भिन्ने । न सांसारिकं दुःखं सुखं च कादाचित्कम् ।

संसारिद्वैविध्यम्

केचित्- संसारी द्विविधः नित्यसंसारी, भाविसंसारविरहश्चेति । इत्याहुः ।

न च नित्यसंसारिणः स्वीकारे "अहम् किं तादृशः स्याम्" इति शङ्कया मोक्षोपाये प्रवृत्तिः कस्यचित् न स्याद् इति वाच्यम् । उपायविधानशास्त्रार्थनिश्चयात् स्वस्य च तदानुगुण्यदर्शनात् निःसंशयोऽपि कश्चित् प्रवर्तेत इति कथनात् । नो

चेत्, अहमन्त्यमुक्तः स्याम्, यदि मम उपायानुष्ठानं विफलम् इति कोऽपि न प्रवर्तेत इति प्रतिबन्दिः प्रसजति । लीलाविभूतेः रक्षणार्थमहमेव अवशिष्टो गणितश्चेत् मोक्षार्थप्रयत्नो व्यर्थः किलेति कश्चिदपि न प्रयतेत इति प्रष्टुरभिप्रायः ।

अपरे तु - नित्यसंसारित्वपक्षो न युक्त इत्याहुः । अस्मिन् पक्षे निःशेषं जीवानां मुक्तौ लीलाविभूतेरेवासत्वप्रसङ्ग इति प्रश्नो भवति । पूर्वस्मिन् पक्षे केचिन्नित्यसंसारिणश्चेद् भगवतः निरुपाधिकदयावत्त्वं भज्येत इति प्रश्नः । तत्पक्षे नित्यं केषुचित् जीवेषु दयाभावः तत्कर्मानुगुण्येन स्वीक्रियत इति न दोष इति समाधिः । अपरेषां पक्षे स्वेच्छया लीलाविभूतेरुपरतिः स्वीकार्या इति न दोषः । इदं पक्षद्वयमपि सिद्धान्ते वर्तते । निर्विशेषात्मैक्यवादे हि बन्धमोक्षयोरविशेषः प्रसज्यते । तत्त्वत इदानीमपि निरस्ताविद्यत्वात् । अतत्त्वतः तदानीमपि तद्व्यवहारोपपत्तेः । व्यपदिश्यते हि शुकादिषु मुक्तेष्वपि हि जगति संसारः । इति वेदान्तदेशिकाः ।

जीवस्य संसारः सोपाधिकः । उपाधिश्च कर्माविद्यादिः । असंसारी द्विविधः- संसारात्यन्ताभाववान् प्रध्वस्तसंसारश्च । प्रथमो नित्यसूरिः गरुडादिः । द्वितीयस्तु मुक्तः । नित्यसूरिसद्भावे "सदा पश्यन्ति सूरयः" [३८] इति सदापश्यदनेकद्रष्टृविशिष्ट स्थानविधायकं वाक्यमेव प्रमाणम् ।

३. उपसंहारः (Conclusion)

अनेन विचारेण इदं सिद्ध्यति यत् एकजीववादः श्रुतिस्मृतिन्यायविरुद्धः अस्ति। बद्धमुक्तव्यवस्थानुपपत्तिः, गुरुशिष्यसम्बन्धबाधः, अनन्तजीवानां प्रतिक्षणं मुक्तौ अपि संसारानुपच्छेदः इत्यादिभिः हेतुभिः जीवबहुत्वमेव सिद्ध्यति। जीवः अणुस्वरूपः, नित्यः, ज्ञानगुणकः, भगवच्छेषभूतः च अस्ति। तस्य संसारः कर्माधीनः, मोक्षश्च भगवत्प्रपत्त्या लभ्यते। नित्यसंसारिणः मुक्ताः च जीवेषु विद्यन्ते इति सिद्धान्ते न काऽपि अनुपपत्तिः।

४. सन्दर्भसूची (References)

[१] कैवल्योपनिषद् - १२

[२] छान्दोग्योपनिषद् - ६.२.१

[३] नृसिंहतापनीयोपनिषद् / श्रुत्यन्तरम्

[४] हरिवाक्यसुधासिन्धुः - १३.५

[५] मुण्डकोपनिषद् - १.२.८

[६] छान्दोग्योपनिषद् - ५.१०.७

[७] छान्दोग्योपनिषद् - ६.९.२

[८] मुण्डकोपनिषद् - ३.२.६

[९] श्रीमद्भगवद्गीता - ४.५

[१०] छान्दोग्योपनिषद् - ६.१४.२

[११] श्रुतिवाक्यम्

[१२] श्रीमद्भगवद्गीता - ४.३४

[१३] तैत्तिरीयोपनिषद् - १.११.१

[१४] बृहदारण्यकोपनिषद् - १.४.१०

[१५] श्वेताश्वतरोपनिषद् - ४.५ (अथवा महानारायणोपनिषद्)

[१६] श्रीमद्भगवद्गीता - ४.१०

[१७] श्वेताश्वतरोपनिषद् - ६.१३

[१८] श्रीमद्भगवद्गीता - १४.२

[१९] माण्डूक्यकारिका - १.१६ (गौडपादकारिका)

[२०] स्मृतिवाक्यम् / पुराणश्लोकः

[२१] शतदूषणी / तत्त्वमुक्ताकलापः

[२२] बृहदारण्यकोपनिषद् - ४.४.२

[२३] बृहदारण्यकोपनिषद् - ४.४.२

[२४] मुण्डकोपनिषद् - ३.१.९

[२५] श्वेताश्वतरोपनिषद् - ५.८

[२६] श्वेताश्वतरोपनिषद् - ५.९

[२७] ब्रह्मसूत्रम् - २.३.४ (अथवा तद्भाष्यश्लोकाः)

[२८] श्वेताश्वतरोपनिषद् - ६.१७ / श्रीमद्भगवद्गीता - २.२४

[२९] श्वेताश्वतरोपनिषद् - ५.९

[३०] मुण्डकोपनिषद् - १.२.१० / बृहदारण्यकोपनिषद्

[३१] छान्दोग्योपनिषद् - ४.१५.५

[३२] बृहदारण्यकोपनिषद् - ४.३.३५

[३३] मुण्डकोपनिषद् - ३.२.८

[३४] छान्दोग्योपनिषद् - ८.१२.३

[३५] छान्दोग्योपनिषद् - ८.१२.३

[३६] श्वेताश्वतरोपनिषद् - ५.८

[३७] वेदार्थसङ्ग्रहः - रामानुजाचार्यः

[३८] ऋग्वेदः - १.२२.२० / तैत्तिरीयसंहिता

५. ग्रन्थसूची (Bibliography)

१. व्यासः, वेदः. श्रीमद्भागवतपुराणम्.

२. रामानुजाचार्यः. वेदार्थसङ्ग्रहः.

३. रामानुजाचार्यः. श्रीभाष्यम्.

४. वेदान्तदेशिकः. शतदूषणी.

५. शतानन्दमुनिः. श्रीहरिवाक्यसुधासिन्धुः.

६. कैवल्योपनिषद्.

# जीवत्रैविध्यनिरूपणम्

- DEVENDAR
संशोधनसहायकः

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे जीवस्य त्रैविध्यं, नित्यत्वं, तथा च जीवेश्वरयोः भेदः विवेचितः अस्ति। जीवः बद्धः, मुक्तः, नित्यः इति त्रिधा विभक्तः। रामानुजसिद्धान्तानुसारं जीवस्य स्वरूपं, तस्य अणुत्वं, ज्ञातृत्वं च अत्र प्रतिपादितम्। 'तत्त्वमसि' इत्यादिवाक्यानां भेदपरकव्याख्यानेन जीवेश्वरयोः भेदः समर्थितः। जीवस्य कर्तृत्वं न स्वतन्त्रं, अपि तु 'दत्तस्वातन्त्र्यम्' इति सिद्धान्तः अत्र स्थापितः। भगवतः प्रेरणया एव जीवः कर्माणि करोति, अतः तस्य पारतन्त्र्यं स्वाभाविकम् इति अत्र सविस्तरं विचारितम्।

२. विषय-विवेचनम् (Body of the Article)

जीवत्रैविध्यनिरूपणम्

जीवस्य नित्यत्वेऽपि देहसम्बन्धोत्पत्तिविनाशप्रयुक्त उत्पन्नो जीवः, नष्टो जीवः, इत्यादिव्यवहारः, स च जीवः बद्धमुक्तनित्यभेदात् त्रिविधः । तत्र बद्धाः संसारिणः, कर्मपरवशाः, ब्रह्मादिस्तम्बपर्यन्ताः । मुक्ताः कञ्चित्कालं संसारिणो भूत्वा भक्तिप्रपत्तिभ्यां निवृत्तसंसाराः, नित्याः कदाचिदप्यसंसारिणः नारायणकैङ्कर्यपराः अनन्तगरुडादयः इति । तदेवं रामानुजमते पदार्थनिरूपणं यदुक्तं तत् तत्त्वमुक्ताकलापे भणितम् । तत्त्वमुक्ताकलापे यन्निरूपितं तदत्र कारिकया सङ्गृह्यते ।

"द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहुः

द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ।

अन्त्यं प्रत्यक् पराक् च प्रथममुभयधा तत्र जीवेशभेदात्

नित्याभूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥

तत्र द्रव्यदशावत्प्रकृतिरिह गुणैस्सत्वपूर्वैरूपेता

कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमान् जीव ईशोऽन्य आत्मा ।

सम्प्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्वयुक्ता तथैव

ज्ञातुर्ज्ञेयावभासो मतिरिति कथितं सङ्ग्रहात् द्रव्यलक्ष्म ॥" [१] इति ।।

जीवनित्यत्वविचारः जीवब्रह्मभेदविचारश्च हरिवाक्यसुधासिन्धौ ४१ तरङ्गे २० श्लोके

"अतो नित्याश्चेतनाश्च जीवा ईशाश्च सर्वशः ।

कृष्णात् भिन्ना भवन्तीति श्रीभाष्ये निर्णयः कृतः ।।" [२] इति उक्तः ।

तत्रायमाक्षेपसमाधानविचारः प्रस्तूयते । तथाहि जीवेश्वरभेदः सुतरामनुपपन्नः । जीवेशयोर्लक्षणाऽभेदबोधक "तत्वमसि" [३] इति श्रुतेः । अस्याश्चोपक्रमादिषड्विधता त्पर्यलिङ्गोपेतत्वेन प्राबल्यात् । तद्विरोधेन "द्वासुपर्णा" [४] इत्यादिभेदश्रुतिरप्रमाणम् । अन्यथा ऐक्यश्रुतेर्निर्विषयत्वं स्यादिति पूर्वपक्षे "ॐ पृथगुपदेशात् ॐ" [५] इति सूत्रोक्तादिशा "भिन्नोऽचिन्त्यः परमो जीवसङ्घात् पूर्णः परो जीवसङ्घो ह्यपूर्णः", "आत्मा हि परमः स्वतन्त्रोऽधिकगुणो जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः" [६] इत्यादिश्रुते - भेदमन्तराऽनुपपद्यमानविरुद्धधर्माधिकरणत्वरूपयुक्त्युपेतत्वेन "शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईयते । अनुभूतिविरोधेन कथमेकत्वमुच्यते" [७] इत्यनुव्याख्यानोक्तदिशा उपजीव्यत्वेन च प्राबल्यात्तद्विरोधेन चानुभवविरोधेन च "तत्त्वमसि" इति श्रुतिर्न जीवब्रह्मैक्यबोधिका किन्तु पदद्वयलक्षणापेक्षया तदिति एकपदमात्रे लक्षणापेक्षया गौण्या ज्यायस्त्वेन गौण्या वृत्त्या तत्सदृशज्ञानानन्दादिगुणवत्त्वेन तत्सदृशस्त्वमसीति सावकाशाऽतो न तया विरोधो भेदागमस्य ।

उपक्रमादेर्मानान्तराविरुद्ध एव तात्पर्यगमकत्वम् । ऐक्यवाक्यस्योपक्रमादिविरोधः "तत्त्वमसि" इति वाक्यस्य गौणार्थं हित्वा "सप्तमासु प्रथमा" इति व्याकरणनियमानुसारेण वा अतत्त्वमसीति पदच्छेदाद्यनेकप्रकारेण वा भेदाविरुद्धा अनेकार्था ग्रन्थकारैरेवोक्ताः

। ग्रन्थगौरवभयान्नात्र प्रपञ्चिताः । अतो विरोधाभावाज्जीवा ईश्वरभिन्ना एवेति भेदोपपादनार्थं भेदमन्तरानुपपद्यमानामुख्यकर्तृत्व-मुख्यकर्तृत्वरूपविरुद्धधर्माधिकरणत्वं जीवेश्वरयोर्वक्तुं "जीवगुणाः हरेरनुचराः" [८] इति वाक्यं प्रवृत्तम् ॥

अत्रोक्तजीवानाममुख्यकर्तृत्वेन न केवलं जीवानामीशाद्भेदः; अपितु जडादपि । तथाहि - जडस्येच्छापूर्वककर्तृत्वाभावात् । जीवानां च स्वेच्छापूर्वककृतिमत्त्व रूपकर्तृत्वस्य सत्त्वाज्जडाद् भेदः परस्परं जीवभेदोऽप्यनेन सिध्यति । तथाहि- ज् ञानेच्छाप्रयत्नपूर्वककृतिमत्त्वरूपकर्तृत्वोक्तया कृतिप्रयोजकेच्छाज्ञानादृष्टानां भेदस्य "ॐ अदृष्टानियमात् ॐ" [९] इति सूत्रोक्तरीत्या सिद्धत्वात् । सूत्रार्थस्तु - जीवानां भगवत्प्रतिबिम्बत्वाद्बिम्बस्य भगवतो एकत्वात् प्रतिबिम्बानां मिथो वैचित्र्यं माऽस्तु, इत्याशङ्कापरिहाराय प्रतिबिम्बमभ्युपगम्य वैचित्र्ये कारणान्तरमाह सूत्रकारः अनादिविद्याकर्मादि-वैचित्र्याद्वैचित्र्यम् । न वैचित्र्यान्यथानुपपत्त्या जीवानां भगवत्प्रतिबिम्बत्वाभावो वाच्यः । अशेषजीवानां भगवत्प्रतिबिम्बत्वेऽपि विद्याद्यदृष्टवैचित्र्येण वैचित्र्यस्योपपत्तेः । एवं परस्परं सर्वजीवानामनाद्यदृष्टविद्यादिभे दाद्भेद इति सूचितः ।

यथा जीवेश्वरयोर्जीवानां च परस्परं जडजडजीवयोश्च विरुद्धधर्माधिकरणत्वेन भेदः, तथा जलानलादिजडानामपि स्पन्दन-तोषण-दहन-शोषणादिविरुद्धधर्मवत्त्वेन परस्परं जडजडभेद उपपादनीयः, एवं जीवगणा हरेरनुचरा इत्यंशस्य पूर्वोक्तपञ्चभेदोपपादकत्वं सिद्धम् ।

अनुचरा इति पदस्वारस्येन हरीच्छाधीनस्वेच्छापूर्वककृतिमत्त्वरूपकर्तृत्ववन्तः जीवा इत्यर्थः । अतः "अनुर्लक्षणे" [१०] इति सूत्रोक्तकर्मप्रवचनीयसञ्ज्ञाया अप्रसरात् "हरेः" इति षष्ठी साधी । हरीच्छाधीनस्वेच्छाधीनकृतिमत्वरूपम् अमुख्यं कर्तृत्वं जीवानां दत्तस्वातन्त्र्यरूपं सकलसच्छास्त्रसिद्धं सर्वमुमुक्षुभिरपि प्रथममवश्यं ज्ञेयं प्रमेयमिति सकलसत्सिद्धान्त-प्रमेयसारसङ्ग्राहकपद्ये अस्वतन्त्रा इत्यनुक्त्वाऽनुचरा इति पदं सत्सिद्धान्तस्थापकशिरोमणिभिः, पदवाक्यप्रमाणपारावारपारङ्गतैः श्रीव्यासतीर्थश्रीमच्चरणैः प्रायोजि । अनेनेवं ज्ञायते अस्वतन्त्रा इत्युक्त्वा

अस्वतन्त्रत्वरूपधर्मेण जीवानामीश्वराद्भेदोपपादने जीवानां जडवैलक्षण्यं झटिति न ज्ञायेत । जीवानामस्वतन्त्रत्वेन जडसाम्ये विधिबद्धत्वं कर्मफलभागित्वं च न स्यात्, अतो जडवैलक्षण्यस्य स्पष्टबोधकेन निरुक्तकर्तृत्वाख्य-दत्तस्वातन्त्र्यबोधकानुचरशब्देन जीवानामिच्छापूर्वककृतिमत्त्वेन जडापेक्षयाऽऽधिक्यं स्वेच्छापूर्वककृतिमत्त्वात् कर्मफलभोक्तृत्व विधिबद्धत्व च स्वेच्छापूर्वक- कृतिमत्त्वरूपकर्तृत्वस्यापि भगवदधीनत्वेनामुख्यत्वं चेत्यादि सर्वप्रमेयं सङ्गृह्योक्तमिति ॥

अत्रायं विचारः । जीवानां कर्तृत्वमेव नास्ति । अतः निरुक्तकर्तृत्वकथनमसङ्गतम् । तथाहि - "जीवा न कर्तारः- स हि सर्वस्य कर्ता" । "नान्यः कर्ता न ऋते त्वत्क्रियते" [११] इत्यादीन्वरमात्रकर्तृत्वबोधक श्रुतिविरोधात् । "यत्कर्म कुरुते तदभिसम्बध्यते" [१२] इति जीवकर्तृत्वबोधकश्रुत्यपेक्षया महदादिकर्तुरीश्वरस्यैव कर्तृत्वाङ्गीकारे लाघवमिति लाघवसहकृतत्वेन ईश्वरकर्तृत्वबोधकश्रुतेः प्राबल्यात् । किञ्च क्रियास्वातन्त्र्यं हि कर्तृत्वं "स्वतन्त्रः कर्ता" [१३] इति पाणिनिस्मरणात् । नहि स्वातन्त्र्यं जीवस्य सम्भवति । तच्चिकीर्षोस्तत्कार्यासिद्धेः । अनिच्छतोऽपि देहहानेरित्यादियुक्त्यनुगृहीतेन नाहं स्वतन्त्र इति साक्षिणा स्वातन्त्र्याभावस्यैव निश्चितत्वात् ।

"ॐ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" [१४]

"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः" [१५]

इत्यादिभिः स्पष्टं जीवकर्तृतायाः निषेधात् ।

किञ्च जीवेऽङ्गीक्रियमाणं कर्तृत्वं स्वतन्त्रमुत परतन्त्रम् । नाऽद्यः, "नान्यः कर्ता, "न च स्वातन्त्र्यमन्यगम्" इत्यादि श्रुतिविरोधात् । हिताक्रियादिदोषप्रसक्तेश्च कर्तृत्वं परतन्त्रमिति द्वितीयपक्षोऽपि न युक्तः । कर्तृत्वशक्तेः स्वाधीनत्वेऽपि तक्षकस्य प्रासादकारयितृपुमधीनत्ववद् वेत्त वेतनदानादिना बहिः प्रेर्यमाणत्वमात्रं दारुयोषावदीश्वराधीनचेष्टाकत्वादिरूपम् । बहिः प्रेर्यमाणत्वरूपाद्यपक्षो न युक्तः । "य आत्मानमन्तरो यमयति" [१६] इत्यादिश्रुतिविरोधात् । दारुयोषावदीश्वराधीन

चेष्टाकत्वरूपद्धितीयपक्षोऽपि न समञ्जसः । तथात्वे दारुयोषावज्जडतुल्यत्वेन विध्यविषयत्वापत्तेः कर्मफलसम्बन्धश्च न स्यात् । अतो न कर्तार एव जीवा इति पूर्वपक्षः ॥

सिद्धान्तस्तु, प्रागुदहृतश्रुतिभिरीश्वरः कर्ता, "कर्ता विज्ञानात्मा पुरुषः यत्कर्म कुरुते तदभिसम्बध्यते । जक्षन् क्रीडन् रममाणः आत्मानमेव लोकमुपासीत" [१७] इत्यादिश्रुतिभिः मोक्षाद्यर्थं साधनाद्युपादानप्रतीतिलब्धेनाहं करोमीति साक्षिप्रत्यक्षेण जीवः कर्ता कर्मफलभोक्तृत्वादित्याद्यनुमानेन च जीवोऽपि कर्ता । नचात्र हेत्वसिद्धिः । कर्मफलभोगस्य साक्षिसिद्धत्वात्। तदभावे विधिनिषेधशास्त्रस्य वैयर्थ्यापत्तेः । नहि कर्तारमन्तरेणारण्यरोदनायमानस्य शास्त्रस्य सार्थक्यं भवति । नहि जडं प्रति विधिनिषेधौ युज्येते । नापीश्वरं प्रति, तस्य तस्य विध्यादिविषयत्वे तस्यापि पुण्यपापादि-सम्बन्धेनानीश्वरत्वापत्तेः । जीव एव कर्ताऽङ्गीकार्यः । कर्तृत्वेऽपि योग्यतावैचित्र्याद्वैचित्र्यम् । एवं जीवेश्वरयोः कर्तृत्वबोधकप्रमाणसद्भावाद् उभयविध श्रुत्योरपौरुषेयत्वेनानाशङ्कित-दोषयोर्मीमांसाद्यनु-गृहीतयोः प्रामाण्यमक्षतम् ॥

परस्परविरुद्धार्थयोः प्रामाण्यघटनं त्वर्थान्तरपरत्वेन कार्यमेव नत्वन्यतरस्य सर्वथाऽप्रामाण्यं वक्तव्यम् । वेदानां प्रतीतार्थप्रच्युतिलक्षणमेवाप्रामाण्यं न सर्वथा । अन्यत्रापि

"गृष्ट्योर्मिथो विरोधे हि हत्वैकामपराङ्मुखीम् ।
विरोधशान्तिं कः कुर्याद्विना म्लेच्छकुमारकान् ॥
तृणपिण्याकदानेन कृत्वाऽर्थान्तरलालसाम् ।
ततः प्रच्यावयेदेकां क्रुद्धाऽप्यन्यध्वाना व्रजेत् ॥
एवं श्रुत्योर्विरोधेऽपि यावाग्र्यार्थवर्तिनी ।
तां तदर्थपरां कृत्वा मोचयेत्कलहं तयोः" ॥ [१८]

इत्युक्तत्वेन जीवकर्तृत्वबोधकश्रुतिरमुख्यकर्तृत्वपरा । ईश्वरकर्तृत्वबोधिका श्रुतिर्मुख्यकर्तृत्वपरा । मुख्यकर्तृत्वं नाम स्वेच्छामात्राधीनप्रवृत्तिमत्त्वरूपमुख्यस्

वतन्त्रत्वाख्यकर्तृत्वपरम् । स्वानधीनकारणान्तराद्यनपेक्षत्वं मात्रशब्दार्थ इति न कश्चित्क्षुद्रोपद्रवः । एवं च जीवकर्तृत्व श्रुतेरमुख्यकर्तृत्वबोधकत्वेन नेश्वरस्वतन्त्रकर्तृत् वबोधकश्रुतिविरोध इति प्रामाण्यं सुस्थम् ।

एवं जीवस्यामुख्यकर्तृत्वम् ईश्वरस्य मुख्यकर्तृत्वमित्यङ्गीकारे, लोके मुख्यकर्तुरेव विधिबद्धत्वं कर्मफलभोक्तृत्वं दृष्टम्, तद्वत् ईश्वरस्यैव कर्मफलभागित्वं स्यादिति चेन्न । अमुख्यकर्तृत्वस्यैव विधिबद्धत्वे कर्मफलभोगित्वे च प्रयोजकत्वमङ्गीकरणीयम् । एतच्चाग्रे उपपाद्यते । प्रयोजकामुख्यकर्तृत्वाभाक् नेश्वरस्य कर्मफलभोक्तृत्वम् । ततश्च बिध्यविषयेभ्य ईशमुक्तजडेभ्यो व्यावृत्तस्य स्वसम्बन्धितया विधिज्ञानस्य तज्जन्यायाः फलसाधनेच्छायाः तदनुकूलकृतेश्च जीवेऽनुभवसिद्धतया तस्य च ज्ञानादेरीश्वराधीनत्वस्य श्रुतिस्मृतीतिहाससिद्धत्वादीश्वरो विधिनिषेधशास्त्रावैयर्थ्याय स्वस्य वैषम्यादिदोषपरिहाराय च अनादियोग्यता कर्मापेक्षयैव जीवं प्रेरयित्वा विध्यादिबोधकशास्त्रेण विहितादौ कर्तव्यताज्ञानमुत्पाद्य इच्छामपि जनयित्वा क्रियानिष्पत्यनुगुणं प्रयत्नं च सम्पाद्य स्वयं च तदन्तर्गतः कुर्वन् कर्तृत्वशक्तिनियम नपूर्वकदारुयोषास्थानीयेनापि जीवेन कर्म कारयतीत्येवम् ईश्वरस्य मुख्यस्वातन्त्र्येण कर्तृत्वम् । जीवस्य क्रियास्वातन्त्र्याख्यमुख्यकर्तृत्वाभावेऽपि ज्ञानेच्छापूर्वककृतिमत्त्वरूपं दारुयोषादिष्वविद्यमानममुख्यं कर्तृत्वमस्तीत्यङ्गीकर्तव्यमिति ।

न च करिष्यामीति इच्छायामप्यकरणात् न करिष्यामीतीच्छायामपि करणाच्च कथं स्वेच्छाधीनप्रवृत्तिमत्वं वाच्यम् । नह्यस्माभिर्जीवस्य नियमेन स्वेच्छाधीनप्रवृत्तिमत्वमुक्तम् । तथा सति मुख्यकर्तृत्वापत्तेः । उक्तान्वयव्यतिरेकव्यभिचाराभ्यां कर्तृत्वे मुख्यत्वमात्रं प्रतिक्षिप्तम् नतूत्सर्गत्ः स्वेच्छाधीनप्रवृत्तिमत्वरूपं कर्तृत्वम् । एवमेवोक्तं सूत्रकारैः "ॐ उपलब्धिवदनियमः ॐ" [१९] इति सूत्रे । तदर्थस्तु - यदि प्रत्यक्षयुक्तिश्रुतिभ्यो जीवः कर्तेत्यङ्गीक्रियते तर्हि "नान्यः कर्ता" इति श्रुतौ तथा "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" [१४] इति सूत्रे च कथं प्राक् कर्तृत्वनिरासश्चेत्यतस्तदाशयमाह "ॐ उपलब्धिवदनियमः ॐ" । इदं ज्ञास्यामीति स्पृहयतोऽपि जीवस्य यथा ज्ञानेन नियमः स्वेच्छानुसारेण न ज्ञानलाभः । तथेदं

कुर्यामितीच्छतोपि न क्रियायां नियमः न क्रियालाभ इति नियतकर्तृत्वाभावपरं प्रागुक्तश्रुतिसूत्रद्वयमिति ।

"अन्याधीनस्य कर्तृत्वानुपपत्तिस्तु" यथा च तक्षोभयथा" [२०] इति सूत्रेणैव परिहृता । जीवस्यास्वतन्त्रत्वे कथं कर्तृत्वं स्वतन्त्रः कर्तेत्युक्तेरित्यत आह - "ॐ यथा च तक्षोभयथा ॐ" । यथा तक्षो - रथकारः कारयितृनियन्तृत्वेन कर्तृत्वेन चेत्युभयप्रकारेणोच्यते तथा जीवोऽपि ईशनियतोऽपि कर्तेत्युच्यत इति।

नन्वेकैव क्रिया कथम् उभयकर्तृकेति चेन्न । अनेककर्तृकरथाकर्षणादिक्रियावदुप पत्तेः । नन्वेवमीश्वरस्य मुख्यकर्तृत्वे तस्यैव विधिविषयत्वं कर्मफलभोक्तृत्वं च स्यादिति वाच्यम् । अस्वतन्त्रकर्तृत्वस्यैव तदुभयप्रयोजकत्व मन्वयव्यतिरेकबलादङ्गीकार्यम् । तथा च तदुभयप्रयोजकास्वतन्त्रकर्तृत्वा-भावान्नेश्वरस्य विधिबद्धत्वादिकमिति सिद्धम् ।

न केवलं निरुपचरितस्वातन्त्र्यरूपमुख्यकर्तृत्वमप्रयोजकम्, प्रत्युत तद्बाधकमेव । नहि स्वतन्त्रः स्वात्मानं बध्नाति कर्मफलं चानुभवति । तथा सत्यनीश्वरत्वापत्तेः । एतदप्युक्तं गीताभाष्ये - "अकर्तृत्वेऽपि विधिद्वारा ईश्वरप्रसादादिच्छोत्पत्योक्तकारणैः कर्मद्वारा पुरुषार्थो भवतीति न प्रवृत्तिविधिवैयर्थ्यम्" [२१] इति । अकर्तृत्वेऽपीत्यस्यापराधीन कर्तृत्वाभावेऽपीत्यर्थः "प्रमेयदीपिकायाम्" उक्तः ।

अस्तु वा क्रियास्वातन्त्र्यरूपं कर्तृत्वम् । तदपि जीवे ईश्वरायत्तं विद्यते । स्वावरजीवापेक्षया जडापेक्षया वा तदुपपत्तेः । "तदधीनं स्वतन्त्रत्वं स्वावरापेक्षयैव तु" । इति स्वातन्त्र्यं च जडान्प्रति- प्रभुर्हि जीवो जडमपेक्ष्येति । - जडं हि परकृतनोदनाक्रियावद्भवति। नत्वागन्तुककारणमन्तरेण स्वेच्छया - जीवस्तु, अनादिसिद्धया सत्तातुल्यया परमेश्वरप्रसादायत्तया क्रियाशक्त्या कर्तेत्युच्यत इति युक्तस्तत्र कर्मविधिः" इति । एवं च ईश्वरे स्वतन्त्रं कर्तृत्वं जीवे त्वमुख्यं कर्तृत्वमिति सिद्धम् ।

ईश्वरस्यानधीनकर्तृत्वाख्यमुख्यकर्तृत्वात् कर्मफलाभोक्तृत्वम् । जीवस्यैव तदधीनकर्तृत्वाख्यामुख्य-कर्तृत्वात्कर्मफलभोक्तृत्वमित्युक्ते लोके राजधनिकादिमु

ख्यकर्तॄणाममात्यभृत्यादि अमुख्य कर्तृकृत ईश्वरस्य कर्मफलभागित्वमवर्जनीयं स्याद् इति चेन्न । लोके राजादिप्रयोजककर्तॄणां भृत्यामात्यादिकर्तव्यकर्मप्रेरणा तत्कर्मजन्यफलेच्छापूर्विका फलेच्छाधीनत्वाद् अस्वतन्त्रा । अतः तत्कर्मफलभागित्वम् ईश्वरकृता जीवानां कर्तव्यकर्मप्रेरणा न तत्कर्मफलेच्छापूर्विका स्वतन्त्रत्वाद् ईश्वरस्य कर्मफलभोक्तृत्वमिति सिद्धम् ।

अनेन कर्मजन्यफलभोगित्वादौ ईश्वराधीनविधिज्ञानाधीनफलसाधनताज् ञानाधीन-स्वेच्छाधीनप्रवृत्तिमत्त्व-रूपं पराधीनकर्तृत्वं प्रयोजकम् । ईश्वरः न कर्मफलभोक्ता, पराधीनकर्तृत्वाभावात्, यथा मुक्तजडे । जडे इच्छाभावादेव मुक्ते च फलसाधनेच्छाभावेन निरुक्तपराधीनकर्तृत्वभावात् कर्मफलाभोक्तृत्वं, तथा ईश्वरोऽपीत्यनुमानं प्रमाणाम् ।

"सर्वज्ञाल्पज्ञताभेदात् सर्वशक्त्यल्पशक्तितः ।

स्वातन्त्र्यपारतन्त्र्याभ्यां सम्भोगो नेशजीवयोः" [२२] इति श्रुतिश्चात्र प्रमाणं।

अनेन उक्ततर्कस्य व्याप्त्याद्यङ्गवैकल्येन नोक्तेश्वरस्वतन्त्रकर्तृत्वबाधकतेति सिद्धम् ।

ईश्वरस्य जीवानां कर्मणि प्रेरणायां फलानपेक्षणन्तु पूर्णानन्दत्वात् । "पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः ?" "आप्तकामस्य का स्पृहा" "ॐ न प्रयोजनवत्त्वात् ॐ", "ॐ लोकवत्तु लीलाकैवल्यं ॐ" [२३] इत्याद्यनेकप्रमाणसिद्धम् । एवं जीवानां स्वस्वकर्मप्रेरणायां तत्तदीयानादियोग्यतादिसापेक्षत्वान्नेश्वरस्य वैषम्यायदिदोषः । उक्तं हि वैषम्याधिकरणे –

"ॐ वैषम्यनैर्घृण्ये न सापेक्षत्वात्" [२४] इत्यादिना । कर्तृत्वाधिकरणेऽपि - "

ॐ कृतप्रयत्नापेक्षस्तु विहितप्रतिषेधावैयर्थ्यादिभ्य ॐ" [२५] इति सूत्रेण । जीवानामनाद्यदृष्टयोग्यतादीनामीश्वराधीनत्वेन स्वाधीनकारणान्तरसापेक्षत्वान्नेश्वरत्वस्वातन्त्र्यहानिः । उक्तं हि –

"ॐ उपपद्यते चाप्युपलभ्यते च ॐ" [२६]

“द्रव्यं कर्म च कालश्च स्वाभावो जीव एव च ।

यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया” [२७] इति ॥

“ॐ सत्वाच्चावरस्य ॐ” [२८] इति सूत्रभाष्योदाहृत “काल आसीत्पुरुष आसीत्परम आसीत्तद्यदासीत्तदावृतमासीदथैक एव परम आसीद्यस्यैतदासीन्न ह्येतदासीत्” [२९] इति काषायणश्रुतौ । यद्यदासीत् - तदावृतं - तदधीनमासीदिति सर्वस्य कालकर्मादेर्भगवदधीनत्वश्रवणाच्च । यद्यपि ईश्वरः कर्मापेक्षां विनैव फलदाने शक्तः तथाऽपि तदपेक्ष्यैव फलं ददानीति स्वसङ्कल्पादेव तदपेक्षेति । उक्तं चैतत् –

“एतानपेक्ष्यैव फलं ददानीत्यस्यैव सङ्कल्प इति स्वतन्त्रता ।

नास्यापगच्छेत्स हि सर्वशक्तिर्नाशक्तता क्वचिदस्य प्रभुत्वाद्” [३०] इति ।

“साधनानां साधनत्वं यदात्मधीनमिष्यते ।

तदा साधनसम्पत्तिरैश्वर्यद्योतिका भवेत्” [३१] इति च ।

एवं च स्वयमेव गतिसमर्थस्यापि ग्रामादिगमने करितुरगादिवाहनापेक्षा यथा, तथेश्वरस्य प्रकृतिकालकर्मस्वभावाद्यपेक्षा परमैश्वर्यप्रकाशनार्था ।

जीवविभागः –

“यो ऽध्यात्मिको ऽयं पुरुषः सो ऽसावेवाधिदैविकः ।

यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः ॥” [३२] इति भागवते उक्तः जीवविभागः ।

योऽयमाध्यात्मिकः पुरुषश्चक्षुरादिकरणाभिमानी द्रष्टा जीवः । स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः । देहसृष्टेः पूर्वं करणानामधिष्ठानाभावेनाक्षमतया करणप्रकाशकर्तृत्वाभिमानितत्सहाययो॒ उभयोरपि तयोर्वृत्तिभेदानुदयेन जीवत्वमात्राविशेषात् । ततश्चोभयः करणाभिमानितदधिष्ठातृदेवतारूपो द्विरूपो विच्छेदो यस्मात् । स आधिभौतिकश्चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः । “स वा एष पुरुषोऽन्नरसमयः” [३३] इत्यादि श्रुतेः ॥

३. उपसंहारः (Conclusion)

अनेन विचारेण इदं सिद्ध्यति यत् जीवः बद्ध-मुक्त-नित्य-भेदेन त्रिविधः। सः नित्यः, अणुः, ज्ञातृत्व-कर्तृत्व-भोक्तृत्ववान्, परमात्मनः भिन्नश्च। जीवस्य कर्तृत्वं न स्वतन्त्रं, अपि तु 'दत्तस्वातन्त्र्यम्'। ईश्वरः मुख्यकर्ता, जीवः अमुख्यकर्ता। कर्मविधयः जीवमेव अधिकृत्य प्रवर्तन्ते। ईश्वरः पूर्णानन्दः, आप्तकामः सन् लीलायै सृष्टिं करोति, जीवान् कर्मसु प्रेरयति च। जीवः आध्यात्मिक-आधिदैविक-आधिभौतिक-भेदेन त्रिविधः इति भागवतवचनमपि अत्र सङ्गतं भवति।

४. सन्दर्भसूची (References)

[१] तत्त्वमुक्ताकलापः - १.४-५

[२] हरिवाक्यसुधासिन्धुः - ४१.२०

[३] छान्दोग्योपनिषद् - ६.८.७

[४] मुण्डकोपनिषद् - ३.१.१ / श्वेताश्वतरोपनिषद् - ४.६

[५] ब्रह्मसूत्रम् - २.१.२९ (पृथगुपदेशात्)

[६] श्रुतिवाक्यम् / उपनिषद्

[७] अनुव्याख्यानम् - मध्वाचार्यः

[८] हरिवाक्यसुधासिन्धुः / पुराणश्लोकः

[९] ब्रह्मसूत्रम् - २.३.५१

[१०] अष्टाध्यायी (पाणिनिः) - १.४.८४

[११] श्रुतिवाक्यम्

[१२] बृहदारण्यकोपनिषद् - ४.४.५

[१३] अष्टाध्यायी (पाणिनिः) - १.४.५४

[१४] ब्रह्मसूत्रम् - २.१.२१

[१५] श्रीमद्भगवद्गीता - ५.१४

[१६] बृहदारण्यकोपनिषद् - ३.७.३

[१७] श्रुतिवाक्यम् / छान्दोग्योपनिषद् - ७.२५.२

[१८] तत्त्वनिर्णयः / सर्वमूलग्रन्थः

[१९] ब्रह्मसूत्रम् - २.३.३६

[२०] ब्रह्मसूत्रम् - २.३.३९

[२१] गीताभाष्यम् - मध्वाचार्यः

[२२] श्रुतिवाक्यम्

[२३] ब्रह्मसूत्रम् - २.१.३२-३३

[२४] ब्रह्मसूत्रम् - २.१.३४

[२५] ब्रह्मसूत्रम् - २.३.४१

[२६] ब्रह्मसूत्रम् - २.१.३५

[२७] श्रीमद्भागवतम् - २.५.१७ (अथवा तदनुरूपश्लोकः)

[२८] ब्रह्मसूत्रम् - २.३.४५ (भाष्योदाहृतश्रुतिः)

[२९] काषायणश्रुतिः

[३०] अनुव्याख्यानम् / न्यायसुधा

[३१] न्यायसुधा - जयतीर्थः

[३२] श्रीमद्भागवतम् - २.१०.८

[३३] तैत्तिरीयोपनिषद् - २.१.१

५. ग्रन्थसूची (Bibliography)

१. वेदान्तदेशिकः. तत्त्वमुक्ताकलापः.

२. रामानुजाचार्यः. श्रीभाष्यम्.

३. मध्वाचार्यः. अनुव्याख्यानम्.

४. मध्वाचार्यः. गीताभाष्यम्.

५. जयतीर्थः. न्यायसुधा.

६. शतानन्दमुनिः. श्रीहरिवाक्यसुधासिन्धुः.

७. व्यासः, वेदः. श्रीमद्भागवतपुराणम्.

८. बादरायणः. ब्रह्मसूत्रम्.

# ईश्वरस्वरूपनिरूपणम्

**डा- आर् विटोबाचार्यः**
**निदेशकः , (VVSRI)**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे ईश्वरस्य स्वरूपं, तस्य सकलगुणपरिपूर्णत्वं, निर्दोषत्वं च विचारितम् अस्ति। 'ब्रह्ममीमांसाशास्त्र'स्य आधारेण भगवतः रामकृष्णाद्यवताररूपेषु दृश्यमानानां जनन-मरणादिदोषाणां निराकरणं कृतम्। ईश्वरस्य जगत्कारणत्वं, प्रयोजनरहितत्वेऽपि परार्थं सृष्ट्यादौ प्रवृत्तिः, तथा च तस्य दुःखभ्रमादिरहितत्वं अत्र सप्रमाणं स्थापितम्। 'अद्वितीय'-'एक'-'अनन्त'शब्दानां तात्पर्यं विविच्य, तेषां जगन्मिथ्यात्वपरकव्याख्यानस्य खण्डनं कृत्वा, भगवतः सर्वोत्तमत्व-असहायत्व-सर्वदेशकालव्यापित्वरूपार्थः प्रतिपादितः।

२. विषय-विवेचनम् (Body of the Article)

ईश्वरस्वरूपनिरूपणम्

ब्रह्ममीमांसाशास्त्रे प्रथमे समन्वयाध्याये भगवति सर्वशब्दसमन्वयद्वारा सकलगुणपरिपूर्णत्वं समर्थितं सूत्रकृता भगवता बादरायणेन । तदेव अत्र अनेकतरङ्गेषु युक्तिपूर्वकं समर्थितम् । अविरोधाख्ये द्वितीयाध्याये श्रुतिविरोधयुक्तिविरोधसमयविरोधादीन् दूरीकृत्य भगवत यद् दोषदूरत्वं समर्थितं तदेव नानाप्रकरणे निरूपितम् । तेन ज्ञायते मुमुक्षुणा भगवतः गुणपरिपूर्णत्वज्ञानमिव निर्दोषत्वज्ञानमत्यवश्यं सम्पादनीयमिति । रामकृष्णाद्यवताररूपेषु स्थूलदृग्भिः आरोपिताः जननमरणादिदोषाः भागवतोक्तिभिः लोकन्यायेन च न सन्तीति तावदुपपाद्यते । तत्र गुणशालिषु महापुरुषेषु दोषान्वेषणं व्यर्थमनर्थप्रदं चेति सार्वजनीनम् । यदा सत्सु विद्यमानस्यापीषद्दोषस्य दर्शनं नरकाद्यनर्थहेतुः तदा किमु वक्तव्यम् अवद्यगन्धविधुरे हरौ दोषदर्शनं नरकाद्यनर्थहेतुरिति । तर्हि “यत्र गुणास्तत्र

दोषाः" इति न्यायस्य का गतिरित्युक्तेऽधो गतिरेव । भगवति भगवद्व्याप्तिकत्वेन तस्य दुर्न्यायतास्वीकारात् ।

"अन्यस्य यो दोषः स महतो न" इति अपरः लौकिकन्यायः । काले सन्ध्याव न्दनाद्यकरणमल्पानामस्माकं दोषः । तदेवासम्प्रज्ञातसमाधिभाजां योगिनां न दोषः । लोकेऽप्येवं चेद् अलौकिकोऽच्युतः, यस्य क्रूरकर्मकरणेऽपि पापाख्यच्युतिर्नास्ति स प्रलयकाले निखिलसंहारेऽपि कथं वाऽपवादी भवितुमर्हति ? प्रत्युत "सृजस्यवस्यत्सि न तत्र सज्जसे" [१] इत्यादिना स्तुत्य एव ।

प्रलये भगवान् लक्ष्म्यात्मके वटपत्रे शेते इति तावत्प्रसिद्धम् । विना वृक्षं परिदृश्यमानस्यास्य वटपत्रस्यानुत्पन्नत्वं सर्वलयेऽप्यलीनत्वादस्याविनाशित्वं चावश्यमभ्युपेयम् । यदा भगवतः तल्पकल्पस्य वटपत्रस्याप्यविनाशित्वादिकं तदा किमु वाच्यं पत्रशायिनो हरेः ।

प्रागभावरूपकारणाभावात् जननरूपकार्याभावः । उत्पत्तिमान् भगवानिति वदद्भिः तदुत्पत्तिकारणीभूत-प्रागभावोऽप्यङ्गीकर्तव्यः । वस्तूत्पत्तेः प्राक् तदभावस्यावश्यमपेक्षितत्वात् । हरेः प्रागभावश्च वक्तुं न शक्यते । लये सत्त्वात् । एवं च प्रागभावरूपकारणाभावात् जननरूपकार्यमपि भगवतो नास्तीति अवश्यमभ्युपगन्तव्यम् ।

सर्वसम्प्रतिपन्नयुक्त्यन्तरेण नारायणस्य जन्माभावसमर्थनम् ।

श्रीकृष्णरामादयः वसुदेवादिभ्यो जाता इति वदन्तोऽपि अज्ञजनाः मूलरूपिणो नारायणस्य न कस्यचित् सकाशाज्जनिमनुमन्यन्ते । तेन ज्ञायते भगवान् न जनिमान् इति । चतुराननः नाभिकमलाज्जातः, त्रिलोचनः भगवतः क्रोधाज्जात इति "यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः" [२] इति भागवतप्रसिद्धत्वात् तयोर्जनिमनुमन्यन्ते । नैव नारायणस्य । तस्य जनकाभावात् । नारायणस्यापि जनकोऽस्ति चेद् ब्रह्मादीनामिव लोके वेदे च प्रथितः स्यात् । अप्रसिद्धस्य शशविशाणवदभाव एवेति जनकाभावाद् हरेः जनेरप्यभावोऽवश्यमङ्गीकर्तव्यः ।

प्रलये सत्त्वेन भगवतः जननमरणाभावसमर्थनम् ।

प्रलये सत्त्वेन प्रागभावाभावान्न हरेः जनिरित्युक्तं प्राक् । इदानीं प्रलये सत्वेन जननमरण्योरुभयोरभावः सिद्ध्यतीति देहलीदीपोपमानेन समर्थयति । तथा हि । देहल्युपरि निक्षिप्तो दीपः गृहस्यान्तः बहिश्च प्रकाशको यथा तथा प्रलये भगवतः सत्त्वं जननमरणाभावरूपोभयप्रमेयसाधको भवति । सर्वस्य लयेऽप्यलीनत्वात् सर्वोत्पत्तेः पूर्वं विद्यमानत्वाच्च हरेः जनिमृती न स्त इति सिद्ध्यति ।

सृष्ट्यादिकर्ता भगवान् इति प्रसिद्धमेतत् । स च भगवान् प्रयोजनमुद्दिश्य प्रवर्तत उतानुद्दिश्य । न द्वितीयः । "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" [३] इत्युक्तत्वात् प्रेक्षावान् भगवान्, विना प्रयोजनं कथं वा प्रवर्तेत । नाऽद्यः । तथा सति अपूर्णताप्रसक्तिरिति । नैतद् युक्तम् । सृष्ट्यादिना पूर्णस्य भगवतः प्रयोजनाभावेऽपि अपरिपूर्णानां पामराणां प्रयोजनसद्भावात् । परार्थं प्रवर्तमाने भगवति अपूर्णतावकाशः क्व ? यथा तटाकमापूर्य उपरि निस्सृतैः तटाकोदकैः केदारादीनामेव प्रयोजनं न पूर्णस्य तटाकस्य, तथा सृष्ट्यादिना पूर्णस्य भगवतः न किमपि प्रयोजनम् । किन्तु पामराणामेवास्माकम् ।

निर्दुःखत्वभ्रमराहित्ययोः समर्थनम् ।

"सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्" [४] इति वचनेन दुःखं तावत् सुखानन्तरं भवति न तु सुखेन साकम् इत्यनुभवसिद्धम् । तथा भ्रमो प्रमया सह न भवतीत्यप्यनुभवसिद्धम् । भगवान् तावत् सर्वत्र सर्वदा पूर्णसुखवान् पूर्णज्ञानवांश्च इति "कं ब्रह्म" [५] "यः सर्वज्ञः" [६] इत्यादिश्रुतिसिद्धः । एतादृशभगवान् कथं वा दुःखभ्रान्त्यवकाशवान् भवेत् । भगवति सुखसम्यग्ज्ञानयोः कदाऽप्यनपगमात् । सुखादौ च श्रुत्युक्तन्यायेन दुःखभ्रमयोरसम्भवान्न तयोरवकाशः । यद्यपि "पादे मे वेदना, शिरसि सुखं" इत्यस्ति प्रतीतिः । तथाऽपि "यदवच्छेदेन यदा सुखं तदवच्छेदेन तदा न दुःखम्" इति नियमस्य न काऽपि च्युतिः । एवं यदंशे प्रमा तदंशे न भ्रम इति नियमस्यापीति ज्ञातव्यम् ।

रीत्यन्तरेण दुःखाभावोपपादनम् ।

नराणां प्राग्जन्मार्जितदुष्कर्मैव दुःखमूलम् । येन प्राग् जन्मनि दुष्कृतं कृतं स एव दुःखभाग् भवति, नान्यः । "पुण्येन पुण्यं लोकं नयति पापेन पापम्" [७] इति श्रुतिप्रसिद्धोऽयं विषयः । भगवांस्तु "न कर्मणा वर्धते नो कनीयान्" [८] इति श्रुतेः पुण्यकर्मणा वृद्धिं, पापकर्मणा नीचतां दुःखभ्रान्त्यादिना नीचतां च न प्राप्नोति । कर्मलेपरूपकारणाभावात् । तथा च दुःखरूपकार्यस्याप्यभावः ।

भगवदवतारेषु नवनीतभक्षणादिना प्राप्तक्षुत्पिपासादिदोषनिरासः

नवनीतभक्षणक्षीरदध्यपहरणादिना भगवति कृष्णे क्षुत्पिपासादिदोषाः स्युरिति संशीतिः समुदेति । परन्तु इयं न युक्ता । यतो हि, क्षुत्पिपासादिदोषा अपि मर्त्यानामप्यस्माकं मुक्तिपर्यन्तमेव । मुक्त्यनन्तरं मर्त्यानामपि न । सत्येवं, नित्यमुक्तस्य नारायणस्य न ते दोषा इति किमु वक्तव्यम् । यदि सन्ति क्षुत्पिपासादिदोषाः तर्हि बृहच्छरीरः भगवान् किं भुङ्क्ते ? न किमपि । तदुदरपूरकपदार्थस्य कुत्राप्यभावात् । बृहच्छरीरत्वमेव भगवतः नास्तीति न शङ्कनीयम् ।

"बृहच्छरीरो निमिमान ऋक्वभिः युवा कुमारः प्रत्येत्याहवम्" [९]

इति श्रुतौ तस्मिन् बृहच्छरीरत्वस्य प्रसिद्धत्वात् । ननु तर्हि बृहच्छरीरत्वादेव स्वयोग्यान्नपानाद्यभावात् सर्वदा क्षुत्पिपासादिदोषवान् भगवान् । भवत्विति चेन्न । तथा सति शरीरकार्श्यादेरप्यवश्यम्भावात् । श्रुत्युक्तबृहच्छरीरत्वस्य "विशेषेण मिमानः" इति पदोक्तज्ञानातिशयस्य, युवेत्युक्तयौवनस्य, आहवं प्रत्येतीत्युक्तरण रङ्गधीरत्वस्य, पूर्वार्धर्चोक्तनवतिसङ्ख्याकप्रधानदेवताप्रवर्तकत्वस्य, "एको दाधार भुवनानि विश्वा" [१०] "कोटिब्रह्माण्डविग्रहः" [११] इत्यादिश्रुति-प्रसिद्धब्रह्माण्डा वनशक्तेश्चायोगात् । अस्तु तर्हि बृहच्छरीरस्य मूलरूपस्य हरेः क्षुत्पिपासाद्यभावः । परन्तु अनीदृशे श्रीकृष्णे स्यादेव किल क्षुत्पिपासादिदोष इति न वाच्यम् । विजृम्भितवदनस्य तस्याप्युदरे यशोदया महीमहीधरादिसकलप्रपञ्चस्य साक्षात्कृतत्वेन बृहच्छरीरत्वापरिहारात् । अतोऽवद्यगन्धविधुर एव श्रीहरिः ।

अथ सामान्यतः ईश्वरस्वरूपं निरूप्य इदानीं प्रकरणविशेषात् ईश्वरीयगुणविशेषनिरूपणविमर्शः क्रियते । उपोद्धातप्रकरणादारभ्य तत्र तत्र ईश्वरस्वरूपनिरूपणं कृतम् । यथा उपोद्धातप्रकरणे ।

"अप्रमेयमनाद्यन्तं निर्गुणं नित्यमद्वयम् ।

अखण्डं सच्चिदानन्दरूपं मायातमःपरम् ॥" [१२] इति

तथा अप्रमेयमद्वितीयम् इति प्रकरणे प्रतिपादितम् ।। तत्र अद्वितीयत्वं नाम किमिति विमर्शः नानाशास्त्रेषु कृतो वर्तते । तस्यायं सङ्ग्रहः-

अद्वितीयशब्दोऽपि कर्मधारयो बहुव्रीहिर्वा? आद्ये ब्रह्म द्वितीयं न चेत्, तृतीयं प्रथमं वा स्यात्। नान्त्यः, प्राथम्येन कर्मधारये सम्भवति जघन्यस्य बहुव्रीहेरयोगात्। द्वितीयादन्यद् अद्वितीयमिति "अनपुंसकस्य" इत्यादाविव "नार्षेयं वृणीत" इत्यादाविव च पर्युदासार्थत्वेनैकवाक्यत्वसम्भवे प्रसज्यप्रतिषेधार्थत्वेनैकवाक्यभेदायोगाच्च। अघटं भूतलमितिवद् द्वितीयाभावेनैव सद्वितीयत्वापाताच्च। तस्यापि निषेधे व्याघातात्। "आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्" [१३] इति श्रुत्यन्तरेऽन्यस्य सविशेषणे हीति न्यायेन निमिषत्वेनैव निषिद्धत्वे "छागो वा मन्त्रवर्णात्" [१४] इति न्यायेनेहापि मिषत्वेनैव निषेद्धव्यतया स्वरूपेणैव निषेधासिद्धेश्च। किं च नञा द्वितीयात्यन्ताभावोक्तौ अग्र इति व्यर्थं। नापि प्रागभावोक्तिः, मिथ्यात्वासिद्धेः। त्वन्मतेऽप्याविद्याकर्मादेस्तदा सत्त्वाच्च।

किं च द्वितीयशब्दस्सहायवाची, "असिद्वितीयोऽनुससार पाण्डव" [१५] मितिप्रयोगात्, "असिद्वितीयः असिसहाय इति गम्यत" इति महाभाष्योक्तेश्च। तथा चाद्वितीयमसहायमित्यर्थोऽस्तु। यद्वा द्वितीयशब्दः प्रकृतसमान एव द्वितीये व्युत्पन्नः, न तु तत्र तस्य संकोचः। लोके "अस्मिन्ग्रामेऽयमेक एवाद्वितीय" इति। स्मृतौ च-

"एक एवाद्वितीयोऽसावश्वमेधः क्रतुष्वपि।

एक एवाद्वितीयोऽसौ प्रणवो मन्त्र उच्यते।।" [१६] इति प्रयोगात्।

महाभाष्ये च "अस्य गोर्द्वितीयोन्वेष्टव्य इत्युक्ते सदृशो गौरेवोपादीयते

नाश्वो न गर्दभ इत्युक्तेश्च। शाङ्करभाष्ये च अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते गौरेवद्वितीयोऽन्विष्यतेऽनाश्वः पुरुषो वे"त्युक्तेश्च। "समे द्वितीयशब्दः स्यात्" [१७] इति स्मृतेश्च। द्वितीयशब्देन द्वितीयमात्रोक्तौ अद्वितीयशब्देनैव स्वेतरसर्वनिषेधसम्भवेन सजातीयनिषेधकैवशब्दादिवैयर्थ्याच्च। तदवैयर्थ्याय द्वितीयशब्दस्य विजातीयपरत्वेन सङ्कोचे च अग्र इत्यनेनाविरोधाय समद्वितीयपरत्वेन संकोचः स्यात्। तथा च समाभ्यधिकराहित्यमेवाद्वितीयशब्दार्थः।

"न तत्समश्चाभ्यधिकश्च दृश्यत" [१८] इति श्रुतेः

"न त्वत्समोऽस्त्यभ्यधिक" [१९] इति स्मृतेश्च।

"एक एवाद्वितीयो भगवान्स्तत्सदृशः परो नास्ति" [२०] इति श्रुतौ-

"ज्ञानानन्दाद्यभिन्नत्वादेकः सर्वोत्तमत्वतः।

अद्वितीयो महाविष्णुः पूर्णत्वात्पुरुषः स्मृतः।।

भेदाभेदनिवृत्यर्थमेवशब्दोऽवधारकः।" [२१]

इति स्मृतौ च व्याख्यातत्वाच्च। द्वितीयाभावस्य भावाभावाभ्यां व्याघातेनाद्वितीयशब्दस्य तत्परत्वासम्भवाच्च। उक्तं च-

"यथा चोलनृपस्सम्राडद्वितीयोऽस्ति भूपतिः।

इति तत्तुल्यनृपतिनिवारणपरं वचः।

न तु तद्भ्रातृतत्पुत्रकलत्रादिनिवारकम्।।" [२२] इति।

तस्मात्- "एक एवाद्वितीयोऽसावाकाशे सवितेति वत्।

एकमेवाद्वितीयं सदग्र इत्यपि योज्यताम्।।" [२३]

किं च- "अधिकं हि विजातीयं सजातीयं समं भवेत्।

गुणादिकं तु स्वगतं तदभेदोऽत्र निषिध्यते।।" [२४]

एवम् एकम् इति परब्रह्मविशेषणम् ।

तत्र केचन एकमेव अद्वितीयं ब्रह्म इत्यत्र एकशब्देन सर्वजगन्निरासः कृत

इति व्याचक्षते । तन्न युज्यते । यतः "सलिल एको द्रष्टाऽद्वैतौ भवति" [२५] इत्यत्र सलिलादिपदेन "सदेव सोम्येदमग्र आसीत्" [२६] इत्यत्र कालप्रापकेण पूर्वेणाग्रपदेन "तदैक्षत नामरूपे व्याकरोत्" [२७] इतीक्षणनामरूपात्मकप्रपञ्चप्रापकेणोत्तरेण च द्वैतवाक्येन विरोधः, प्रमाण्यस्य स्वतस्त्वेनाद्वैतवाक्येनाद्वैतस्येव द्वैतवाक्येनैव द्वैतस्य (सत्य) त्वसिद्धेः। यदि चाविरोधाय द्वैतवाक्यस्य लक्षणादिनाऽद्वैतपरत्वं वाऽतात्त्विकविषयत्वेन व्यवस्था वा तद्विरोधेनाप्रामाण्ये वा, तदा विपरीतं किं न स्यात्? अपच्छेदन्यायादेर्निरासात्। तेन पूर्वस्य द्वैतवाक्यस्य बाधेऽपि परस्याबाधाच्च। पूर्वस्याप्यनुपसञ्जातविरोधित्वादिना प्राबल्यस्योक्तत्वाच्च। न च सलिलसृष्टि-कालेक्षणनामरूपव्याकर्तृत्वादिकं मानान्तरप्राप्तं येन तद्वाक्यमनुवादकं स्यात्। तस्माद् द्वैतवाक्यमध्यस्थ-मद्वैतवाक्यमुपांशुयाजवाक्यमध्यस्थविष्णवादिवाक्यवत् पूर्वोत्तरद्वैतवाक्यानुसारेण नेयम् ।

किं च "यावत् किञ्चित् भवेदेतदिदंशब्दोदितं जगत्।

इदं सर्वं पुरा सृष्टेरेकमेवाद्वितीयकम्।।" [२८]

सदेवासीदिति व्याख्यातत्वात् सदभेदेन सत्त्वमुक्त्वा पुनरद्वितीयपदेन तन्निषेधे व्याघातः। न हि सदेवासीदित्यस्यासदासीदित्यर्थः। सद्व्यतिरेकेण नासीदित्यर्थोक्तौ तु सविशेषणे हीतिन्यायेन सदात्मकत्वं स्यात्।

किं च न तावदेकशब्देन मिथ्यात्वसिद्धिः, तस्य मानान्तराविरुद्धानेकार्थत्वात् "एके मुख्यान्यकेवला" [२९] इत्यमरोक्तेः। "एको गोत्रे" [३०] इत्यत्रैकशब्दोऽयमन्यप्रधानासहायसंख्याप्राथम्यसमानवाचीति कैयटोक्तेश्च। "ष्णान्ता षड्" [३१] इति सूत्रे महाभाष्ये- "एकशब्दोऽयं बह्वर्थः, संख्यायाम्- एको द्वौ बहव इति अस्त्यसहायवाची- एकाग्नय एकहलानीति, अस्त्यन्यार्थे। प्रजामेकारक्षत्यूर्जमेका" [३२]- इत्याद्युक्तेश्च। "एको बहूनां यो विदधाति कामान्" [३३] त्यादौ संख्यादौ प्रयोगाच्च। भवन्ति च ब्रह्मणि जीवादितोऽन्यत्वप्राधान्यप्राथम्यानि। सृष्ट्यादौ सहायानपेक्षत्वं कुसमयप्राप्तनिर्गुणत्व-निषेधायैकत्वसंख्याविधिः। नानारूपेषु निर्दोषत्वेन समानत्वं च। मन्मते एकं रूपमेको भाव इत्यादावपि संख्यार्थ एव। अत

एवोत्तरत्र जीवादिष्वसम्भावित-जगत्स्रष्टृत्वादिनान्यत्वादिसमर्थनम्।

किं च त्वयापि-- "वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः।

वृक्षान्तरात्सजातीयो विजातीयश्शिलादितः।।

तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते।

ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात्।।" [३४]

इति वदतैकशब्दस्य स्वगतभेदनिषेधकत्वेन व्याख्यातत्वान्न तेन मिथ्यात्वसिद्धिः।।

भगवान् अनन्तः

अनन्तशब्दो हि भगवतो माहात्म्यमेव वक्ति नतु जगन्मिथ्यात्वम् । तत्त्वप्रदीपिकाकारस्तु "सत्यं ज्ञानमनन्तं" [३५] मित्यनन्तशब्दः जगन्मिथ्यात्वे मानमिति अभिप्रैति । तन्न समीचीनम् । अन्तशब्दो हि परिच्छेदे व्युत्पन्नः, न तु परिच्छिन्ने। तथा चाभेदस्यापरिच्छेदरूपत्वेऽपि यथा देशाद्यपरिच्छेदाभिप्रायेणाकाशोऽनन्त इत्युक्ते देशादेराकाशतुल्यतया सत्त्वे सत्येव तदपरिच्छेदमात्रं सिध्यति, न तु देशादेर्मिथ्यात्वं तथेहापि वस्तुनो घटादेर्जीवचैतन्यवद् ब्रह्मतुल्यतया सत्त्वे सत्येव (प्रतीयमानभेदत्यागेन) "विरुद्धांशत्यागेन" ब्रह्मण्यभेदरूपं वस्त्वपरिच्छेदमात्रं सिध्येत्। न तु वस्तुनो मिथ्यात्वम्। जीवस्वरूपं सत्यं विश्वं तु मिथ्येति विभागस्त्वद्याप्यसिद्धः। वस्तुतस्त्वभेदो नापरिच्छेदः, परिच्छिन्नाद्भेदाभावे अपरिच्छिन्नत्वायोगात्। कालापरिच्छिन्नेऽपि परमाण्वादौ देशपरिच्छेदेन परिच्छिन्नत्वबुद्धिवद् उभयापरिच्छिन्ने गगनादौ भेदमात्रेण परिच्छिन्नत्वबुद्धेरभावाच्च। अनन्तपदेनैव परिच्छिन्नाद् व्यावृत्तेस्त्वयैवोक्तत्वाच्च। भिन्न इत्यर्थे परिच्छिन्न इत्यप्रयोगाच्च। तस्माद् देशकालगुणापरिच्छेद एवानन्तशब्दार्थः।

३. उपसंहारः (Conclusion)

अनेन विचारेण इदं सिद्ध्यति यत् ईश्वरः सकलगुणपरिपूर्णः, निर्दोषः, सत्यसङ्कल्पः, जगज्जन्मादिकारणं च अस्ति। रामकृष्णाद्यवतारेषु दृश्यमानाः दोषाः लौकिकदृष्ट्या आरोपिताः एव, न तु पारमार्थिकाः। सः प्रलयेऽपि विद्यमानत्वात् नित्यः, प्रागभावाभावात् अजातः। 'अद्वितीय'-'एक'-'अनन्त'शब्दाः तस्य सर्वोत्तमत्वं,

सहायरहितत्वं, देशकालानवच्छिन्नत्वं च बोधयन्ति, न तु जगतः मिथ्यात्वम्। अतः भगवान् नारायणः एव परब्रह्म, तस्य च ज्ञानं मोक्षसाधनमिति निर्गलितार्थः।

४. सन्दर्भसूची (References)

[१] श्रीमद्भागवतम् - १.५.१७ (अथवा तदनुरूपश्लोकः)

[२] श्रीमद्भागवतम् - १०.८९ (अथवा तत्सदृशपुराणवाक्यम्)

[३] श्लोकवार्तिकम् - ५५

[४] महाभारतम् - शान्तिपर्व २५.१६

[५] छान्दोग्योपनिषद् - ४.१०.५

[६] मुण्डकोपनिषद् - १.१.९

[७] बृहदारण्यकोपनिषद् - ३.२.१३

[८] बृहदारण्यकोपनिषद् - ४.४.२२

[९] ऋग्वेदः - १.१५४.१ / ८.९९.२

[१०] ऋग्वेदः - १.१५४.४

[११] ब्रह्माण्डपुराणम् / भागवतम्

[१२] हरिवाक्यसुधासिन्धुः - ८.८

[१३] ऐतरेयोपनिषद् - १.१.१

[१४] मीमांसान्यायः

[१५] महाभारतम् / रघुवंशम्

[१६] स्मृतिवाक्यम्

[१७] स्मृतिः (अमरकोशादि)

[१८] श्वेताश्वतरोपनिषद् - ६.८

[१९] श्रीमद्भगवद्गीता - ११.४३

[२०] पैङ्गिरहस्यब्राह्मणम्

[२१] पाद्मपुराणम् / स्मृतिः

[२२] न्यायसुधा - जयतीर्थः

[२३] न्यायसुधा / अनुव्याख्यानम्

[२४] तत्त्वमुक्ताकलापः

[२५] बृहदारण्यकोपनिषद् - ४.३.३२

[२६] छान्दोग्योपनिषद् - ६.२.१

[२७] छान्दोग्योपनिषद् - ६.२.३

[२८] ब्रह्मवैवर्तपुराणम् / स्मृतिः

[२९] अमरकोशः - ३.३.२

[३०] अष्टाध्यायी (पाणिनिः) - ४.१.९३

[३१] अष्टाध्यायी (पाणिनिः) - ४.१.३९

[३२] तैत्तिरीयसंहिता

[३३] कठोपनिषद् - २.२.१३

[३४] पञ्चदशी - २.२०

[३५] तैत्तिरीयोपनिषद् - २.१.१

५. ग्रन्थसूची (Bibliography)

१. बादरायणः. ब्रह्मसूत्रम्.

२. मध्वाचार्यः. अनुव्याख्यानम्.

३. जयतीर्थः. न्यायसुधा.

४. शतानन्दमुनिः. श्रीहरिवाक्यसुधासिन्धुः.

५. चित्सुखाचार्यः. तत्त्वप्रदीपिका.

६. श्रीमद्भागवतपुराणम्.

७. छान्दोग्योपनिषद्.

# भगवतोः निर्गुणत्वस्वरूपविचारः

**श्रीकरः कुलकर्णि**
**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीशतानन्दमुनिविरचित-हरिवाक्यसुधासिन्धुग्रन्थे (६६ तमे तरङ्गे) प्रस्तुतस्य 'भगवतः निर्गुणत्वस्वरूपविचारस्य' विस्तृतं विवेचनं कृतम् अस्ति। अत्र निर्गुणश्रुतीनां सगुणश्रुतीनां च समन्वयः कथं करणीयः इति विचारितम्। अद्वैतवेदान्तोक्तस्य 'निर्विशेषब्रह्मवादस्य' खण्डनं कृत्वा, सगुणश्रुतीनां प्राबल्यं, निर्गुणश्रुतीनां च प्राकृतगुणनिषेधपरत्वं साधितम्। ब्रह्ममीमांसान्यायानां, श्रुतिस्मृतिपुराणवचनानां च आधारेण ब्रह्म 'सर्वगुणपरिपूर्णम्' 'सर्वदोषविवर्जितं' च इति सिद्धान्तः अत्र प्रतिपादितः।

२. विषय-विवेचनम् (Body of the Article)

भगवतोः निर्गुणत्वस्वरूपविचारः

हरिवाक्यसुधासिन्धौ ६६ तरङ्गे-

"निर्गुणं वर्णनं क्वापि क्वाप्यस्ति सगुणं च तत् ।

तत्राद्यं वासुदेवस्य सर्वोपास्यस्य वर्तते ।

अन्यत् सङ्कर्षणादीनां त्रयाणामिति निश्चितम् ।। ५ ।।

तत्र भ्राम्यति धीः श्रोतृवक्तॄणां निर्गुणे पदे।। ६ ।।" [१]

इत्यादिना भगवतः निर्गुणत्वस्वरूपविचारः प्रस्तुतः । तद्विवरणं हीत्थं भवति ।।

तत्र प्रथमतः निर्गुणे प्रमाणं नास्तीति प्रतिपाद्यते । तथाहि किं प्रमाणम् ? न च तत्स्वतः सिद्धम्, । यद् यद्विप्रतिपन्नं तत्सर्वमपि स्वतः सिद्धमिति सुवचत्वाच्च, विप्रतिपत्त्ययोगाच्च, शास्त्रवैयर्थ्याच्च। न चाज्ञाननिवृत्त्यर्थं शास्त्रम्, अज्ञानाविरोधिन्याः

स्वतः सिद्धेर्घटादावपि सुवचत्वात्। न च तत्र प्रत्यक्षं मानम्, अपसिद्धान्तात्, "नेंद्रियाणि नानुमान"मित्यादिश्रुतेश्च, शास्त्रवैयर्थ्याच्च। अत एव नानुमानं। व्याप्त्या व्यापकतावच्छेदकविशिष्टत्वेन पक्षधर्मतया च पक्षसंसृष्टत्वेन सिद्ध्या तेन निर्विशेषासिद्धेश्च। नापि पदरूपः शब्दस्तत्र मानम्, गुणक्रियाजातिरूपनिमित्ताभावेन मुख्यवृत्तेरयोगात्। अस्वीकाराच्च।

वैदिकशब्दस्य डित्थादिवत्सांकेतिकत्वायोगाच्च। आरोपितनिमित्तविशिष्टविषयप्रतीतेश्च निर्विशेषे प्रामाण्यायोगात्। गौण्याश्च मुख्यार्थगुणयुक्ततयैव स्वार्थोपस्थापकत्वात्। लक्षणायाश्च शक्यार्थसम्बन्धितावच्छेदकरूपवत्तयैव स्वार्थोपस्थापकत्वात्। पदस्यान्वयप्रतियोगितावच्छेदकरूपेणैव स्वार्थोपस्थापकतया निर्विशेषे वृत्तिमात्रायोगाच्च। अत एव नोपनिषद्वाक्यरूपः शब्दस्तत्र मानम्, असंसर्गत्वात्। धर्मिज्ञानाधीनविचारजन्यं निर्धारितैककोट्यवलम्बितं सप्रकारकनिश्चयं प्रत्येव तस्य हेतुत्वाच्च। निष्प्रकारकज्ञानं नेत्युक्तत्वाच्च। निर्विशेषविषयकज्ञानस्य निष्प्रकारकत्वे तेन निर्विशेषत्वासिद्ध्या तत्सिद्ध्यर्थमेव विशेषाभावरूपविशेषविषयकत्वस्यावश्यकत्वाच्च। तस्मात्सगुणमेव ब्रह्मेति।

किंच ब्रह्मणो धर्माः किं साधकाभावान्न सन्ति ? उत बाधकसद्भावात्। नाद्यः, 'बृहन्तो ह्यस्मिन्गुणाः', 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।' [२] 'सत्यकामः सत्यसङ्कल्पः' [३] इत्यादिश्रुतीनाम्,

"ब्रह्मेशानादिभिर्देवैः समेतैर्यद्गुणांशकः।

नावसाययितुं शक्यो व्याचक्षाणैश्च सर्वदा।।" [४]

'मय्यनन्तगुणेऽनन्ते' [५]

'तेजो बलैश्वर्यमहावबोध सद्वीर्यशक्त्यादिगुणैकराशिः' [६] 'परःपराणा'मित्यादिस्मृतीनाम्'

'अन्तस्तद्धर्मोपदेशाद्' [७] 'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशाद्', [८]

'अदृश्यत्वादिगुणको धर्मोक्तेः' [९] 'सर्वधर्मोपपत्तेश्च' [१०] इत्यादीनां

निर्णायकसूत्राणाम्

(१) ब्रह्म धर्मिसत्तासमानसत्ताकधर्मवद्, उक्तसत्ताकभावरूपधर्मवद्वा, यावत्स्वस्वरूप-मनुवर्तमानधर्मवद्वा, उक्तविशेषणवद्भावरूपधर्मवद्वा, स्वज्ञानाबाध्यभावरूपधर्मवद्वा, धर्मैर्भावरूपैर्धर्मैर्वा हीनं नावतिष्ठते पदार्थत्वाद्, भावत्वाद्, अभावविलक्षणत्वाद्वा, घटवत्।

(२) ब्रह्म स्वज्ञानाबाध्यप्रकारवत्, स्वारोपितव्यावर्तकस्वज्ञानाबाध्यप्रकारवद्वा, अधिष्ठानत्वाच्छुक्तिवत्।

(३) ब्रह्म स्वज्ञानाबाध्यदुःखव्यावृत्तिमत्, स्वज्ञानाबाध्यदुःखव्यावर्तकधर्मवद्वा, दुःखानात्मकत्वाद् घटवत्।

(४) ब्रह्म स्वज्ञानाबाध्यप्रकारकज्ञानविशेष्यम्, सन्दिग्धत्वाद्, विचार्यत्वात्, निर्णेतव्यत्वाच्च, स्थाणुवत्।

(५) ब्रह्मवेदान्ततात्पर्यगोचरप्रकारवद्, वेदान्तविचारविषयत्वात्, यदेवं तदेवं यथा कर्मकाण्ड विचारविषयो धर्मः।

(६) ईश्वरः सदाऽवाप्तसमस्तकल्याणगुणः, सदा तत्प्रेप्सुत्वे सति तत्र शक्तत्वाद्, यो यदा यत्प्रेप्सुत्वे सति यत्र शक्तः, स तदा तद्वान्, यथा चैत्रः।

(७) ईश्वरः सदा त्यक्तसमस्तदोषः सदातज्जिहासुत्वे सति तत्त्यागे शक्तत्वाद्, यो यदा यज्जिहासुत्वे सति यत्त्यागे शक्तः, स तदा त्यक्ततद्दोषः, यथा चैत्रः। तत्प्रेप्सादिकं च प्रेक्षावत्त्वादिनाविपक्षेऽधिष्ठानत्वसन्दिग्धत्वादिकं न स्यादित्याद्यनुकूल तर्कसनाथानुमानानां च सत्त्वात्।

न चानवस्थानिरासाय कश्चिद्धर्मो निर्धर्मक इति तत्राद्यहेतोर्व्यभिचारः, साध्यस्वरूपस्य निर्धर्मकत्वस्य पदार्थत्वात्मकस्य हेतुरूपस्य च धर्मस्य भावाभावाभ्यां व्याघातात्। प्रमेय त्वाभिधेयत्वादीनामबाधितानुभवबलेन त्वदभिमतमिथ्यात्वदृश्यत्वादिवत् स्ववृत्तित्वाच्च। गोत्वादेरपि गोव्यक्तिरेव वा गोत्वं वा तं स्वाश्रयव्यक्तिं प्रति अन्यस्माद्व्यावर्तकत्वं वा व्यावर्तकमिति न दुःखानात्मकत्वस्य तत्र व्यभिचारः।

न च श्रुतिः सगुणब्रह्मपरा, न तु परब्रह्मपरेति वाच्यम्, सगुणातिरिक्तस्य परस्याद्याप्यसिद्धेः। त्वत्पक्षेऽपि तात्त्विकगुणवद्व्यक्त्यन्तराभावाच्च। "परः पराणाम्" [११] इत्यादिस्मृतौ परात्परत्वोक्तेश्च। अन्यथा 'सदेव सोम्येदम्, असद्वा इदमग्र' [१२] इति सदसत् श्रुती अपि परापरब्रह्मविषये, ग्रहणाग्रहणश्रुती अपि परापरयागविषये स्याताम्। 'असन्नेव स भवति असद् ब्रह्मेति वेद चे'दिति [१३] श्रुतिरपि नासत्त्वनिन्दार्था, किं तु शून्यतापत्तिरूपपरममोक्षपरेति स्यात्। न चेदानीं सगुणं दशान्तरे तु निर्गुणम्। तथात्वेऽपि गुणानामनित्यत्वमात्रापत्त्या त्वदभिमतमिथ्यात्वासिद्धेः।

'ज्ञानं नित्यं क्रिया नित्या बलं नित्यं परात्मनः'। [१४] 'एष नित्यो महिमा ब्राह्मणस्य'। [१५] इत्यादि श्रुतेश्च। 'एष नित्य' इति श्रुतिश्च ब्रह्मपरा, पूर्वत्र नावेदविन्मनुते तं बृहन्तमिति ब्रह्मणः प्रकृतत्वात्। उत्तरत्र न कर्मणा वर्धते नो कनीयान्। तस्यैव स्यात् पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति ब्रह्मलिङ्गात्। बृहदरण्यके सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः। स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्। एष सर्वेश्वर एष भूताधिपतिः एष भूतपाल इत्यादिना ब्रह्मोक्त्वा तत्र संमतित्वेन तदेतदृचाभ्युक्तमिति एष नित्य इत्यादिमन्त्रस्योदाहृतत्वाच्च। अन्यथा ब्रह्मेदानीं सद्दशान्तरे त्वसदिति स्यात्। न चौपाधिका धर्माः औपाधिकत्वस्य सोपाधिकाध्यस्तत्वरूपत्वे श्रुत्यप्रामाण्यापातात्। वक्ष्यमाणसत्यत्वश्रुतिविरोधाच्च। उपाधिकृतत्वरूपत्वे तूक्तनित्यत्वश्रुतिविरोधाद्, अन्तःकरणादिरूपोपाधिसृष्टेः प्रागेवेक्षितृत्वादिश्रुतेश्च। स्वाभाविकी ज्ञानबलक्रिया चेत्यादि श्रुतेश्च। न च योगलब्धयोगिशक्त्यादिवैधर्म्यमात्रेण तदुक्तिः, सङ्कोचकाभावेनोक्तनित्यत्वश्रुत्यनुसारेण स्वाभाविकज्ञानसमभिव्याहारेण चोपाधिमात्रनिषेधात्। अन्यथा ब्रह्मणः सत्त्वमौपाधिकम् असत्त्वं तु स्वाभाविकमिति स्यात्।

न चातात्त्विका गुणाः। श्रुत्या गुणमात्रोक्त्या तात्त्विकानुक्तेरिति वाच्यम्, नित्यत्वोक्तिसामर्थ्याद्, विषयाबाधलक्षणप्रामाण्यस्यौत्सर्गिकत्वात्, 'सत्यः सोऽस्य महिमे'त्यादि [१६] श्रुतेश्च तत्सिद्धेः। अन्यथा सत्यं ज्ञानं तत्त्वमसीत्यादि श्रुत्युक्तं ब्रह्मसत्त्वैक्यादिकमपि तात्त्विकं न स्यात्। निर्गुणश्रुतिविरोधस्तूद्धरिष्यते।

किं च तद्विरोधेऽपि श्रुतेर्नातात्त्विकविषयता युक्ता। उक्तं हि-

"को हि मीमांसको ब्रूयाद्विरोधे शास्त्रयोर्मिथः।

एकं प्रमाणमितरत्त्वप्रमाणं भवेदिति।।" [१७] इति ।

तथा हि पूर्वतन्त्रे प्राप्तबाधोऽप्राप्तबाधश्चेति द्विविधो बाध उक्तः। तत्र दाशमिके प्राप्तबाधे प्रकृतिवत्कुर्यादित्यादिरूपस्य प्राप्तस्य चोदकादेः कृष्णलादाववघातवर्जमित्यादिरूपः संकोच एव। एवं तार्तीयेऽप्यप्राप्तबाधे गार्हपत्यमिति द्वितीयाश्रुत्यनुसारेणेन्द्र शब्दप्रयुक्तमन्त्रलिङ्गस्य गार्हपत्ये गौणत्वादिकमेव।

एवं व्याकरणेऽपि परेण पूर्वस्य, नित्येनानित्यस्य, अन्तरङ्गेण बहिरङ्गस्य, प्रतिपदोक्तेन लक्षणोक्तस्येत्यादिर्बाध उक्तः। तत्रापि सङ्कोच एव एवं ब्रह्ममीमांसायामपि

'विकारशब्दान्नेति चेन्न प्राचुर्याद्,' [१८] 'उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्,' [१९] 'गौण्यसम्भवात्' [२०]

इत्यादौ शास्त्रयोर्विरोधे तात्त्विकार्थान्तरपरत्वमेवोक्तम्, न त्वारोपितार्थत्वम्। अन्यथा ईक्षत्याद्यधिकरणेषु सिद्धान्तसाधकानाम् ईक्षणादीनां साङ्ख्याद्यभिमतप्रधानादा वारोपसम्भवात् क्वापि सिद्धान्तो न सिध्येदिति सर्वमपि शास्त्रमुन्मूलितं स्यात्।

किं च दशमे विकृतिभूतमहापितृयज्ञप्रकरणस्थे नार्षेयं वृणीते-इत्यादिवाक्ये प् रकृतिवत्कुर्यादार्षेयवरणवर्जमिति महापितृयज्ञीयप्रकृतिवच्छब्दैकवाक्यतया पर्युदासादार्थत्वमेवेत्युक्त्वा यत्र प्रकृतिभूतदर्शपूर्णमासप्रकरणस्थाज्यभागविधायकवा क्य सन्निहिते 'न तौ पशौ करोति' इत्यादौ पाशुकप्रकृतिवच्छब्दैकवाक्यत्वयोगेन नञः पर्युदासार्थत्वासम्भवात्, प्रकृतिवत्कुर्यादाज्यभागौ तु न कुर्यादिति वाक्यभेदेन प्रसज्यप्रतिषेधार्थत्वमेव युक्तं तत्र पशावाज्यभागयोरन्येनाप्रसक्तेः, शास्त्रप्रसक्तस्य च सर्वथा बाधायोगात् विकल्प इत्युक्तम्।

एवं च यदा प्रतिषेधोन्नीतप्रसक्तेरपि न सर्वथा बाधः तदा किमु वक्तव्यं प्रत्यक्षसगुणशास्त्रप्रमितानां गुणानां न सर्वथा बाध इति ? ननु निर्गुणवाक्येन निषेद्धुं सगुणवाक्यस्यानुवादकत्वेनैकवाक्यत्वसम्भवे वाक्यभेदेन गुणप्रापकता न युक्तेति

चेन्न, सत्यकामत्वादीनामन्यतोऽप्राप्तेः। श्रुतिप्राप्तस्य च श्रुत्या निषेधेऽहिंसावाक्यमग्नीषोमीयहिंसायाः अग्रहणवाक्यं च षोडशिग्रहणस्य असद्वेत्यादिवाक्यं च ब्रह्मसत्त्वस्य भेदवाक्यं चैक्यस्य निषेधकं स्यादित्युक्तत्वात्।

किं च सृढमृदेत्यादिविधिर्नत्त्वासेडिति निषेधस्येव सगुणवाक्यमेव निर्गुणवाक्यस्य बाधकं किं न स्यात् ? न च जगत्कर्तृत्वाक्षिप्तस्य सार्वज्ञ्यादेर्निषेधायानुवादः। श्रुत्याक्षिप्तस्य पुनः श्रुत्या निषेधायोगात्। अन्यथा श्रुतेन ज्ञाननिवर्त्यत्वेन जगदारोपाधिष्ठानत्वेन 'स एवेदं सर्वमि'ति श्रुतेन जीवब्रह्मणोः सार्वात्म्येन चाक्षिप्तं सर्वमिथ्यात्वं ब्रह्मसत्त्वं जीवब्रह्मैक्यं च 'विश्वं सत्यमि'त्यनेन 'असद्वा इदमि'त्यनेन 'द्वा सुपर्णे'त्यनेन च निषेद्धुं 'नेह नाने'त्यनेन सत्यं ज्ञानमित्यनेन तत्त्वमसीत्यनेन चानूद्यत इति स्यात्। किं च श्रुत्याक्षिप्तस्य सार्वज्ञ्यादेः श्रुत्या निषेधेऽपि श्रुतस्य सर्वकर्तृत्वादेः कथं निषेधः ? किं चाद्वैतश्रुतेर्निर्गुणश्रुत्यन्तरस्य वा तात्पर्यपरिज्ञानप्राप्तं निर्गुणत्वमेव सगुणवाक्येन निषेद्धुं सगुणवाक्येनानूद्यत इति किं न स्यात् ? वैगुण्यमेव पश्यन्ति न गुणान्विनि नियुंजत इति भारतोक्तेः। किं च निर्गुणवाक्य एव साक्षी चेतेत्यादिना द्रष्टृत्वादिगुणविधानान्न तेन निषेध इति न तदर्थं सावज्ञ्यादि वाक्यमनुवादकम्। अन्यथा सार्वज्ञ्यादेर्व्यावहारिकं सत्त्वमपि न स्यात्। न हि निषिद्धे ब्राह्मणहननादौ अवान्तरमपि तात्पर्यम्। न चौपनिषदस्य ब्रह्मणः सार्वज्ञ्यादिकमनुमानादिसिद्धम्। ननु सगुणवाक्यं वाचं धेनुमुपासीतेत्यादिवदुपासनार्थम्, उपासनायाः कर्तव्यत्वे गुणेषु च तात्पर्ये वाक्यभेदादिति चेन्न-

"उपासनायाः कार्यत्वे विष्णोरात्मत्व एव च।

उभयत्रापि तात्पर्यमात्मोपासादिके विधौ।।" [२१]

इति स्मृतिविरोधात्। 'यः सर्वज्ञ' इत्यादौ उपासनाविधेरश्रवणाच्च। कल्पनस्य च निर्गुणवाक्येऽपि शक्यत्वात्। इति भगवतो निर्गुणत्वप्रमेयविवरणविचारः ।।

३. उपसंहारः (Conclusion)

अनेन विचारेण इदं सिद्ध्यति यत् ब्रह्म न निर्विशेषं, किन्तु सविशेषं सगुणं

च। निर्गुणश्रुतीनां तात्पर्यं प्राकृतगुणनिषेधे एव, न तु कल्याणगुणनिषेधे। 'सत्यकामः सत्यसङ्कल्पः' इत्यादिश्रुतिभिः, 'परास्य शक्तिः' इत्यादिसुत्रैः च ब्रह्मणः अनन्तगुणपरिपूर्णत्वं सिद्धम्। सगुणनिर्गुणश्रुत्योः अविरोधाय सगुणत्वं पारमार्थिकं, निर्गुणत्वं तु दोषराहित्यपरमिति निर्णयः।

४. सन्दर्भसूची (References)

[१] हरिवाक्यसुधासिन्धुः - ६६.५-६

[२] श्वेताश्वतरोपनिषद् - ६.८

[३] छान्दोग्योपनिषद् - ८.१.५

[४] श्रीमद्भागवतम् / विष्णुपुराणम्

[५] श्रीमद्भागवतम् - ११.११.६ (अथवा तद्भाष्याणि)

[६] विष्णुपुराणम् - ६.५.७९

[७] ब्रह्मसूत्रम् - १.१.२१

[८] ब्रह्मसूत्रम् - १.२.१८

[९] ब्रह्मसूत्रम् - १.२.२१

[१०] ब्रह्मसूत्रम् - २.१.३७

[११] विष्णुपुराणम् / महाभारतम्

[१२] छान्दोग्योपनिषद् - ६.२.१ / तैत्तिरीयोपनिषद् - २.७

[१३] तैत्तिरीयोपनिषद् - २.६.१

[१४] विष्णुरहस्यम् / स्मृतिः

[१५] बृहदारण्यकोपनिषद् - ४.४.२३

[१६] छान्दोग्योपनिषद् - ३.१४.१ (अथवा शतपथब्राह्मणम्)

[१७] श्लोकवार्तिकम् (जैमिनिः)

[१८] ब्रह्मसूत्रम् - १.१.१४

[१९] ब्रह्मसूत्रम् - २.३.३६

[२०] ब्रह्मसूत्रम् - १.१.३

[२१] अनुव्याख्यानम् / न्यायसुधा

५. ग्रन्थसूची (Bibliography)

# श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः नवमाध्यायभाष्यद्वयस्य तुलनात्मकमध्ययनम्

**डा. श्रीनिधि वि.**

**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः नवम-दशमाध्याययोः रामानुजभाष्येण सह तुलनात्मकं अध्ययनं कृतम् अस्ति। नवमाध्याये 'राजविद्याराजगुह्ययोग'स्य स्वरूपं, 'तमप्' प्रत्ययस्य स्वारस्यं, भक्तियोगस्य श्रेष्ठत्वं च अत्र विवेचितम्। दशमाध्याये 'विभूतियोग'स्य व्याख्याने रामानुज-गोपालानन्दयोः मतभेदः, तमःशब्दार्थविचारः, विभूतीनां वर्गीकरणं च सविस्तरं प्रस्तुतम्। उभयोः भाष्ययोः साम्य-वैषम्य-प्रदर्शनेन गीतायाः गभीराशयः अत्र स्पष्टीकृतः।

२. विषय-विवेचनम् (Body of the Article)

श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः नवमाध्यायभाष्यद्वयस्य तुलनात्मकमध्ययनम्

आशुतोषमणि त्रिपाठी

नवमाध्यायावतरणिकाभाष्ये रामानुजीये भक्तिरूपस्योपासनस्य स्वरूपमुच्यते इत्युक्तम् । गोपालानन्दभाष्ये तदेव एकान्तिकभक्तियोगो निरूप्यते इति भक्तिविशेषस्य स्वरूपमुक्तम् । प्रथमश्लोकभाष्ये "इदं तु ते गुह्यतमम्" [१] इत्यस्य व्याख्यानमतीव मनोहरं गोपालानन्दभाष्ये । तमप्प्रत्ययो हि प्रयुक्तो भगवता । तस्यायं भावः गुह्य-गुह्यतर-गुह्यतमसद्भाव एव तमप् प्रयोक्तव्यः । तर्ह्यत्र कथं ज्ञानं गुह्यतमं भवति । किं वा गुह्यं किंवा गुह्यतरमिति। तदेतत् न स्पष्टीकृतं रामानुजभाष्ये । गोपालानन्दभाष्ये तु ब्रह्मादिदेवोपासनं गुह्यम् , ततः अक्षरोपासनं गुह्यतरम्, ततोपि गोप्यतमं ज्ञानमिति तमपो सार्थक्यं प्रतिपादितम् । तुशब्दार्थोपि क इति न स्पष्टः रामानुजीये । अत्र

तु वैलक्षण्ये तुशब्दप्रयोग इति स्वारस्यं प्रतिपादितम् ।।

तत्रादौ भगवान् स्वोपदिश्यमानविद्यायामादरजननायेयंविद्या अतिश्रेष्ठाऽतिगुह्या चेति वदति । अपरोक्षज्ञानसाधनभूताया एतस्या विद्याया अयं संक्षेपः ॥अव्यक्तशरीरेण भगवता सर्वमिदं जगद् व्याप्तम् । सर्वभूतानि तदधीनानि, न तु स तदधीनः । भगवदाश्रयेण सर्वपदार्थानां स्थितत्वेऽपि भगवत्पदार्थयोरन्योन्यधर्मसङ्क्रातिर्नास्ति । इदं परमेश्वरस्यैश्वर्यलक्षणसामर्थ्यम् । अत्र आकाशस्थितः सर्वगो वायुरेव दृष्टान्तः । न हि आकाशस्थितो वायुः तद्धर्मानाप्नोति । नाप्यकाशः स्वस्थितवायुधर्मानाप्नोति ॥

प्रलयकाले सर्वभूतानि भगवदधीनप्रकृतौ लीयन्ते । सृष्टिकाले भगवान् प्रकृतेः पुनस्सर्वभूतानि सृजति । एवं सृष्ट्यादि कुर्वन्नपि भगवान् कर्मभिर्न निबध्यते, तस्यैव कर्मनियामकत्वात् । असक्तेः भगवानुदासीन इवास्ते । सोऽध्यक्षः सन् प्रकृतेः चराचरप्रसवितृत्वं नियामयति । एवं महामहिमानमपि भगवन्तं मानुषशरीरसदृशशरीरवन्तं दृष्ट्वा तस्योत्तमां स्थितिमजानन्तो मूढा भगवन्तमवजानन्ति । एतन्मोहस्य मूलकारणं तेषामासुरराक्षसस्वभावत्वम् । एतत्फलं तु तेषां ज्ञानकर्मांशानां व्यर्थत्वम् । न केवलमेतावत् । परत्र नरकानन्तरं तमःप्राप्तिश्च । एतद्विरुद्धस्वभावा दैवीं प्रकृतिमाश्रिता महात्मानो भगवन्माहात्म्यं यथावज्ज्ञात्वा सततं कीर्तयन्तः एकादश्यादिव्रतानाचरन्तो नमस्यन्तश्च नित्यं मनोयोगं कुर्वाणा उपासते । पाञ्चरात्रिकाः अनेकप्रकारेण व्यूहरूपं भगवन्तं ज्ञानयज्ञेन यजन्ते ॥

सप्तमाध्यायोक्तरीत्या तत्तन्नियन्तृत्वेन तत्तद्भोक्तृत्वेन च भगवान् क्रत्वादिशब्दवाच्यः । स एव सर्वाश्रयः प्रलयेऽन्यत्रापि संहारको जगद्व्यञ्जकत्वाद् बीजशब्दवाच्यः सर्वस्वामी । स एव सूर्यादिषु स्थित्वा तपनवर्षणादिनियामक इति ॥

द्विविधा विष्णुभक्ताः - त्रैविधा भागवताश्चेति । तत्र त्रैविद्याः स्वर्गादिकामनया भगवद्याजिनः, इतरदेवताः पूजयित्वाऽन्ते भगवति समर्पकाश्च । भागवतास्तु केवलं भगवद्याजिनः, भगवत्परि-वारतयैवान्यदेवतायाजिनो निराकांक्षाश्च । एतयोर्मध्ये त्रैविद्याः स्वर्गादिस्थानं प्राप्य पुण्यभोगान्ते मर्त्यलोकं पुनरागच्छन्ति ।

अनन्यचिन्तकभागवतानां भगवानेव योगक्षेमं वहति ॥

यद्यपि अन्यदेवता भक्ता अपि अन्ततो भगवन्तमेव यजन्ते । तथाऽपि तेषां भगवत एव सर्वयज्ञभोक्तृत्वादिकमिति ज्ञानं स्फुटं नास्ति । अतस्ते च्यवन्ति । देवपितृभूतयाजका देवपितृभूतानेव यान्ति । भगवद्याजिनो भगवन्तमेव यान्ति । भगवत्तोषार्थं महापूजासाधनानि नापेक्षितानि । किन्तु भक्त्या प्रदत्तेन पत्रादिनैवालम् । एवं भक्तिसुलभभगवत्तोषेण महापुरुषार्थस्य साध्यत्वात् यद्यत् क्रियतेऽश्यते हूयते दीयते तप्यते च तत्तत् भगवदर्पणं कुर्यात् । एवंविधसन्न्यासयोगयुक्तो मुक्तो भविष्यति । भक्त्यनुसारेण भगवदनुग्रहो भवति । प्रायस्तद्भक्तो दुराचारो न भवति । तथापि देवादिः यदि बहुपुण्यसम्पादनानन्तरं कथञ्चिद् भवति सुदुराचारः तर्हि साधुरेव स ज्ञातव्यः, यतः स क्षिप्रं धर्मात्मा भवति । भगवद्भक्तः कदाचिदपि न प्रणश्यति ॥

पापं कृत्वा ये स्त्रीशूद्रादिपापयोनिषु जातास्तेऽपि भगवन्तमाश्रित्य परां गतिं यान्ति । पुण्यं कृत्वा विप्रादियोनिषु जाता यान्तीति किमु वक्तव्यम् । अतो भगवन्मना भगवक्तो भगवद्याजी च भूत्वा भगवति प्रह्वश्चेत् भगवन्तमेवैष्यति भगवत्परायणः इति सर्वं समञ्जसम् ॥

अत्र अव्यक्तमूर्तिना इति मूर्तावुक्तायां सा मूर्तिरस्मदादीनामिव भिन्नेति भ्रान्तः स्यान्मन्दानाम् । तन्निरासार्थं यथा भूतधारकत्वं भगवल्लक्षणमभिहितं तदत्र देहस्योच्यत इति ॥

अथ दशमाध्यायभाष्यद्वयस्य तुलनात्मकमध्ययनम्

"तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" [२] इति दशमाध्याय उल्लिखितोऽयं श्लोकः। अत्र रामानुजीये तमःशब्दार्थः न निरूपितः. गोपालानन्दभाष्ये तु तमो नाम मोह इत्यर्थः सहेतुकं प्रतिपादितः । तथाहि- तमः –तमोरूपम् लोभकामक्रोधमानादिदोषनिकरजनकं मोहम् इत्यर्थः। तथाच लोभादिमध्ये संसारबन्धस्य कारणं हि स्पष्टयन् गोपालानन्दीयभाष्यम् उत्तरत्र प्रमाणवचनमप्युल्लिखति

।

“यथार्चिष्मान् ऊर्ध्वशिखः कक्षं दहति पावकः ।

तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम्” [३] इति मानमुक्तम्।।

किंच “आहुस्त्वामृषयः सर्वे” [४] इति गीतावाक्यव्याख्यानावसरे रामानुजभाष्ये ऋषिवचनत्वेन महाभारतवचनान्युदाहृतानि । “एष नारायणः श्रीमान्” इत्यारभ्य “मधुसूदन” इत्यन्तेन वनपर्वीय ८८ तमअध्यायगतानि वचनानि । तानेवात्राप्युद्धृतानि । परं तु ततः परं ९० तमअध्यायवचनोल्लेखः “यत्र नारायणो देवः परमात्मा सनातनः । तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च । तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं तत् तपोवनम्” [५] । इत्यादिदिशा रामानुजीयभाष्ये कृतानि । परंतु गोपालानन्दीये तानि विहाय अन्तिमश्लोकार्धमात्रमुद्धृतम् । तत्र कारणं न जानीमः। तथा तत्रैव गीतावाक्योद्धारेपि कृष्णस्यादिमवाक्यानि विहाय अन्तिमवाक्यमात्रमृद्धृतं गोपालानन्दभाष्ये ।।

अध्यायसारसंग्रहस्तु एवं भवति । तत्रादौ भगवान् स्वमाहात्म्यातिशयं वक्ति ॥ मम महिमानं ममोत्पत्तिं मत्तो जगदुत्पत्तिं च देवर्ष्यादयोऽपि न जानन्ति । यो मामेवमनादिं जानाति स सर्वपापविमुक्तो भवति । ज्ञानाज्ञानसुखदुःखादि सर्वे धर्मा भूतानां मत्त एव भवन्ति । ब्राह्मणादिभेदेन चतुर्विधा देवाः स्वायम्भुवादि चत्वारो मनवो मरीच्यादिसप्तर्षयश्च मम मानसाः पुत्राः । एतन्मम विशिष्टभवनं महत्त्वं च यो वेत्ति स ध्यानयोगी भवति । ज्ञानदीपेनाहं तत्तमो हरिष्यामीति ॥

एवमुपदिष्टोऽर्जुनो भगवद्विभूतीर्बुभुत्सुः प्रार्थयते । तदुत्तरत्वेन भगवानाध्यायसमाप्ति स्वविभूतीर्वक्ष्यति ॥

विभूतयो नाम वस्तूनां विशिष्टताप्रदरूपाणि विविधस्वरूपाणि च । तानि च कानिचित् स्वजातीयवस्तुमध्ये कस्यचिद्वस्तुनो विशिष्टत्वप्रदानि सजातीयविभूतिरूपाणीत्युच्यन्ते । कानिचन स्वजातीयवस्तूनां मध्ये किञ्चिद्विहायेतरेभ्यो विशिष्टत्वप्रदानि सजातीयैकदेशविभूतिरूपाणि इत्युच्यन्ते । कान्यपि विजातीयवस्तुमध्ये

विशिष्टत्वदायीनि विजातीयविभूतिरूपाणि इत्युच्यन्ते । कानिचित्पुनः साक्षात् भगवत्स्वरूपाण्येव सहजविभूतिरूपाणीत्युच्यन्ते ॥

तत्राद्यानि यथा- मनुष्यदृश्यानां ज्योतिषां मध्ये रविर्विशिष्टः, मरुतां मध्ये मरीचिर्विशिष्टः, इन्द्रियाणां मध्ये मन इत्यादि । तत्र रव्यादिषु स्थित्वा तेषां विशिष्टत्वप्रदानि रव्यादिसनामकानि भगवद्रूपाणि सन्ति ॥

द्वितीयानि यथा वेदानां मध्ये ऋग्वेदं विहाय सामवेदो विशिष्टः, पाण्डवेषु भीमं विहाय धनञ्जयो विशिष्टः, देवेषु ब्रह्मरुद्रौ विहाय वासवो विशिष्ट इत्यादि । तत्र सामादिषु स्थित्वा तेषां सजातीयैकदेशे विशिष्टत्वप्रदानि तत्सनामकानि भगवद्रूपाणि सन्ति ।

तृतीयं यथा विजातीयनक्षत्राणां मध्ये शशी चकास्ति । तत्र शशीनामकं भगवद्रूपं वर्तते ।

चतुर्थानि यथा- आदित्यानां विष्णुर्विशिष्टो वृष्णीनां वासुदेवश्शस्त्रभृतां रामो भगवान् कपिलः सिद्धानामिति । एते विष्ण्वादयो साक्षाद् भगवानेव ॥

सत्ववतां सत्वम्, ज्ञानवतां ज्ञानमित्यादीनि तु पञ्चमानि विभूतिरूपाणि यानि धर्मिषु सत्वादिसारधर्मप्रदानि । एवं विधानि विभूतिरूपाणि पृथक् पृथक् सङ्कीर्य भगवान् वक्ति । संक्षेपत एव विभूतिवर्णनं कृतम् । संक्षेपकरणं च विभूतीनामनन्तत्वादेव ।

विभूतिविस्तरश्च लक्षणोक्तिपूर्वकमुच्यते । यद्यद्वस्तु स्वजातितः श्रैष्ठ्योपेतं सम्पद्युक्तमुत्कृष्टं वा तत्तद्वस्तु भगवद्विभूतियुक्तं जानीयात् । इतोऽप्यधिकं पार्थादिमहाधिकारिवेद्यं विभूतिरूपं वर्तते । तदेकांशेन सर्वजगद्व्याप्य स्थितम् । सर्वांशेन व्याप्तुं जगत्सहस्रमपि नालमिति ॥

३. उपसंहारः (Conclusion)

अनेन प्रकारेण रामानुजभाष्य-गोपालानन्दभाष्ययोः नवम-दशमाध्यायविषयिणी तुलना समाप्ता। गोपालानन्दमुनिः 'तमप्' प्रत्ययव्याख्याने, 'तमः' शब्दार्थनिरूपणे, विभूतीनां सूक्ष्मवर्गीकरणे च स्वकीयं वैशिष्ट्यं प्रदर्शितवान्। रामानुजभाष्यं

यद्यपि मूलम्, तथापि गोपालानन्दभाष्यं तस्यैव सिद्धान्तस्य विशदीकरणं, क्वचित् नूतनार्थद्योतनं च करोति इति सिद्धम्।

४. सन्दर्भसूची (References)

[१] श्रीमद्भगवद्गीता - ९.१

[२] श्रीमद्भगवद्गीता - १०.११

[३] विष्णुपुराणम् - ६.८.२७

[४] श्रीमद्भगवद्गीता - १०.१३

[५] महाभारतम् - वनपर्व (९०.२६)

५. ग्रन्थसूची (Bibliography)

१. व्यासः, वेदः. श्रीमद्भगवद्गीता.

२. रामानुजाचार्यः. गीताभाष्यम्.

३. गोपालानन्दमुनिः. गीताभाष्यम्.

४. व्यासः, वेदः. महाभारतम् (वनपर्व).

५. विष्णुपुराणम्.

# शोधप्रबन्धस्य शीर्षकम् - भगवच्छास्त्रे दशविधहेतुनिरूपणम् (अष्टम-नवम-दशम-हेतवः)

**प्रदीपसिंहाचार्यः चतुर्वेदः**
**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीवैखानससूत्रस्य सर्वसूत्रोत्तमत्वं प्रतिपादयितुं प्रस्तुतेषु दशविधहेतुषु अन्तिमहेतुत्रयस्य (अष्टम-नवम-दशम-हेतूनां) विचारः कृतः अस्ति। तत्र अष्टमहेतुत्वेन 'मन्वाद्यैः स्वीकृतत्वात्', नवमहेतुत्वेन 'अखिलजगदेककारण भूतश्रीमन्नारायणैकपरत्वात्', तथा च दशमहेतुत्वेन 'तत्सूत्रोक्तधर्मानुष्ठानवतामेव भगवत्प्रियतमत्वोपपत्तेः' इति विषयाः निरूपिताः। अन्यसूत्राणाम् अनैकान्तित्वं प्रदर्श्य वैखानससूत्रस्यैव नारायणैकपरत्वं, शिष्टपरिगृहीतत्वं, मोक्षप्रदत्वं च अत्र शास्त्रप्रमाणैः स्थापितम्।

२. विषय-विवेचनम् (Body of the Article)

भगवच्छास्त्रे दशविधहेतुनिरूपणम्

सत्यनारायणः, मैसूरु

परब्रह्मणः श्रीमन्नारायणादुत्पन्नेन विखनश्शब्दवाच्येन चतुर्मुखब्रह्मणा प्रणीतवैखानससूत्रस्य सर्वसूत्रोत्तमत्वे तत्सूत्रोक्तधर्मानुष्ठानवतां सर्वोत्कृष्टतमत्वे च हेतवो निरूप्यन्ते । -तन्मध्ये

५. वैखानससूत्रं सर्वसूत्रोत्तमं निषेकसंस्कारादिबोधकत्त्वात् ।

६. वैखानससूत्रं सर्वसूत्रोत्तमं अष्टादशशारीरसंस्कारप्रतिपादकत्वात् ।

७. वैखानससूत्रं सर्वसूत्रोत्तमं साङ्गक्रियाकलापवत्त्वात् ।

इति हेतवः पूर्वं विचारिताः। इदानीं अष्टम-नवम-दशमहेतवः विचार्यन्ते।

अथ अष्टमहेतुनिरूपणम्

वैखानससूत्रं सर्वसूत्रोत्तमं मन्वाद्यैः स्वीकृतत्वात् इत्यनुमानं सर्वोत्तमत्वे अष्टमहेतुनिरूपणपरम् । तथाच श्रुतिस्मृतिपुराणादिभिः सर्वोत्तमत्वेनावगतस्य श्रीवैखानसूत्रस्य अखिलशिष्टपरिगृहीतत्वमस्तीति दर्शयितुं मन्वाद्यैः स्वीकृतत्वादिति अष्टमो हेतुः निरूप्यते । तथाहि – मनुः –

"अतः परं प्रवक्ष्यामि धर्मं वैखानसाश्रयम्" [१] इत्यारभ्य

"पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा ।

कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः ॥" [२] इति

व्यासः –

"मूलैरेके फलैरेके पुष्पैरेके दृढव्रताः ।

वर्तयन्ति यथान्यायं वैखानसमते स्थिताः ॥" [३] इति ।

शङ्खलिखितौ –

"श्रामणकेनाग्निमाधाय काले कुरुविन्द-वेणु-श्यामाकनीवारादिभिर्वर्तयेत्" [४] इति । हारीतः बोधायनः इत्येवमादयश्चैवमेवाहुः । अतः श्रुतिस्मृतिपुराणादिभिः प्रमाणत्वेनावगतस्य श्रीवैखानससूत्रस्य अखिलशिष्टपरिगृहीतत्वात् प्रामाण्यातिशयोऽस्तीति 'मन्वाद्यैस्स्वीकृतत्वात्' इति निरूपितोऽष्टमो हेतुः । इत्यष्टमहेतुनिरूपणम् ।

अथ नवमहेतुनिरूपणम्

वैखानससूत्रं सर्वसूत्रोत्तमं अखिलजगदेककारणभूतश्रीमन्नारायणैकपरत्वात् इति नवमो हेतुः । अत्र चापस्तम्बादिसूत्रान्तरनिष्ठानां सूत्रकारादारभ्य अविच्छिन्नत्वेन परम्परया एकान्तित्वं नास्तीति, तथा वैखानससूत्राणामेव तत् सम्भवतीति च प्रतिपाद्यते । तथाच

"प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम् ।

त्रयं सुविदितं ज्ञेयं धर्मसिद्धिमभीपसता ॥" [५]

इति मनुस्मरणानुसारेण प्रत्यक्षादिभिरवगमयितुञ्च अखिलजगदेककारणभूत-श्रीमन्नारायणैकपरत्वादिति नवमो हेतुर्निरूप्यते इत्युक्तं भवति ।

आधाने– "ध्यायन्नारायणमुपोष्य" इति,

अग्निहोत्रे – "भूमानं विष्णुं ध्यायेत्" इति,

दर्शपूर्णमासे – "उदित आदित्ये ध्यायन्नारायणं 'विष्णोर्नुकम्' इति जपित्वा" इति,

सोमे च – "नारायणपरायणः तूष्णीमास्ते"

इति च सर्वत्रापि अभ्यासेन नारायणपरत्वेनोक्तत्वात् इदं सूत्रं नारायणपरमेव । आपस्तम्बादिसूत्रेषु सर्वसंस्काराणां सद्वारकत्वेन प्रतिपादनात् नारायणैकपरत्वेन सकृदपि स्मरणाभावात् तेषां न नारायणैकपरत्वम् ।।

ननु बोधायनेनापि

"अथातो विष्णुप्रतिष्ठाकल्पं व्याख्यास्यामो द्वादश्यामेकादश्यां श्रोणायां वा यानि चान्यानि शुभनक्षत्राणि" इत्यारभ्य "द्वादशनामभिः अमुष्मै स्वाहा अमुष्मै स्वाहा"

इत्यादिना होमादिकमुक्त्वा

"त्वामेकमाद्यं पुरुषं पुरातनं नारायणं विश्वसृजं यजामहे ।

त्वमेव यज्ञो विहितो विधेयः त्वमात्मनाऽत्मन् प्रतिगृह्णीष्व हव्यम् ॥" [६]

इति नारायणैकपरत्वेन प्रतिपादनात् कथं तेषां नारायणैकपरत्वं नास्तीत्युच्यत इति चेत् – सत्यम् । आपस्तम्बादीनामाचार्येण बोधायनेन नारायणैकपरत्वेन प्रतिष्ठादिकमनुक्तम् । किन्तु

"अथ रुद्रप्रतिष्ठाविधिं व्याख्यास्यामः चतुर्थ्यामष्टम्यामार्द्रायामपभरण्यां वा यानि चान्यानि शुभनक्षत्राणि" इति प्रकृत्य "भवाय देवाय स्वाहा" इत्यादिभिः "भवस्य देवस्य पत्न्यै स्वाहा" इत्यादिभिश्च होमादिकमुक्त्वा

"त्वामेकमाद्यं पुरुषं पुरातनं रुद्रं शिवं विश्वसृजं यजामहे ।

त्वमेव यज्ञो विहितो विधेयस्त्वमात्मनाऽऽत्मन् प्रतिगृह्णीष्व हव्यम् ॥"

इति शिवप्रतिष्ठा, एवं

"अथातो महादेवस्याहरहः परिचर्याविधिं व्याख्यास्यामः"

इति रुद्रपूजा च प्रतिपादिता । एवं

"आदित्यमम्बिकां विष्णुं गणनाथं महेश्वरम्"

इति पञ्चपूजा चोक्ता । अतः बोधायनसूत्रं नारायणैकपरं न भवति । वैखानसानां सूत्रकारादारभ्य अविच्छिन्नत्वेन श्रीमन्नारायणैकपरत्वे-नाराधनादिकं प्रत्यक्षसिद्धम् ।

ननु- किमर्थं नारायणैकपरत्वेन सूत्रं प्रणीतमिति चेत्- उच्यते । नारायणः परंब्रह्म अखिलजगदेककारणत्वात् परमात्मादिशब्दवाच्यत्वात् अपवर्गादिफलदत्वात् समाभ्यधिकरहितत्वाच्च इत्यादिना अनुमानेन नारायणैकपरत्वेन भगवतः परब्रह्मत्वम् उच्यते ।

"नारायणाद्ब्रह्मा जायते । नारायणादिन्द्रो जायते । नारायणाद्द्वादशादित्याः रुद्राः वसवस्सर्वाणि च भूतानि । नारायणादेव समुत्पद्यन्ते । नारायणात्प्रलीयन्ते" [७] इत्याद्याः

"अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" [८]

"तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते" [९]

"उतामृतत्वस्येशानः" [१०]

"न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते" [११]

"परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" [१२]

"एष सर्वभूतान्तरात्मा दिव्यो देव एको नारायणः" [१३]

"एको ह वै नारायण आसीत्" [१४]

"यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति

। तद्विजिज्ञासस्व । तद्ब्रह्म" [१५]

"पतिं विश्वस्यात्मेश्वरम्" [१६]

इत्याद्याश्च श्रुतयः प्रमाणम् ।

किञ्च- "सनो देवः शुभया स्मृत्या संयुनक्तु" । इत्यनेन

"आरोग्यं भास्करादिच्छेत् श्रियमिच्छेद्धुताशनात् ।

शङ्करात् ज्ञानमन्विच्छेत् मोक्षमिच्छेज्जनार्दनात् ॥" [१७]

इति ज्ञानप्रदत्वात् शङ्करोपासनमुच्यते । अतो भगवता नारायणेन साम्यं ब्रह्मरुद्रादीनां नोपपद्यते । भारते -

"ये तु सामान्यभावेन मन्यन्ते पुरुषोत्तमम् ।

ते वै पाषण्डिनो ज्ञेयास्सर्वकर्मबहिष्कृताः ॥

यस्तु नारायणं देवं सामान्येनाभिमन्यते ।

स याति नरकं घोरं यावच्चन्द्रदिवाकरम् ॥

यो महाविष्णुमन्येन हीनदेवेन दुर्मतिः ।

साधारणं सकृद् ब्रूते सोऽन्त्यजो नान्त्यजोऽत्यजः ॥" [१८] इति ।

वाराहे -

"अन्यदेवसमं यत्तु मन्यन्ते मां नराधमाः ।

चण्डालतां व्रजन्त्याशु जन्मानि नव पञ्च च ॥" [१९] इति

श्रीभागवते, भारद्वाजवचने, वाराहे, अगस्त्यं प्रति रुद्रवचने च इदं प्रसिद्धम् ।

किञ्च ब्रह्मरुद्रादीनामपि संहारकर्ता हरिरेवेति श्रूयते । यजुषि-

"हरिहरन्तमनुयन्ति देवाः विश्वस्येशानं वृषभं मतीनाम्" [२०]

इति । ब्रह्मपुराणे -

"ब्रह्माणमिन्द्रं रुद्रञ्च यमं वरुणमेव च ।

निगृह्याहरते यस्मात्तस्माद्धरिरिहोच्यते ॥

ब्रह्मा शम्भुस्तथैर्वाकश्चन्द्रमाश्च शतक्रतुः ।

एवमाद्यास्तथैवन्ये युक्ता वैष्णवतेजसा ॥

जगत्कार्यावसाने तु वियुज्यन्ते च तेजसा ।

तेजसश्चैव ते सर्वे पञ्चत्वमुपयन्ति च ॥" [२१] इति

एवं नृसिंहरूपिणा भगवता शरभरूपेणागतानां ब्रह्मरुद्रादीनामपि संहारादिकं नारसिंहपुराणादिष्ववगम्यते ॥ यथा तत्र सप्तत्रिंशाध्याये – हिरण्यकवधानन्तरं-स्तोत्रानन्तरं ब्रह्मसमीपगमनादिकं प्रतिपाद्य रुद्रप्रार्थनादिकमुक्त्वा शरभनिर्माणादिकं प्रतिपाद्य भगवता ब्रह्मरुद्राद्यधिष्ठितशरभहननं प्रतिपादितम् । गारुडे अष्टनवतितमाध्याये –

"हन्तुमभ्यागतं रौद्रं शरभं नरकेसरी ।

नखैर्विदारयामास हिरण्यकशिपं यथा ॥

निकृत्तबाहूरुशिराः वज्रकल्पमुखैर्नखैः ।

मेरुपृष्ठे नृसिंहेन शरभस्सहसाऽपतत् ॥" [२२] इति

पाद्मे श्रीभागवते च अयमंशः वर्तते ।

किञ्च आनुशासनिके उमामहेश्वरसंवादे भागवतोऽङ्गभावेन विना रुद्रोपासनं कुर्वतां शूद्रतुल्यत्वमुक्तम् । अतो नारायणस्य रुद्रेण समानतया बोधायनेन प्रतिपादित्वात् बोधायनाप-स्तम्बादिसूत्रेषु षड्विधतात्पर्यलिङ्गाभावात् तेषां सृष्टिकालादारभ्य नारायणैकपरत्वाभावात् नानादेवतोपासकत्वदर्शनाच्च परमैकान्तित्वं न सम्भवति ।

एवं कात्यायनसूत्राणामपि –

"ब्राह्मवैष्णवरौद्रैस्तु सावित्रैर्मैत्रवारुणैः ।

तल्लिङ्गैरेव मन्त्रैस्तु अर्चयेत्तु समाहितः ॥" [२३]

इति प्रतिपादनात् न परमैकान्तित्वम् । द्राह्यायणसूत्रे तु रुद्रविषयत्वेन कर्मारम्भे

प्रपदनमुक्तम् ।

अतः श्रीमन्नारायणैकपरत्वात् परमैकान्तित्वं श्रीमद्वैखानसानामेवेति प्रतिज्ञा कर्तुमुचिता । एवं 'अखिलजगदेककारणश्रीमन्नारायणैकपरत्वात्' इति नवमहेतुर्निरूपितः ।

इति नवमहेतुनिरूपणम् ।

अथ दशमहेतुनिरूपणम्

वैखानससूत्रं सर्वसूत्रोत्तमं 'तत्सूत्रोक्तधर्मानुष्ठानवतामेव भगवत्प्रियतमत्वोपपत्तेः' इति अन्तिमो हेतुः । अत्र श्रीवैखानसूत्रस्य श्रीमन्नारायणैकपरत्वाद् तत्सूत्रानुष्ठानवतामेव भगवत्प्रियतमत्वमुपपद्यते इति प्रतिपादनाय 'भगवत्प्रियतमत्वोपपत्तेः' इति दशमहेतुर्निरूप्यते । छन्दोगब्राह्मणे –

"वैखानसा वा ऋषय इन्द्रस्य प्रिया आसन्" [२४]

इति । अत्र इन्द्रशब्दः परमात्मपरः इति । वाराहे –

"अश्वत्थः कपिला गावः तुलसी विखनास्तथा ।

चत्वारो मत्प्रिया राजन्! तेषां वैखानसो वरः ॥" [२५] इति

"यत्र वैखानसा विप्रा यत्र सन्ति गवां गणाः ।

यत्र बिल्वाः पलाशाश्च तत्र सन्निहितो हरिः ॥" [२६] इति

कौर्मे-

"मच्चिता मद्गतप्राणा मयि सङ्गतमानसाः ।

अनन्यशरणा राजन् तस्माद्वैखानसा वराः ॥" [२७] इति

पाञ्चरात्रे पौष्करे बृहन्नारादीये भागवते श्रुत्यन्तरे एवं श्रीपाञ्चरात्रे ईश्वरसंहितायाम् –

"यत्रैव पूज्यते विष्णुर्विधिना प्रयतैर्नरैः ।

न तत्र ह्याधिदौर्गत्यव्याधिचौरादेकं भयम् ॥" [२८]

इति भगवत्पूजा कथं वैखानसैः क्रियत इत्युक्तम् । किञ्च –

“नित्यमुक्तोपभोग्यत्वात्परव्यूहात्मनो हरेः ।

तत्कालसन्निकृष्टैकलक्ष्यत्वाद्विभवात्मनः ॥

विशुद्धैर्योगसंसिद्धैश्चिन्त्यत्वादन्तरात्मनः ।

अर्चामन्येव सर्वेषामधिकारो निरङ्कुशः ॥

अर्चावतारविषये ममाप्युद्देशतस्तथा ।

उक्ता गुणा न शक्यन्ते वक्तुं वर्षशतैरपि ॥

एवं पञ्चप्रकारोऽहमात्मनां पततामघः।

पूर्वस्मादपि पूर्वस्मात् ज्यायांश्चैवोत्तरोत्तरः ॥” [२९]

इति प्रतिपादितरीत्या भगवतः परत्वदिषु सौलभ्याभावात् अखिललोकसमुज्जीवनार्थमर्चावतारः । तदेकपरत्वाद्वैखानसाः तत्प्रियतमाः । एतादृशनारायणैकपरत्वाभावात् बोधायनस्य आपस्तम्बादीनां च न कथञ्चदपि परमेकान्तित्वं भगवत्प्रियतमत्वञ्च सम्भवति । एवं च वैखानसानामेव परमैकान्तित्वं भगवत्प्रियतमत्वञ्चोपपद्यते इति सर्वं समञ्जसमिति दशमो हेतुर्निरूपितः ।

इति दशमहेतुनिरूपणम् ।

३. उपसंहारः (Conclusion)

अनेन प्रकारेण वैखानससूत्रस्य सर्वोत्तमत्वसाधकाः अष्टम-नवम-दशमहेतवः सविस्तरं विवेचिताः। मन्वादिमहर्षिभिः स्वीकृतत्वात्, अनन्यभावेन श्रीमन्नारायणैकपरत्वात्, तथा च भगवत्प्रियतमत्वोपपत्तेः हेतोः वैखानससूत्रं, तदनुयायिनश्च सर्वोत्कृष्टतमाः इति सिद्धम्। इतरसूत्रेषु दृश्यमानं मिश्रदेवतापासनं वैखानससूत्रे नास्तीति अस्य शास्त्रस्य परमैकान्तित्वं सुस्पष्टम्।

४. सन्दर्भसूची (References)

[१] मनुस्मृतिः - ६.२१

[२] मनुस्मृतिः - ६.२१

[३] महाभारतम् (शान्तिपर्व/वानप्रस्थधर्मः)

[४] शङ्खलिखितस्मृतिः

[५] मनुस्मृतिः - १२.१०५

[६] बोधायनगृह्यसूत्रम् (विष्णुप्रतिष्ठाकल्पः)

[७] नारायणोपनिषद् (अथर्वशिखा)

[८] महानारायणोपनिषद् - ११.६

[९] पुरुषसूक्तम् / श्वेताश्वतरोपनिषद् - ३.८

[१०] पुरुषसूक्तम्

[११] श्वेताश्वतरोपनिषद् - ६.८

[१२] श्वेताश्वतरोपनिषद् - ६.८

[१३] सुबालोपनिषद् - ६

[१४] महोपनिषद् - १.१

[१५] तैत्तिरीयोपनिषद् - ३.१.१

[१६] महानारायणोपनिषद् - १.१

[१७] मत्स्यपुराणम् / पद्मपुराणम्

[१८] महाभारतम्

[१९] वराहपुराणम्

[२०] तैत्तिरीयसंहिता / यजुर्वेदः

[२१] ब्रह्मपुराणम्

[२२] गरुडपुराणम् - ३.२६.९८

[२३] कात्यायनसूत्रम्

[२४] छन्दोगब्राह्मणम् (ताण्ड्यमहाब्राह्मणम्)

[२५] वराहपुराणम्

[२६] वराहपुराणम्

[२७] कूर्मपुराणम्

[२८] पाञ्चरात्रम् (ईश्वरसंहिता)

[२९] पाञ्चरात्रम् (सात्वतसंहिता / ईश्वरसंहिता)

५. ग्रन्थसूची (Bibliography)

१. मनुस्मृतिः.

२. बोधायनगृह्यसूत्रम्.

३. वैखानससूत्रम्.

४. नारायणोपनिषद्.

५. महानारायणोपनिषद्.

६. श्वेताश्वतरोपनिषद्.

७. महाभारतम्.

८. वराहपुराणम्.

९. गरुडपुराणम्.

१०. पाञ्चरात्रसंहिता (ईश्वरसंहिता).

११. कूर्मपुराणम्.

१२. छन्दोगब्राह्मणम्.